Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री जैनग्रन्थप्रकाशकसभा ग्रन्थांकाः ३१-३२-३३-३४ ॥

सर्वतंत्रस्वतंत्र-शासनसम्राट्-सूरिचक्रचक्रवर्ति-जगद्गुरु-तपागच्छाधिपति-प्रौढप्रभावशालि-अनेकतीर्थोद्धारक-भट्टारक-आचार्यमहाराजाधिराजश्रीविजयनेमिसूरीश्वरसद्गुरुभ्यो नमोनमः ॥

निजप्रतिभावदातसंस्मारितातीतपूर्वश्रुतकेवलिभगवद्-न्यायविशारद-न्यायाचार्य-कूर्चालसरस्वती-श्रीहरिभद्रसूरि-लघुबन्धुप्रभृत्यनेकशुभबिरुदविभूषितमहोपाध्यायश्रीयशोविजयगणिप्रणीतानि

# ॥ १ स्वोपज्ञविवरणसमेतं भाषारहस्यप्रकरणं २ श्रीहरिभद्रसूरिपुङ्गवप्रणीतयोगविंशिका-प्रकरणव्याख्या ३ स्वोपज्ञतत्त्वविवेकविवरणालङ्कृतं कूपदृष्टान्तविशदीकरणप्रकरणं ४ निशाभक्ते स्वरूपतो दूषितत्वविचारप्रकरणं च ॥

प्रकाशकः—राजनगर( अहम्मदावाद )स्थ श्री जैनग्रन्थप्रकाशकसभाकार्यवाहक-श्रेष्ठि. ईश्वरदास मूलचन्द्रः

वीर संवत् २४६७ ] ॥ आषाढ शुक्ला १० शुक्रवासरः ॥ [ विक्रम संवत् १९९७

मुद्रकः—शाह गुलाबचंद लल्लुभाई, श्री महोदय प्रिन्टींग प्रेस, दाणापीठ-भावनगर.

gyanmandir@kobatirth.org

For Private and Personal Use Only

## ॥ प्रकाशकीयं निवेदनम् ॥

अवधारयन्त्ववधानवन्तो विबुधाग्रगण्याः ? १ सप्ततिसाक्षिपाठविभूषितविवरणसमन्वितस्यास्य भाषारहस्यप्रकरणस्य २ सप्तसप्ततिसाक्षिपाठालङ्कृताया योगविंशिकाव्याख्याया ३ स्तत्त्वविवेकाभिधविवरणविभूषितस्य कूपदृष्टान्तविशदीकरणप्रकरणस्य ४ निशाभक्ते स्वरूपतो दूषितत्वविचारस्य च प्रणेत्रादिस्वरूपं सुनिर्णीततममेव, पूर्वमस्य सविवरणभाषारहस्यग्रन्थस्य जातेऽपि संस्करणे साम्प्रतं तदावृत्त्यादर्शानां प्रायोदौर्लभ्यं विवरणान्तर्वर्तिनां प्राकृतपाठानां तत्र संस्कृतानुवादाद्यभावश्चेत्यध्ययनेप्सूनामर्थसौकर्याय प्राकृतपाठं संस्कृतेऽनूद्य प्रतिपृष्ठं विषयविभागं विशदीकृत्य ग्रन्थप्रान्ते च प्राकृतभाषानिबद्धानां मूलगाथानामपि संस्कृतानुवादं विधाय विवरणान्तःपातिनः संवादपाठस्य तत्तद्ग्रन्थनामस्थलादिकं च स्पष्टीकृत्य तत्तद्ग्रन्थस्थपाठेन सह मेलयित्वतद्ग्रन्थस्यापि लिखितादर्शमवलोक्य क्वचिच्च पदशेषमपि पाठं पूर्णीकृत्य प्रतीकपदं साक्षीकृतग्रन्थनामविशिष्टोदाहरणाभिधादिकं च स्थूलाक्षरैर्व्यक्तीकरणादिपुरस्सरं विहितमिदं संस्करणमिति तदभिलाषुकाणामुपकारकत्वादेतत्संस्करणस्येति न पुनरावृत्तिनैरर्थ्यारेकावकाशः ॥ सर्वेषामप्येतेषां प्रतिभाप्रभावस्मारितश्रुतकेवलिदेशीय--न्यायविशारद--न्यायाचार्य-महोपाध्यायश्रीयशोविजयगणिप्रणीतत्वेनाविवादाधिष्ठिता प्रामाणिकतेति न प्रेक्षावतामादरणीयत्वे कोपि शङ्काकणः ॥ तत्राप्यादिममिदं स्वोपज्ञविवरणसमेतं भाषारहस्यप्रकरणं सिद्धिसिद्ध्येकावन्ध्यनिबन्धनप्रवचनमात्रन्तर्गतवाक्समितिगुप्तितत्त्वप्रदर्शकं तुर्याङ्गसमवायोपाङ्गप्रज्ञापनैकादशभाषापद-दशवैकालिकसप्तमसद्वाक्यशुद्ध्यध्ययनसूत्र-तन्निर्युक्ति-चूर्णि--वृत्तिसन्दर्भा-ऽऽचाराङ्गीयभाषाजाताध्ययना-ऽऽवश्यकनिर्युक्त्याद्युद्धारप्रायमिति न कोपि तद्विषये विवादलेशः ॥ पञ्चाशकवृत्तिपाठबलावसितदृष्टिवादनिस्स्यन्दरूपश्रीहरिभद्रसूरिसन्दब्धचतुश्चत्वारिंशदुत्तरचतुर्दशशतग्रन्थान्तर्वर्तिविंशिकाप्रकरणान्तःपातिन्या योगविंशिकाया योगतत्त्वप्रदर्शकं व्याख्यानं तु योगतत्त्वेप्सूनां प्रज्ञावतामतीवादरस्थानमेव ॥ द्रव्यस्तवफलवत्तानिरूपककूपदृष्टान्तै-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्दपर्यप्ररूपकं कूपदृष्टान्तविशदीकरणप्रकरणं तार्किकशैलीगुम्फितस्वोपज्ञ-तत्त्वविवेकाख्यविवरणेन भूषयित्वा विरचितमिदमुपाध्यायपादैर्भव्यजीवानामानन्दास्पदं शास्त्ररहस्यज्ञापकं च, केवलं कालवैषम्यमहिम्नैतादृशोऽयं ग्रन्थोऽतिप्रयासतोपि दिग्मितपृष्ठात्मा त्रुटितावस्थ एव समुपलब्धः अन्तरापि चास्य पृष्ठयुग्मरूपो पाठो विनष्टः, परं किञ्चित्स्थानाशून्यार्थमर्थसङ्गतये च तद्बुभुत्सूनां यथामति संयोजितः ॥ निशाभोजनस्य च स्वरूपत एव दूषितत्वं न तु तद्दूषितत्वे दोषान्तरानुषङ्गित्वं प्रयोजकं हिंसामृषावादादाविवेति निर्णीतं तर्कयुक्तिकदम्बेनागमपाठतात्पर्यप्रकाशकेन पूज्यचरणैर्निशाभोजने स्वरूपतो दूषितत्वविचारग्रन्थे, ग्रन्थरत्नमपीदं त्रुटितावस्थं खण्डितमेवोपलब्धं ॥ उपाध्यायपादसन्दृब्धः स्वोपज्ञविवरणविभूषितो ज्ञानार्णवग्रन्थोप्यनेकतरङ्गकरम्बितः पञ्चज्ञानतत्त्वप्रदर्शकोऽन्तरान्तराऽवसानेपि च त्रुटितावस्थः प्रचुरप्रयासप्राप्तो यथावसरं प्रकाशयिष्यते, मूलग्रन्थपद्यसंग्रहस्तु यावानुपलब्धः स्तोकेनैव कालेन मुद्रयिष्यते ॥ एवमुपलभ्यन्ते यानि त्रुटितावस्थितीनि पञ्चषाणि ग्रन्थरत्नानि स्युश्चेत्कस्यापि सहृदयस्य सविधे पूर्णावस्थानि तानि तन्निवेद्यमनुकम्पया, यतस्तदर्थं प्रकाशनप्रयासो यथावकाशं विधास्यते, ऐदंयुगीनानां भाग्यमान्द्यतोऽतिविषादास्पदमेतद्यदुत शतद्वितयसमाप्रमितस्वल्पकालान्तराले प्रमाणरहस्य-वादरहस्य-स्याद्वादरहस्यप्रभृतीनां रहस्यपदाङ्कितानां पञ्चोत्तर शतग्रन्थानां 'न्यायाचार्यपदं ततः कृतशतग्रन्थस्य यस्यार्पितम्' इति वाक्यनिर्णीतस्य न्यायग्रन्थशतकस्य च प्रायः सर्वथाप्यदर्शनं सञ्जातम्, जेसलमेरुस्थ-श्रावकहरराजप्रश्नप्रत्युत्तरसूचित-द्विलक्षश्लोकप्रमितन्यायग्रन्थेष्वपि बाहुल्येनादर्शनं जातम्, पर्याप्तमतिविषादेन ॥ विज्ञप्यन्ते च विद्वांसो भावत्ककरकजक्रोडीकृतप्रस्तुतादर्शप्रतिबिम्बितेऽस्मिन्ग्रन्थरत्नचतुष्के यत्किमपि छद्मस्थासुमत्सुलभानाभोगवशतो ब-व, प-ष, भ-म, घ-ध प्रभृति-प्रायःसदृगाकृतिवर्णादिषु सीसकाक्षरयोजकदोषतो वा जातं रिङ्खणं तन्मर्षणार्यं क्षमापीयूषपाथोधिभिः शुभं भूयाच्छ्रीश्रमणसङ्घस्य ॥

ग्रन्थानुक्रमः-पत्र.१ भाषारहस्य. प.४१ योगविंशिकाव्याख्या. प.५३ कूपदृष्टान्तविशदीकरण. प.५८ निशाभक्तदोषविचार ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## (योगविंशिकासंस्कृतानुवादः अनुसन्धान पत्र ५३ पृष्ठ. १)

मोक्षेण योजनाद्योगः सर्वोपि धर्मव्यापारः ॥ परिशुद्धो विज्ञेयः स्थानादिगतो विशेषेण ॥१॥ स्थानोर्णार्थालम्बनरहितस्तंत्रे पंचधा एषः ॥ द्विकमत्र कर्मयोगः तथा त्रिकं ज्ञानयोगस्तु ॥२॥ देशतः सर्वतस्तथा नियमेनैष चारित्रिणो भवति ॥ इतरस्य बीजमात्रं अत एव केचिदिच्छन्ति ॥३॥ एकैकश्च चतुर्धा अत्र पुनस्तत्त्वतो ज्ञातव्यः ॥ इच्छाप्रवृत्तिस्थिरसिद्धिभेदतः समयनीत्या ॥४॥ तद्युक्तकथाप्रीत्या संगता विपरिणामिनी इच्छा ॥ सर्वत्रोपशमसारं तत्पालनं प्रवृत्तिस्तु ॥५॥ तथैवैतद्बाधकचिन्तारहितं स्थिरत्वं ज्ञेयम् । सर्वं परार्थसाधकरूपं पुनर्भवति सिद्धिरिति ॥६॥ एते च चित्ररूपास्तथा क्षयोपशमयोगतोभवन्ति ॥ तस्य तु श्रद्धाप्रीत्यादियोगतो भव्यसत्त्वानाम् ॥७॥ अनुकम्पा निर्वेदः संवेगो भवति तथा च प्रशम इति ॥ एतेषामनुभावा इच्छादीनां यथासंख्यम् ॥८॥ एवं स्थिते तत्त्वे ज्ञातेन तु योजना इयं प्रकटा ॥ चैत्यवन्दनेन ज्ञेया नवरं तत्त्वज्ञेनसम्यक् ॥९॥ अर्हच्चैत्यानां करोमि कायोत्सर्गं एवमादिकम् ॥ श्रद्धायुक्तस्य तथा भवति यथार्थं पदज्ञानम् ॥१०॥ एतच्चार्थालम्बनयोगवतः प्रायोऽविपरीतं तु ॥ इतरेषां स्थानादिषु यत्नपराणां परं श्रेयः ॥११॥ इतरथा तु काकवासितप्रायमथवा महामृषावादः ॥ तस्मादनुरूपाणामेव कर्तव्य एतद्विन्यासः ॥१२॥ ये देशविरतियुक्ना यस्मादिह व्युत्सृजामि कायमिति ॥ श्रूयते विरताविदं ततः सम्यक्चिन्तितव्यमिदम् ॥१३॥ तीर्थस्योच्छेदाद्यपि नालम्बनं यदेवमेवात्र॥ सूत्रक्रियाया नाशः एषोऽसमञ्जसविधानात् ॥१४॥ स एष वक्र एव न च स्वयंमृतमारितयोरविशेषः ॥ एतदपि भावयितव्यं इह तीर्थोच्छेदभीरुभिः ॥१५॥ मुक्त्वालोकसंज्ञां वोढ्वा च साधुसमयसद्भावम् ॥ सम्यक्प्रवर्तितव्यं बुधेनातिनिपुणबुद्ध्या ॥१६॥ कृतमत्र प्रसंगेन स्थानादिषु यत्नसंगतानां तु ॥ हितमेतद्विज्ञेयं सदनुष्ठानत्वेन तथा ॥१७॥ एतच्च प्रीतिभक्त्यागमानुगं तथाऽसंगतायुक्तम् ॥ ज्ञेयं चतुर्विधं खलु एष चरमो भवति योगः ॥१८॥ आलम्बनमप्येतद्रूप्यरूपी चात्र परम इति ॥ तद्गुणपरिणतिरूपः सूक्ष्मोऽनालम्बनो नाम ॥१९॥ एतस्मिन्मोहसागरतरणं श्रेणिश्च केवलमेव ॥ ततोऽयोगयोगः क्रमेण परमं च निर्वाणम् ॥२०॥इति॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ओँ अर्हँ नमः ॥

निष्प्रतिमप्रतिभावदातसंस्मारितप्रणीतपूर्वश्रुतकेवलिभगवद्-न्यायाचार्य-न्यायविशारद-कूर्चालसरस्वती-श्रीहरिभद्रसूरि-लघुबान्धवस्मृतिविरुदविभूषित-महामहोपाध्याय-श्रीयशोविजयगणिप्रणीतं स्वोपज्ञविवरणविभूषितं—

# ॥ श्रीभाषारहस्यप्रकरणम् ॥

ऐन्द्रवृन्दनतं पूर्ण-ज्ञानं सत्यगिरं जिनम् ॥ नत्वा भाषारहस्यं स्वं, विवृणोमि यथामति ॥ १ ॥

इह खलु निःश्रेयसार्थिनां(ना) भाषाविशुद्धिरवश्यमादेया वाक्समिति-गुप्त्योस्तदधीनत्वात्तयोश्च चारित्राङ्गत्वात्तस्य च परमनिःश्रेयसहेतुत्वादिति, न च वचनविभक्त्यकुशलस्य मौनमात्रादेव वाग्गुप्तिसिद्धेर्गुणः, सर्वथा मौने व्यवहारोच्छेदादनिष्णातस्य गुप्त्यनधिकारित्वाच्च ॥ तदुक्तम् ॥ " वयणविभत्तिअकुसलो, वओगयं बहुविहं अयाणंतो ॥ जइवि न भासइ किंची, न चेव वयगुत्तयं पत्तो ॥१॥"त्ति, दश० अ० ७ नि० गाथा ॥२९०॥ (वचनविभक्त्यकुशलो वाग्गतं बहुविधमजानानः । यद्यपि न भाषते किञ्चिन्नैव वाग्गुप्ततां प्राप्तः ॥१॥ ) प्रत्युताऽवाग्गुप्तस्य वाग्गुप्तत्वाभिमानादिना दोष एव ॥ तदिदमाहोक्तगाथापातनिकायाश्चूर्णिकारः ॥ "(शिष्यः) आह जइ भासमाणस्स दोसो तो मोणं कायव्वं ?, आयरिओ भणइ, मोणमवि अणुवाएण कुणमाणस्स दोसो भवइ त्ति ॥" (आह यदि भाषमाणस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दोषस्तर्हि मौनं कर्तव्यं ? । आचार्यः भणति, मौनमप्यनुपायेन कुर्वाणस्य दोषो भवतीति ) विशुद्ध्या तु सुचिरं भाषमाणस्यापि धर्मदानादिना गुण एव ॥ तदिदमुक्तम् ॥ " वयणविभत्तीकुसलो, वओगयं बहुविहं वियाणंतो ॥ दिवसं पि भासमाणो, तहावि वयगुत्तयं पत्तो ॥१॥ त्ति, ॥२९१॥" ( वचनविभक्तिकुशलो वाग्गतं बहुविधं विजानानः । दिवसमपि भाषमाणः तथापि वाग्गुप्ततां प्राप्त इति ) ततो भाषाविशुद्ध्यर्थं रहस्यपदाङ्कितया चिकीर्षिताऽष्टोत्तरशतग्रन्थान्तर्गतप्रमारहस्य-नयरहस्य-स्याद्वादरहस्यादिसजातीयं प्रकरणमिदमारभ्यते तस्य चेयमादिगाथा ॥

**पणमिय पासजिणिन्दं, भासरहस्सं समासओ वुच्छं ॥**
**जं नाऊण सुविहिआ, चरणविसोहिं उवलहन्ति ॥ १ ॥**

अहं **भाषारहस्यं समासतः** शब्दसंक्षेपतो, **वक्ष्ये** इत्यन्वयः, इयं च प्रतिज्ञा, सा च तदर्थिनां शिष्याणामवधानफलिका, किं कृत्वा **प्रणम्य** प्रकर्षेण नत्वा, कं **पार्श्वजिनेन्द्रं** जयन्ति रागादिशत्रूनिति जिनाः सामान्यकेवलिनस्तेष्विन्द्र इव प्राधान्याज्जिनेन्द्रः, पार्श्वश्चासौ जिनेन्द्रश्च पार्श्वजिनेन्द्रस्तम्, अनेन च समुचितेष्टदेवतानमस्काररूपं मङ्गलं कृतं, तेन च शिष्टाचारः परिपालितो भवति । अथ शिष्टाचारपरिपालनं न स्वतः प्रयोजनम्, सुख-दुःखाभावयोरन्यतरत्वाभावात्, न चापूर्वजनकतया तस्य फलहेतुत्वम्, तद्धि अपूर्वं विघ्नमविनाश्य फलं जनयेद्, विनाश्य वा, नाऽऽद्यः, सति प्रतिबन्धके हेतुसहस्रादपि फलानुत्पत्तेः, नाऽन्त्यः, आवश्यकत्वाद्विघ्नध्वंसस्यैव मङ्गलफलत्वेऽपूर्वकल्पनावैयर्थ्यादितिचेत्, न, शिष्टाचारपरिपालनद्वारा मङ्गलस्यापूर्वजनकत्वेऽपि विघ्नध्वंसहेतुत्वाऽविरोधा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्पुण्यप्रकृतिबन्ध–पापप्रकृत्युच्छेदयोर्युगपद्भावात्, न च विघ्नध्वंसेनैव फलोपपत्तावपूर्वकल्पनावैयर्थ्यम्, विहितत्वेन तस्याऽवश्यं पुण्यजनकत्वादित्यधिकं मत्कृतमङ्गलवादे। पश्चार्द्धेन प्रयोजनमाह, यद् भाषारहस्यं, ज्ञात्वा विदित्वा, सुविहिताः सदाचाराः, चरणविशुद्धिं चारित्रनैर्मल्यम्, उपलभन्ते प्राप्नुवन्ति ॥ १ ॥

अथ भाषामेव तावन्निक्षेपतो निर्दिशति—

**नामाई निक्खेवा, चउरो चउरेहि एत्थ णायव्वा॥ दव्वे तिविहा गहणं,तहय निसिरणं पराघाओ॥२॥**

अत्र भाषायां निरूपणीयायां, नामादयश्चत्वारो निक्षेपाः, चतुरैः अनुयोगकुशलैः, ज्ञातव्याः, नामभाषा, स्थापनाभाषा, द्रव्यभाषा, भावभाषा चेति, तत्र नामस्थापने आगम–नोआगम–ज्ञात्रनुपयुक्त–ज्ञशरीर–भव्यशरीर-द्रव्यभाषास्वरूपं च सुगमत्वादुपेक्ष्य तद्व्यतिरिक्तद्रव्यभाषाभेदानाह, द्रव्ये च, ज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्ये च विषये, त्रिविधा त्रिप्रकारा, भाषेत्यस्य पूर्वतो विपरिणतानुषङ्गः। कास्तिस्रो विधा इत्याह, ग्रहणं वचो(काय)-योगपरिणतेनात्मना गृहीतान्यनिसृष्टानि भाषाद्रव्याणि, तथाचेति समुच्चये, निसरणम्, उरःकण्ठादिस्थानप्रयत्नाद्यथाविभागं निसृज्यमानानि तान्येव, पराघातश्च, तैरेव भाषाद्रव्यैर्निसृष्टैः प्रेर्यमाणानि भाषापरिणतिप्रायोग्याणि द्रव्यान्तराणि॥ आह च दश० निर्युक्तिकारः॥ "दव्वे तिविहा गहणे, निसिरणे तह भवे पराघाये त्ति" ॥२७१॥ (द्रव्ये त्रिविधा ग्रहणे निसरणे तथा पराघाते इति) अत्र च विषये सप्तमी ग्रहणादिक्रियामाश्रित्य वृत्तौ ग्रहणे चेत्यादिव्याख्यानात्॥ अन्यथा तु॥ "तिविहा भासा तंजहा गहणं निसिरणं पराघातो त्ति"॥

भाषाया नामादि-निक्षेपाः द्रव्यभाषाया ग्रहणादिभेदत्रय-प्ररूपणश्च॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( त्रिविधा भाषा तद्यथा ग्रहणं निसरणं पराघात इति ) चूर्णिदर्शनात्प्रथमापि नानुपपन्नैवेति ध्येयम् ॥ २ ॥

अथ कीदृशानि भाषाद्रव्याणि गृह्णातीत्याह—

गेण्हइ ठियाइ जीवो, णेव य अठियाइ भासदव्वाइं॥ दव्वाइचउविसेसो, णायव्वो पुण जहाजोगं॥३॥

जीवो भाषाद्रव्याणि स्थितानि गृह्णाति, नैव चाऽस्थितानि गमनपरिणामवन्ति। अथ यानि स्थितानि गृह्णाति तानि द्रव्यतः किमेकप्रदेशकानि यावदनन्तप्रदेशकानि वा ?, क्षेत्रतश्चैकप्रदेशावगाढानि यावदसङ्ख्येयप्रदेशावगाढानि वा ?, कालतश्चैकसमयस्थितिकानि यावदसङ्ख्येयसमयस्थितिकानि वा ?, भावतश्च वर्णवन्ति गन्धवन्ति रसवन्ति स्पर्शवन्ति वेति ? जिज्ञासायामाह, द्रव्यादिचतुर्विशेषः पुनर्यथायोगं सूत्रोक्तनीत्या यथासम्भवं ज्ञातव्यः॥ तथाहि॥ द्रव्यतस्तावदनन्तप्रदेशकान्येव गृह्णाति नैकपरमाण्वाद्यात्मकानि, स्वभावत एव तेषां ग्रहणायोग्यत्वात् ॥ क्षेत्रतस्त्वसङ्ख्येयप्रदेशावगाढान्येव, एकप्रदेशाद्यवगाढानां ग्रहणायोग्यत्वात् ॥ कालतस्त्वेकसमयस्थितिकान्यपि यावदसङ्ख्येयसमयस्थितिकान्यपि, पुद्गलानामसङ्ख्येयमपि कालं यावदवस्थानसम्भवात्॥ "निरेए जहन्नेणं एक्कं समयं उक्कोसेणं असंखेज्जं कालम्"॥ (निरेजो जघन्येनैकं समयं, उत्कर्षेणासंख्येयं कालं) इति व्याख्याप्रज्ञप्तिवचनात्॥ एकसमयस्थितिकत्वं च ग्रहणानन्तरमेव निसर्गे, ग्रहणसमय एवावस्थानात्प्रतिपत्तव्यम्॥ एकप्रयत्नगृहीतानामप्यादिभाषापरिणामस्थितिवैषम्यादेकसमयस्थितिकान्यपीत्यन्ये॥ भावतस्तु वर्णवन्त्यपि यावत् स्पर्शवन्त्यपि। वर्णगन्धरससङ्ख्यामाश्रित्य तु समुदायविवक्षायां नियमात् पञ्चद्विपञ्चवर्णगन्धरसवन्त्येव, ग्रहणद्रव्या-

ग्राह्यभाषाया द्रव्यादिभेदचतुष्टयप्रदर्शनम्॥ स्थितद्रव्यग्रहणस्वरूपश्च॥

॥ २ ॥

ण्याश्रित्य तु कानिचिदेकद्व्यादितद्वन्त्यपीत्यूहनीयम्। कालादीन्यप्येकगुणकालादीनि यावदनन्तगुणकालादीन्यपीति द्रष्टव्यम् । स्पर्शसङ्ख्यामाश्रित्य च ग्रहणद्रव्याणि प्रतीत्य कानिचिद् द्विस्पर्शवन्ति न त्वेकस्पर्शवन्ति । एकस्यापि परमाणोरवश्यं स्पर्शद्वयसद्भावात् । द्वौ च स्पर्शौ मृदुशीतौ मृदूष्णौ वा । कानिचित्त्रिस्पर्शान्यपि, त्रिस्पर्शत्वं, कानिचिन्मृदुशीतस्पर्शानि कानिचिन्मृदुस्निग्धस्पर्शानीत्यादिदिशा मृदुस्पर्शावयवानां स्पर्शान्तरयोगे समुदायमधिकृत्य भावनीयम् । कानिचिच्चतुःस्पर्शान्यपि ॥ समुदायमधिकृत्य तु चतुःस्पर्शान्येव, तत्र चतुःस्पर्शेषु सूक्ष्मस्कन्धेषु द्वौ मृदुलघुरूपाववस्थितौ स्पर्शौ अन्यौ तु द्वौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ चेति। अत्र चावस्थितयोः स्पर्शयोरव्यभिचरितत्वेनागणनाद्वैकल्पिकस्पर्शमाश्रित्य चतुःस्पर्शवन्तीति निर्देश इति सम्प्रदायः । न चायं पर्यनुयोज्यो विचित्रत्वात्सूत्रगतेरिति भावनीयम् । शीतस्पर्शादीन्यपि चैकगुणशीतस्पर्शादीनि यावदनन्तगुणशीतस्पर्शादीन्यपीति द्रष्टव्यम् । आलापकश्चात्र विषये प्रज्ञापनायामनुसन्धेयः ॥ ३ ॥ अथ स्पृष्टास्पृष्टादिजिज्ञासायामाह—

**[1]पुट्ठो[2]गाढ[3]अणंतर–[4]अणुबायर[5]उड्ढमहतिरियगाइं ॥ [6]आइ[7]विसय[8]आणुपुव्वी–कलिआइं [9]छद्दिसिं चेव ॥ ४॥**

उक्तलक्षणानि भाषाद्रव्याणि स्पृष्टान्येव आत्मप्रदेशैः सह सङ्गतान्येव गृह्णाति नास्पृष्टानि ॥ १ ॥ तान्यप्यवगाढान्येवात्मप्रदेशैः सहैकक्षेत्रावस्थितान्येव न त्वात्मप्रदेशैः स्पृष्टान्यप्यात्मप्रदेशावगाहक्षेत्राद्बहिरवस्थितानि ॥ २ ॥ तान्यप्यनन्तरावगाढान्येव न परम्परावगाढानि, येष्वात्मप्रदेशेषु यानि भाषाद्रव्याण्यवगाढानि तैरात्मप्रदेशैस्तान्येव गृह्णाति, न त्वेकद्वित्रात्मप्रदेशव्यवहितानि ॥ ३ ॥ तान्यपि भाषायोग्यस्कन्धानां मिथ एव प्रदे-

भाषाया द्रव्यादि विशेषप्ररूपणं ग्राह्यपुद्गलेषु स्पृष्टादिनवद्वारवर्णनञ्च ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शस्तोकबाहुल्यापेक्षयाऽणूनि बादराणि च, न त्वन्यथा ॥ ४ ॥ तानि च जीवस्य यावति क्षेत्रे ग्रहणयोग्यानि भाषाद्रव्याण्यवस्थितानि तावत्येव क्षेत्र ऊर्ध्वाधस्तिर्यग्गानि ॥ ५ ॥ तानि चान्तर्मु( र्मौ )हूर्त्तिकस्य ग्रहणोचितकालस्यादावपि मध्येपि तिर्यगपि ( अवसानेऽपि ) आदिशब्दस्योपलक्षणत्वात् ॥ ६ ॥ तान्यपि स्वविषयाणि स्पृष्टादीनि न पुनरविषयाणि तद्व्यतिरिक्तानि ॥ ७ ॥ तान्यप्यानुपूर्व्वीकलितानि 'आनुपूर्वी नाम ग्रहणापेक्षया यथाऽऽसन्नत्वं' तया कलितानि न पुनरनीदृशानि ॥ ८ ॥ तानि च नियमात् षड्दिग्भ्य आगतानि गृह्णाति न तु तिसृभ्यश्चतसृभ्यो वा दिग्भ्यः, भाषकाणां नियमात् त्रसनाड्यामवस्थानेन तेषां षड्दिग्गतानामेव पुद्गलानां ग्रहणसम्भवात् ॥ ९ ॥ आलापकश्चात्र प्रज्ञापनायामेवानुसन्धेयः ॥ ४ ॥

तदेवमुक्तं कीदृशानि गृह्णातीति ॥ अथ कीदृशानि निसृजतीत्याह—

**भिन्नाइ कोइ णिसिरइ,तिव्वपयत्तो परो अभिन्नाइं ॥ भिन्नाइ जंति लोगं,अणंतगुणवुड्ढिजुत्ताइं ॥५॥**

कश्चिन्नीरोगतादिगुणयुक्तस्तथाविधादरात्, तीव्रप्रयत्नो वक्ता, भिन्नानि आदाननिसर्गप्रयत्नाभ्यां खण्डशः कृतानि भाषाद्रव्याणि, निसृजति, परो व्याधिग्रस्ततयाऽनादरतो मन्दप्रयत्नः, अभिन्नानि तथाभूतस्थूलखण्डात्मकानि तानि निसृजति ॥ तत्र भिन्नानि भाषाद्रव्याणि सूक्ष्मबहुत्वाभ्यामन्यद्रव्यवासकत्वात्, अनन्तगुणवृद्धियुक्तानि सन्ति, लोकं यान्ति षट्सु दिक्षु लोकान्तं व्याप्नुवन्तीत्यर्थः ॥ तथाच पारमर्ष-( प्रज्ञापना ) ॥ " जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गहिआइं णिसिरइ ताइं किं भिण्णाइं णिसिरइ अभि-

तीव्रमन्द-प्रयत्नवक्तृ-निसृष्टभाषा पुद्गलानां भिन्नाभि-न्नत्ववि-वरणम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण्णाइं णिसिरइ ? गोयमा !—भिण्णाइं पि णिसिरइ । अभिण्णाइं पि णिसिरइ । जाइं भिण्णाइं णिसिरइ ताइं अणंतगुणपरिवुड्ढिए परिवुड्ढमाणाइं लोअंतं फुसंति त्ति ॥ " (जीवो भदन्त ! यानि द्रव्याणि भाषातया गृहीतानि निसृजति तानि किं भिन्नानि निसृजति, अभिन्नानि निसृजति ?, गौतम ! भिन्नान्यपि निसृजति अभिन्नान्यपि निसृजति, यानि भिन्नानि निसृजति तान्यनन्तगुणवृद्ध्या परिवर्धमानानि लोकान्तं स्पृशन्ति ) भाष्यकारोप्याह ॥ "कोई मन्दपयत्तो, णिसिरइ सकलाइ चेव दव्वाइं ॥ अन्नो तिव्वपयत्तो, सो मुंचइ भिंदिउं ॥१॥ ताइं भिन्नाइ सुहुमयाए, अणंतगुणवड्ढियाइ लोगंतं ॥ पाविंति पूरयंति य, भासाइ णिरंतरं लोगं ॥२॥ति ( कश्चिन्मन्दप्रयत्नो निसृजति सकलान्येव द्रव्याणि ॥ अन्यस्तीव्रप्रयत्नः स मुञ्चति भेदयित्वा तानि ॥ भिन्नानि सूक्ष्मतया अनन्तगुणवर्धितानि लोकान्तं प्राप्नुवन्ति पूरयन्ति च भाषया निरन्तरं लोकमिति ) ॥ ५ ॥ अथाऽभिन्नानि कथं भवन्तीत्याह—

**भिज्जंति अभिन्नाइं, अवगाहणवग्गणा असंखिज्जा ॥ गंतुं व जोयणाइं, संखिज्जाइं विलिज्जंति ॥६॥**

**अभिन्नानि** भाषाद्रव्याणि, **असङ्ख्येया अवगाहनावर्गणाः** 'अवगाहना नामैकैकस्य भाषाद्रव्यस्याधारभूता असङ्ख्येयप्रदेशात्मकक्षेत्रविभागरूपाः' तासां वर्गणाः समुदायास्ता, **गत्वा** अतिक्रम्य, **भिद्यन्ते** विशरारुभावं बिभ्रति, विशरारूणि च पुनस्तानि **सङ्ख्येयानि योजनानि गत्वा विलीयन्ते** शब्दपरिणामं विजहतीत्यर्थः । **तथाच सूत्रम्** ॥ " जाइं अभिण्णाइं णिसिरइ ताइं असंखेज्जाओ ओगाहणवग्गणाओ गंता भेदमावज्जंति संखेज्जाइं जोयणाइं गंता विद्धंसमावज्जंति त्ति " (यान्यभिन्नानि निसृजति तान्यसंख्येया अवगाहनवर्गणा

मन्दप्रयत्ननिसृष्टाऽभिन्नभाषापुद्गलानां गति—विलयक्षेत्रप्ररूपणम् ॥

For Private and Personal Use Only

गत्वा भेदमापद्यन्ते संख्येयानि योजनानि गत्वा विध्वंसमापद्यन्त इति ) भाष्यमपि ॥ "गंतुमसंखेज्जाओ, अवगाहणवग्गणा अभिन्नाइं ॥ भिज्जंति धंसमेंति य, संखेज्जा जोयणा गंतुं ॥१॥ति" ( गत्वाऽसंख्येया अवगाहनवर्गणा अभिन्नानि । भिद्यन्ते ध्वंसं यन्ति च संख्येयानि योजनानि गत्वेति ) ॥ ६ ॥

अथ योऽयं भाषाभेदः क्रियते स कतिविध इति प्रसङ्गादाह—

**से भेए पंचविहे, खंडे पयरे अ चुन्निआभेए ॥ अणुतडियाभेए तह, चरिमे उक्कारिआभेए ॥ ७ ॥**

स पूर्वोक्तो, भेदो भाषाद्रव्याणां यथावस्थितानामवयवविभागः, पञ्चविधः पञ्चप्रकारः, खंडे त्ति खण्डभेदः प्रथमः, पयरे त्ति प्रतरभेदो द्वितीयः, चूर्णिकाभेदस्तृतीयः, तथेति समुच्चये, अनुतटिकाभेदश्चतुर्थः, चरमः सूत्रोक्तक्रमापेक्षयान्तिम, उत्कारिकाभेद इति। तथाच पारमर्षम् ॥ "एतेसिं णं भंते ! दव्वाणं कतिविहे भेदे पण्णत्ते ! गोयमा !-पंचविहे भेए पण्णत्ते, तं जहा खंडाभेए पयरभेए चुण्णिआभेए अणुतडियाभेए उक्कारियाभेए त्ति" (एतेषां भदन्त द्रव्याणां कतिविधो भेदः प्रज्ञप्तः ? गौतम ! पंचविधो भेदः प्रज्ञप्तः तद्यथा खंडभेदः, प्रतरभेदः, चूर्णिकाभेदः, अनुतटिकाभेदः, उत्करिकाभेद इति ) ॥ ७ ॥ अथैतेषामेव लक्षणान्याह—

**अयखंडवंसपिप्पलि-चुण्णदहेरंडबीअभेअसमा ॥ एए भेअविसेसा, दिट्ठा तेलुक्कदंसीहिं ॥ ८ ॥**

एते भेदविशेषास्त्रैलोक्यदर्शिभिर्भगवद्भिः, अयःखण्डवंशपिप्पलीचूर्णह्रदैरण्डबीजभेदसमा दृष्टाः। तथा च 'अयःखण्डादिभेदवदितरभेदापेक्षं भेदनिष्ठं प्रतिनियतं वैलक्षण्यमेव खण्डभेदादीनां लक्षणम्', तच्च जातिरूप-

निसृष्टभाषापुद्गलानां खंड-प्रतरादिभेदोपवर्णनं दृष्टान्तोपदर्शनगर्भम् ॥

मुपाधिरूपं वेत्यन्यदेतत् ॥ तथाचाभिहितम् ॥ "से किं तं खंडाभेए ? खंडाभेए जण्णं अयखंडाण वा तउखंडाण वा तंबखंडाण वा सीसगखंडाण वा रययखंडाण वा जातरूवखंडाण वा खंडएण भेदे भवति से त्तं खंडाभेए ॥१॥ से किं तं पयरभेए ?, पयरभेए जण्णं वंसाण वा वेत्ताण णलाण वा कदलीथंभाण वा अब्भपडलाण वा पयरएणं भेदे भवति से त्तं पयरभेदे ॥२॥ से किं तं चुण्णिआभेदे चुण्णिआभेदे ?, जण्णं तिलचुण्णाण वा मुग्गचुण्णाण वा मासचुण्णाण वा पिप्पलीचुण्णाण वा मिरियचुण्णाण वा सिंगबेरचुण्णाण वा चुण्णिआए भेदे भवति से त्तं चुण्णिआभेदे ॥३॥ से किं तं अणुतडियाभेदे ?, अणुतडियाभेदे जण्णं अगडाण वा तलागाण वा दहाण वा नदीण वा वावीण वा पुक्खरिणीण वा दीहिआण वा गुंजाण वा गुंजालियाण वा सराण वा सरसराण वा सरपंतियाणवा सरसरपंतिआण वा अणुतडियाभेदे भवति से त्तं अणुतडियाभेदे ॥ ४ ॥ से किं तं उक्कारियाभेए ?, उक्कारियाभेए जण्णं मूसाण वा मंडूसाण वा तिलसिंगाण वा मुग्गसिंगाण वा माससिंगाण वा एरंडबीआण वा फुडिया उक्कारिआए भेए भवति से त्तं उक्कारिआभेए त्ति ॥५॥ (अथ कः स खंडभेदः, खंडभेदः यत् अयःखंडानां वा त्रपुखंडानां वा ताम्रखंडानां वा सा(सी)सकखंडानां वा रजतखंडानां वा जातरूपखंडानां वा खंडके(त्वे)न भेदो भवति स(तत्)खंडभेदः ॥ अथ कः स प्रतरभेदः, प्रतरभेदः यत् वंशानां वा वेत्राणां वा नलानां वा कदलीस्थंभानां वा अभ्रपटलानां वा प्रतरके(त्वे)ण भेदो भवति स तत्प्रतरभेदः ॥ अथ कः स चूर्णिकाभेदः, चूर्णिकाभेदः यत्तिलचूर्णानां वा मुद्गचूर्णानां वा माषचूर्णानां वा पिप्पलीचूर्णानां वा मिरिचचूर्णानां वा शृंगबेरचूर्णानां वा चूर्णतया भेदो भवति स तच्चूर्णिकाभेदः ॥

खंडादिभेदानां दृष्टान्तपूर्वकं प्ररूपणम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ कः स अनुतटिकाभेदः, अनुतटिकाभेदः यद्गडानां वा तडागानां वा ह्रदानां वा वापीनां वा पुष्करिणीनां वा दीर्घिकानां वा गुञ्जानां वा गुञ्जालिकानां वा सरसां वा सरस्सरसां वा सरःपंक्तीनां वा सरस्सरःपंक्तीनां वा अनुतटिकाभेदो भवति स तदनुतटिकाभेदः ॥ अथ कः स उत्करिकाभेदः, उत्करिकाभेदः यद्मूषाणां वा मंडूसकानां वा तिलशृंगाणां(शिम्पानां) वा मुद्गशिम्पानां वा माषशिम्पानां वा एरण्डबीजानां वा स्फुटिता उत्करिकतया भेदो भवति स तदुत्करिकाभेद इति ) न च वाच्यमेवंभिद्यमानानां भाषाद्रव्याणामेव नाशापत्तिरवयवविभागाद्रव्यासमवायिकारणीभूतविजातीयावयवसंयोगनाशादिति । घटे छिद्रपर्यायवत्तत्र भेदपर्यायोत्पादेपि द्रव्यान्तरोत्पादानभ्युपगमाद्विशिष्टोत्पादस्य च विशिष्टध्वंसप्रयोजकत्वेनाविशिष्टावस्थानाऽप्रतिपन्थित्वात्, अन्यथा द्वितीयादिसमयेष्ववस्थितस्यैव घटस्य द्वितीयादिसमये विशिष्टतयोत्पादेन ध्वंसव्यवहारप्रसङ्गात् । न च छिद्रघटोपि तद्घटभिन्न एवोत्पद्यत इति वाच्यं, दण्डाद्यव्यापारेण तदुत्पादस्याकस्मिकत्वात्, अथ दण्डादिकं हेतुर्घटविशेष एव न त्वत्रापीति चेत्, अपूर्वेयं कल्पना, अस्तु वा तथा, तथापि ' घटे छिद्रमुत्पन्नं न तु घटो विनष्ट ' इति व्यवहारः कथमुपपादनीय इत्यधिकं **सम्मतिटीकायाम्** । वस्तुतः संयोगनाशस्य न द्रव्यनाशकत्वम्, किन्त्वावश्यकत्वाद्भेदस्यैव, तस्य च न भेदत्वेन तथात्वं किन्तु भेदविशेषत्वेन ॥ तथा च मन्दप्रयत्नोच्चारितभाषाद्रव्याणां गतिविशेषप्रयुक्तभेदस्य तद्ध्वंसजनकत्वेप्यादाननिसर्गप्रयत्नजनितभेदस्य न तथात्वमिति यथासूत्रं युक्तमुत्पश्यामः ॥ ८ ॥

अथैतैरेव भेदैर्भिद्यमानानां मिथोऽल्पबहुत्वमाह—



For Private and Personal Use Only

हुंति अणंतगुणाइं, दव्वाइं इमेहि भिज्जमाणाइं ॥ पच्छाणुपुव्विभेआ, सव्वत्थोवाइ चरमाइं ॥९॥

एभिर्भेदैः, भिद्यमानानि द्रव्याणि पश्चानुपूर्व्वी भेदात् पश्चानुपूर्व्येव भेदो यथासङ्ख्यं गणनप्रकारस्ततः, अनन्तगुणानि भवन्ति, तत्र च सर्वस्तोकानि चरमाणि उत्कारिकाभेदेन भिद्यमानानि। तथाचालापकः ॥ "एएसि णं भंते! दव्वाणं खंडाभेएणं पयराभेदेणं चुन्निआभेदेणं अणुतडिआभेदेणं उक्कारिआभेदेणं भिज्जमाणाणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा? गोयमा! सव्वत्थोवाइं दवाइं उक्कारिआभेदेणं भिज्जमाणाइं, अणुतडियाभेदेणं भिज्जमाणाइं अणंतगुणाइं, चुण्णिआभेदेणं भिज्जमाणाइं अणंतगुणाइं, पयराभेदेणं भिज्जमाणाइं अणंतगुणाइं, खंडाभेदेणं भिज्जमाणाइं अणंतगुणाइं ति" (एतेषां भदन्त द्रव्याणां खंडभेदेन प्रतरभेदेन चूर्णिकाभेदेन अनुतटिकाभेदेन उत्करिकाभेदेन भिद्यमानानां कतराणि कतरेभ्यः अल्पानि वा बहुकानि वा तुल्यानि वा विशेषाधिकानि वा गौतम! सर्वस्तोकानि द्रव्याणि उत्करिकाभेदेन भिद्यमानानि, अनुतटिकाभेदेन भिद्यमानानि अनन्तगुणानि, चूर्णिकाभेदेन भिद्यमानान्यनन्तगुणानि, प्रतरभेदेन भिद्यमानान्यनन्तगुणानि, खंडभेदेन भिद्यमानान्यनन्तगुणानि इति) इदं चाल्पबहुत्वं सूत्रप्रामाण्यादेव, युक्तेरविषयत्वादिति सम्प्रदायः ॥९॥

तदेवमुक्तं सप्रसङ्गं कीदृशानि निसृजतीति, अथ कैः केषां पराघात इत्याह—

दव्वेहिं णिसिट्ठेहिं, तप्पाओगाण किर पराघाओ ॥ वीसेढीए इक्को, मीसो य समाइ सेढीए ॥ १० ॥

निसृष्टैस्ताल्वादिप्रयत्नपूर्वमुच्चरितैः, द्रव्यैस्तत्प्रायोग्यानां वासनायोग्यानां द्रव्याणाम्, किलेति सत्ये,

खंडादिभिन्नपुद्गलानां परस्परमल्पबहुत्वम् ॥ पराघातस्वरूपं च ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पराघातो नाम वासना भवति, स च विश्रेण्यामेको निसृष्टद्रव्याऽकरम्बितो भवति ॥ निसृष्टानां भाषाद्रव्याणां सूक्ष्मतयाऽनुश्रेण्येव गमनात् । "जीवसूक्ष्मपुद्गलयोरनुश्रेणि गतिः" (तत्त्वार्थ अ०२) इति वचनात् । समायां भाषकदिगपेक्षया प्रच्वरायां, श्रेण्यां मिश्रो निसृष्टद्रव्यकरम्बितो भवति । तथाचोक्तं आव० निर्युक्तिकृता ॥ "भासासमसेढीओ, सद्दं जं सुणई मीसयं सुणई ॥ वीसेढी पुण सद्दं, सुणेइ णियमा पराघाए" ॥१॥ त्ति (भाषासमश्रेणीतः शब्दं यच्छृणोति मिश्रकं श्रुणोति । विश्रेण्यां पुनः शब्दं श्रुणोति नियमात्पराघाते) इति ॥ १० ॥

तदेवमुक्तं कैः केषां पराघात इत्यपि, अथ ग्रहणादीनां द्रव्यभाषात्वमेव समर्थयति—

**पाहन्नं दव्वस्स य, अप्पाहन्नं तहेव किरिआणं ॥ भावस्स य आलंबिय, गहणाइसु दव्ववएसो ॥११॥**

द्रव्यस्य च प्राधान्यं, तथैव क्रियाणां ग्रहणादिरूपाणां, भावस्य च भाषापरिणामलक्षणस्य, अप्राधान्यं आलम्ब्य विवक्षाविषयीकृत्य, ग्रहणादिषु द्रव्यव्यपदेशः । तथाचोक्तं दशवैकालिक अध्य० ७ नि० गा० २७१ वृत्तौ "एषा त्रिप्रकारापि क्रिया द्रव्ययोगस्य प्राधान्येन विवक्षितत्वात् द्रव्यभाषेति भाव इति" ॥ ११ ॥ अन्यथाङ्गीकारे दोषमाह—

**अण्णह विरुज्झए किर, दोहि अ समएहि भासए भासं ॥ वयजोगप्पभवा सा, भासा भासिज्जमाणित्ति॥**

अन्यथा विरुद्ध्यते किल द्वाभ्यां समयाभ्यां भाषते भाषामिति । इदं हि प्रथमसमये भाषाद्रव्याणि गृहीत्वा द्वितीयसमये भाषात्वेन परिणमय्य निसर्गाभिप्रायेण सङ्गच्छते । एवं च निसर्गसमये भाषाद्रव्याणां



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रव्यभाषास्वरूपं समर्थ्य भावभाषायाः स्वरूपादिप्ररूपणम् ॥

भावभाषात्वमेवेति ग्रहणमेव द्रव्यभाषा स्यान्न निसर्गादीत्युक्तविवक्षैवादरणीया। एवं वचोयोगप्रभवा भाषेत्यपि निसर्गकाले भावभाषानभ्युपगमे विरुद्धयेत, वचोयोगो हि "निसर्गानुकूलः कायसंरम्भः, काययोगाहृतवाग्द्रव्यसमूहसध्रीचीनजीवव्यापारो" वेत्यन्यदेतत्, उभयथापि तज्जन्या भावभाषेत्युपेयम्, अन्यथा भाषापरिणत्यनुकूलवाग्योगवैकल्यात्, किं बहुना, एवं हि 'भाष्यमाणा भाषेति' भागवतमपि वचनं विरुद्धयेत। अत्र भावभाषात्वस्यैव विधेयत्वात्, अन्यथा न पूर्वं नापि पश्चादित्यवधारणानुपपत्तेः। अथ भाष्यमाणा भाषेति कथम्?, नहि भाषैव भाष्यते किन्तु विषय इति चेत्, सत्यं, भाषापदसमभिव्याहारे वचनार्थकधातोर्यत्नविशेषपरत्वात्, अत एव वाचमुच्चरतीत्यादिलोकेपि प्रयोगः। ननु तथापि कथमेतदभिन्नानामेव भाषाद्रव्याणामारम्भतः शब्दपरिणामत्यागात् भिन्नानां तु लोकाभिव्याप्त्यादिना परतोपि तत्परिणामावस्थानान्निसर्गसमय एव भाषेति प्रतिज्ञाविरोधात्। न च निसर्गोत्तरं वासनयैव भाषापरिणामाद्विशेषोऽभिधेयः, तया द्रव्यान्तराणां भाषापरिणामाधानेपि निसृष्टद्रव्याणां तदपरित्यागात्, न च सूक्ष्मर्जुसूत्रनयेनोपपत्तिः, तन्नयेऽपि परतस्तत्परिणतिधाराऽविच्छेदात्, नापि स्थूलकालमादाय वर्त्तमानत्वोपग्रहान्न दोष इति वाच्यं, वर्त्तमानयत्नोपरमेपि भाषापरिणामानुपरमादिति चेत्, न, अत्र क्रियारूपभावभाषाया एव ग्रहणाच्छब्दार्थोपपत्तेरिति हेत्वभिधानाद्भाषापरिणामस्य तदुत्तरकालमप्यप्रत्यूहात् शब्दार्थवियोगादिति हेतुना तदा क्रियारूपभावभाषाया एव निषेधादित्याकलयामः ॥ १२ ॥ अथ भावभाषामाह—

**उवउत्ताणं भासा,णायव्वा एत्थ भावभासत्ति॥उवओगो खलु भावो,णुवओगो दव्वमिति कट्टु।१३।**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अत्र भाषानिक्षेपप्रक्रमे, उपयुक्तानामिदमित्थं मया भाषितव्यमित्थमेव भाष्यमाणं श्रोतृपरिज्ञानाय भविष्यतीत्यादि सम्यगुपयोगशालिनां, भाषा भावभाषेति ज्ञातव्या, कुत इत्याह, खल्विति निश्चये, उपयोगो भावो, अनुपयोगश्च द्रव्यमिति कृत्वा, तदिदमभिप्रेत्योक्तं वाक्यशुद्धिचूर्णो ॥ "भावभासा णाम जेणाहिप्पाएण भासा भवइ सा भावभासा, कहं, ? जो भासिउमिच्छइ सो पुव्वमेव अत्ताणं पत्तियावेइ, जहा इमं मए वत्तव्वंति, भासमाणो परं पत्तियावेइ, एयं भासाए पओअणं जं परमप्पाणं च अत्थे अवबोधयति त्ति" ( भावभाषा नाम येनाभिप्रायेण भाषा भवति सा भावभाषा, कथं ? यो भाषितुमिच्छति स पूर्वमेव आत्मानं प्रत्याययति, यथेदं मया वक्तव्यमिति। भाषमाणः परं प्रत्याययति। एतद्भाषायाः प्रयोजनं यत्परमात्मानं चार्थानवबोधयतीति) अथाग्न्युपयोगस्य भावाग्नित्ववद्भाषोपयोगस्य भावभाषात्वमुच्यतां न तूपयोगविषये वचन इति चेत्, न, भाव एव भाषेति भङ्ग्योक्तार्थानुपपत्तावपि भावेन भाषेति भङ्ग्या प्रकृतोपपत्तेः परिभाषकेच्छायाश्चातिप्रसङ्गभञ्जकत्वादिति दिग् ॥ १३ ॥

(सौगतः) ननु भाषा न निर्णायिका तादात्म्यतदुत्पत्तिविरहेण शब्दार्थयोरसम्बन्धात्प्रतिनियतावबोधानुपपत्तेः, नचैवं शब्दानामेवानुत्पत्तिप्रसङ्गोऽर्थबोधकत्वं प्रतिसन्धायैव तदुच्चारादिति वाच्यम्, विकल्पेभ्य एव तदुत्पत्तेस्तेषामपि च विकल्पजननेनैव चरितार्थत्वात्। उक्तं च ॥ " विकल्पयोनयः शब्दा, विकल्पाः शब्दयोनयः ॥ कार्यकारणता तेषां, नार्थं शब्दाः स्पृशन्त्यपि ॥ १ ॥ " इति। एवं च न गामानयेत्यतः प्रवृत्त्यनुपपत्तिरपि, न चैवमनुमानोच्छेदः, तत्रानुभवसिद्धप्रमाविशेषकारणस्य व्याप्त्यादेरबाधादत्र तु सङ्गतिबाधस्योक्तत्वादित्यत आह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ओहारिणी य एसा, सुआउ णायं इमंति ववहारा। संभावणा य निण्णय-हेतुअसज्झत्ति दट्ठव्वं ।१४।

एषा च भाषा, अवधारिणी निश्चायिका पदपदार्थयोः सङ्केतरूपसम्बन्धव्यवस्थापनेन हेत्वनुपपत्तिनिरासात्, न चानाकाङ्क्षादिपदेष्वप्रत्यायकत्वदर्शनादन्यत्रापि प्रमाणत्वसंशयः, प्रत्यक्षेऽपि तदनुद्धारात्, न च शास्त्रोक्तार्थानां विसंवाददर्शनात्तदऽप्रामाण्यम्, तद्विसंवादस्यैवासिद्धेः, क्वचिद्विहितकर्मणः फलाभावस्याङ्गवैकल्याद्यधीनत्वादिति दिग्॥ (वैशेषिकः) अथास्तु शब्दप्रामाण्यं तथापि न स्वतन्त्रतया किन्त्वनुमानविधया, न च शब्दस्यार्थाऽव्याप्यत्वात्कथं ततस्तदनुमानमिति वाच्यम्, एते पदार्थाः, मिथः संसर्गवन्तः, आकांक्षादिमत्पदस्मारितत्वादित्यादिदिशाऽनुमानादितिचेत्, अत्राह-श्रुतात् ज्ञातमेतदिति व्यवहारात्, यथा हि अनुमिनोमीति धिया प्रमाविशेषसिद्धेः प्रमाणान्तरसिद्धिस्तथा शब्दात्प्रत्येमीति धिया प्रमाविशेषसिद्धेः, तत्रापि प्रमाणान्तरसिद्धिरप्रत्यूहैव, व्याप्त्यादिज्ञानं विनापि शब्दादाहत्यार्थप्रतीतेश्च न तस्यानुमानत्वमिति दिग्। लोकायतिकस्त्वाह अनुमानमपि न प्रमाणं कुतस्तरां शब्दो धूमादिदर्शनानन्तरमग्न्यादिव्यवहारस्यापि सम्भावनयैवोपपत्तेरिति, तत्राह, सम्भावना च निर्णयहेत्वसाध्येतिद्रष्टव्यम्। सम्भावना हि संशयरूपैव सा च न परामर्शादिनिश्चयहेतुसाध्या निश्चयसामग्र्यां सत्यां संशयानुत्पादात्, अन्यथा वक्रकोटरादिज्ञाने सत्यपि स्थाणौ पुरुषत्वसंशयोत्पादप्रसङ्गात्। अथ 'भावांशे उत्कटकोटिकसंशय एव सम्भावना', 'उत्कटत्वं च निष्कम्पप्रवृत्तिप्रयोजको धर्मविशेषः' तत्प्रयोजकतया च धूमदर्शनाद्यादरो, न च धूमादेरग्न्यादिसम्भावनाहेतुत्वे गौरवम्, तदभावाप्रकारकत्वघटितनिश्चयत्वापेक्षया तदभावप्रकारकत्वघटितसंशयत्वस्य

भावभाषा-प्रसङ्गेन वैशेषिक-चार्वाकमत-निरासः। सिद्धान्त-संवादश्च॥

For Private and Personal Use Only

लघुत्वादितिचेत्, न, संशयव्यावृत्तानुमितित्वस्यैव व्याप्तिज्ञानादिजन्यतावच्छेदकत्वात्। सम्भावनायास्तज्जन्यत्वे तद्घटितनिश्चयसामग्रीप्रतिबध्यतावच्छेदककोटावनुत्कटकोटिकत्वादिप्रवेशे गौरवादिदमित्थमेवेत्यवधारणस्य न सन्देहि किन्तु निश्चिनोमीत्याद्यनुव्यवसायस्य चानुपपत्तेरित्यन्यत्र विस्तरः। तदिदमभिप्रेत्योक्तं भगवता श्यामाचार्येण "से नूणं भंते मण्णामीति ओहारिणी भासा, चिंतेमीति ओहारिणी भासा, अह मण्णामीति ओहारिणी भासा, अह चिंतेमीति ओहारिणी भासा, तह मण्णामीति ओहारिणी भासा, तह चिंतेमीति ओहारिणी भासा ? हंता गोयमा ! मण्णामीति ओहारिणी भासा, चिंतेमीति ओहारिणी भासा, अह मण्णामीति ओहारिणी भासा, अह चिंतेमीति ओहारिणी भासा, तह मण्णामीति ओहारिणी भासा, तह चिंतेमीति ओहारिणी भासत्ति" ( अथ नूनं भदन्त मन्ये इत्यवधारणीभाषा, चिन्तयामीत्यवधारणीभाषा, यथामन्ये इत्यवधारणीभाषा, यथाचिन्तयामीत्यवधारणीभाषा, तथामन्ये इत्यवधारणीभाषा, तथाचिन्तयामीत्यवधारणीभाषा ! हन्त गौतम मन्ये०) ॥ १४ ॥

उक्ताया एव भावभाषाया भेदानाह—

**भावे वि होइ तिविहा, दव्वे अ सुए तहा चरित्ते य। दव्वे चउहा सच्चाऽ-सच्चा मीसा अणुभया य।१५।**

भावेऽपि भावनिक्षेपेऽपि, भवति त्रिविधा त्रिप्रकारा भाषा, द्रव्ये च श्रुते तथा चरित्रे च, द्रव्यं प्रतीत्य भावभाषा, श्रुतं प्रतीत्य, चारित्रं प्रतीत्य च सेत्यर्थः। द्रव्ये चतुर्द्धा सत्याऽसत्या मिश्राऽनुभया च एतासां लक्षणं यथावसरं वक्ष्यामः ॥ १५ ॥ एता एव द्वाभ्यां भेदाभ्यां सङ्गृह्णाति—

भावभाषाया द्रव्यश्रुतचारित्रभेदेन त्रैविध्यं। द्रव्यभाषायाश्चातुर्विध्यं च सत्यादि भेदतः प्ररूपणम् ॥

निश्चय-व्यवहार-नयभेदेन भाषाभेद-विभागः॥

**पढमा दो पज्जत्ता, उवरिल्लाओ अ दो अपज्जत्ता। अवहारेउं सक्कइ, पज्जत्तण्णा य विवरीआ ॥ १६ ॥**

प्रथमे द्वे सत्यासत्ये भाषे, पर्याप्ते, उपरितने द्वे सत्यामृषाऽसत्यामृषे, अपर्याप्ते, तत्रावधारयितुं शक्यते या सा पर्याप्ता, च पुनः विपरीता चावधारयितुमशक्या चान्याऽपर्याप्ता। तदुक्तं वाक्यशुद्धि-चूर्णौ ॥ "पज्जत्तिगा णाम जा अवहारेतुं सक्कइ जहा सच्चा मोसा वा, एसा पज्जत्तिगा। जा पुण सच्चा वि मोसा वि दुपक्खगा वि सा न सक्कइ विभाविउं जहा एसा सच्चा वा मोसा वा सा अपज्जत्तिगत्ति" ( पर्याप्तिका नाम याऽवधारयितुं शक्यते यथा सत्या वा मृषा वा एषा पर्याप्तिका॥ या पुनः सत्यापि मृषापि द्विपक्षगापि सा न शक्यते विभावयितुं यथा एषा सत्या वा मृषा वा सा अपर्याप्तिका ) अवधारणीयत्वं च 'सत्याऽसत्यान्यतरत्वप्रकारकप्रमा-विषयत्वम्', अनवधारणीयत्वं च तदभावस्तेन न तदन्यतरभ्रमविषयत्वेनापर्याप्तायाः पर्याप्तत्वं, न वा तत्संशय-विषयत्वेन पर्याप्ताया अपर्याप्तत्वमित्याद्यूह्यम्, अन्यतरव्यवहार एवावधारणमित्यपरे ॥ १६ ॥

अथ प्रागुक्तमेव भाषाविभागं निश्चयव्यवहाराभ्यां विवेचयति—

**भासा चउव्विहत्ति य, ववहारणया सुअम्मि पन्नाणं।**
**सच्चा मुसत्ति भासा, दुविहच्चिय हंदि णिच्छयओ ॥ १७ ॥**

**भाषा चतुर्विधेति च व्यवहारनयात् श्रुते प्रज्ञानम्** ॥ इह खलु विप्रतिपत्तौ वस्तुप्रतितिष्ठासया यथाश्रुतं यदुच्यतेऽस्ति जीवः सदसद्रूप इति तदेव सत्यं परिभाष्यते आराधकत्वात्, यत्तु तदा श्रुतोत्तीर्णमुच्यतेऽ(ना)स्ति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीव एकांतनित्य(त्योवा) इत्यादि **तदसत्यं** विराधकत्वात्, यच्च धवादिवृक्षसमूहेऽप्यशोकबाहुल्यादशोकवनमेवेद-मित्युच्यते **तन्मिश्रम्**, यच्च वस्तुमात्रपर्यालोचनपरं हे देवदत्त! घटमानयेत्यादि **तदनुभयत्वस्वभावमिति**। अत्र च परिभाषैव शरणं, परिभाषा च व्यवहार एवेति द्रष्टव्यम्। हन्दीत्युपदर्शने, **निश्चयतो द्विविधैव भाषा सत्या, मृषेति**, सत्यामृषाभाषायास्तात्पर्यबाधेनासत्यायामेवान्तर्भावात्, अबाधिततात्पर्यस्यैव शब्दस्य सत्यत्वादन्यथा द्रव्यं रूपवदित्यस्य देशकात्स्र्न्यतात्पर्यभेदेन प्रामाण्याप्रामाण्यद्वैविध्यानुपपत्तेरित्यन्यत्र विस्तरः। अत्र च वने वृक्षसमूहरूपेऽशोकाभेदतात्पर्यबाधेन मृषात्वस्य स्पष्टत्वात्॥ **उक्तं च पञ्चसङ्ग्रहटीकायां**॥ "व्यवहारनयमतापेक्षया चैवमुच्यते परमार्थतः पुनरिदमसत्यमेव यथाविकल्पितार्थायोगादिति"। न च समूहदेश एवाशोकाभेदान्वयान्न बाधः, तथा समभिव्याहारे देशान्वयस्याव्युत्पन्नत्वात्। यदा त्वशोकप्रधानं वनमिति विवक्षया प्रयोगस्तदा **श्रमणसङ्घ** इत्यादिवद् व्यवहारसत्यतापि न विरुद्ध्यत इत्याभाति॥ असत्यामृषापि विप्रलिप्सादिपूर्विकाऽसत्य एव, अन्या च सत्य एवान्तर्भवति॥ **तदुक्तं पञ्चसङ्ग्रहटीकायामेव**। इदमपि व्यवहारनयमतापेक्षया द्रष्टव्य-मन्यथा विप्रतारणादिबुद्धिपूर्वकमसत्येऽन्तर्भवति, अन्यस्तु सत्य इति॥ १७॥ उक्तार्थे **सूत्रोपष्टम्भमाह**—

**एत्तो चिय आणमणी, जाईए केवला य णिद्दिट्ठा। पण्णवणी पण्णवणा-सुत्ते तत्तत्थदंसीहिं॥ १८॥**

यतो निश्चयनयेन चरमभाषाद्वयं पूर्वभाषाद्वयेऽन्तर्भावितम्। **इत एवाज्ञापनी** असत्यामृषाभेदान्तःपरिगणि-तापि, **जात्या** सामान्यपुरस्कारेण, **केवला** तद्विनिर्मुक्ता च, **प्रज्ञापनासूत्रे तत्त्वार्थदर्शिभिः** श्यामाचार्यैः,

आज्ञाप-न्याद्याला-पकेन व्यव-हारनय-सम्मतभेद-स्यापि प्रा-माणिकत्व-प्ररूपणम्॥



For Private and Personal Use Only

आराधकत्वविराधकत्वविभागतोऽपि भाषाभेदानां प्रामाणिकत्वविचारः ॥

**प्रज्ञापनी निर्दिष्टा**, तथाहि " अह भंते ? जातीति इत्थिआणमणी, जातीति पुमआणमणी, जातीति णपुंसगआणमणी, पण्णवणी णं एसा भासा ण एसा भासा मोसा ? हंता गोयमा ! जातीति इत्थिआणमणी, जातीति पुमआणमणी, जातीति णपुंसगआणमणी, पण्णवणी णं एसा भासा ण एसा भासा मोसत्ति ॥ अह भंते ? जा य इत्थिआणमणी जा य पुमआणमणी जा य णपुंसग आणमणी, पण्णवणी णं एसा भासा ण एसा भासा मोसा ? हंता गोयमा ! जा य इत्थि आणमणी जा य पुमआणमणी जा य णपुंसग आणमणी पण्णवणी णं एसा भासा ण एसा भासा मोसत्ति " ( अथ भदन्त ! जातिरिति स्त्र्याज्ञापनी जातिरिति पुमाज्ञापनी जातिरिति नपुंसकाज्ञापनी प्रज्ञापन्येषा भाषा नैषा भाषा मृषा ? हन्त गौतम ! जाति० ॥ अथ भदन्त या च स्त्र्याज्ञापनी या च पुमाज्ञापनी या च नपुंसकाज्ञापनी प्रज्ञापन्येषा भाषा नैषा भाषा मृषा ? हन्त गौतम ! या च० ) अत्र च यद्यपि केवलसूत्रमाज्ञाप्येन कार्याकरणे मृषात्वाशङ्कया प्रश्नकरणात् विनीतविषयत्वान्न मृषात्वमन्यथा त्वविनीताज्ञापनस्य स्वपरपीडानिबन्धनत्वात् पारिभाषिकं मृषात्वमेव ॥ **तदुक्तम्** ॥ " अविणीयमाणवंतो, किलिस्सई भासई मुसं चेव ॥ घंटालोहं नाउं, को कडककरणे पवत्तिज्जा ॥ १ ॥ " ( अविनीतमाज्ञापयन् क्लिश्नाति भाषते मृषामेव ॥ घंटालोहं ज्ञात्वा कः कटकरणे प्रवर्तेत ) ॥ इत्यभिप्रायेण प्रतिवचनौचित्याच्च समर्थितं जातिसूत्रमप्येवमेव, नवरं सर्वत्राज्ञापनयोग्यत्वासम्भवेपि सम्भवाभिप्रायग्रहणान्नासम्भव इति, तथापि सत्यासत्यान्यतरत्वेऽविवाद एवान्यथाऽसत्यामृषात्वेनैव सत्यत्वव्यतिरेकनिश्चयात्प्रश्ननिबन्धनसत्यत्वसन्देहस्यैवानुपपत्तेः। इदमुपलक्षणं प्रज्ञापन्या अपि " जा य इत्थिपण्णवणी " ( या च

स्त्रीप्रज्ञापनी ) इत्यादिप्रबन्धेन सत्यत्वाभिधानाच्छाब्दव्यवहारानुगतं स्त्र्यादिलक्षणमादाय तस्या असत्यत्वेऽपि वेदानुगतं तदादाय सत्यत्वस्य युक्तत्वाच्च प्रागुक्तमेव युक्तमित्यपि द्रष्टव्यम् ॥ १८ ॥ अथाराधकत्वविराधकत्वदेशाराधकविराधकत्वानाराधकविराधकत्वोपाधिभिश्चतुर्द्धैव विभागो युक्तो ? न तु द्विधेत्यत आह––

**आराहणं पडुच्च वि, परिभासा चेव चउविहविभागे ॥ सचंतब्भावे च्चिय, चउण्ह आराहगत्तं जं ॥१९॥**

**आराधनां प्रतीत्यापि चतुर्विधविभागे परिभाषैव ॥** निश्चयतस्त्वाराधकत्वानाराधकत्वाभ्यां च द्विविधैव भाषा, वस्तुतो भाषानिमित्तयोः शुभाशुभसङ्कल्पयोरेवाराधकत्वं विराधकत्वं वा न तु भाषायाः । अथ मन्दकुमारादीनां करणाऽपटिष्ठतादिनाऽहमेतद्भाषे इत्यादिज्ञानशून्यानां या भाषा तन्निबन्धनाशुभसङ्कल्पाभावात्कथं तत्र विकल्पेन भाषोपक्षय इति चेत्, न, अनायुक्तपरिणामस्यैव कर्मबन्धनहेतुत्वेन विराधकत्वात्तेन तदुपक्षयात् ॥ समर्थितं चेदं " निच्छयओ सकयं चिय ॥ ४८ ॥ " ( निश्चयतः स्वकृतमेव ) इत्यादिना महता प्रबन्धेन स्वोपज्ञाध्यात्ममतपरीक्षायामिति नेह प्रतन्यते। अत्रैव हेतुमाह **सत्यान्तर्भाव एव यद्** यस्मात्कारणात्, **चतसृणां** भाषाणामाराधकत्वम् । अयं भावः " इच्चेयाइं भंते चत्तारि भासज्जायाइं भासमाणे किं आराहए, विराहए ? गोयमा ! इच्चेयाइं चत्तारि भासज्जाताइं आउत्तं भासमाणे आराहए णो विराहएत्ति" (इत्येतानि चत्वारि भाषाजातानि भाषमाणः किमाराधकः विराधकः ? गौतम ! इत्येतानि चत्वारि भाषाजातानि आयुक्तं भाषमाणः आराधकः नो विराधकः ) प्रज्ञापनासूत्रे सर्वा अपि भाषा आयुक्तं भाषमाणस्याराधकत्वोपदेशात्क्रियाद्वयस्य

आराधकत्वविराधकत्वविषये संवादपाठः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समानकालीनत्वलाभादौत्सर्गिकहेतुमद्भावसिद्धिः । अत्र चाऽऽयुक्तमिति पदं सम्यक् प्रवचनमालिन्यादिरक्षणपरतयेत्यर्थकम् । तथाचाऽऽयुक्तं भाष्यमाणाः सर्वा अपि भाषाः सत्या एवेति पर्यवसितम् । अत एव (दश० अ० ७) "दो न भासिज्ज सव्वसो ॥१॥" (द्वे न भाषेत सर्वशः) इत्यस्यापि न विरोधोऽपवादतस्तद्भाषणेऽप्युत्सर्गानपायात्, द्वे इत्यत्रैव धर्मोविरोधित्वं विशेषणमित्यन्ये । एवमनायुक्तं भाष्यमाणानां सर्वासामपि विराधकत्वेन मृषात्वमेव । तदुक्तं ॥ "तेण परं असंजयअविरयअप्पडिहयअपच्चक्खायपावकम्मे सच्चं भासं भासंतो मोसं वा सच्चामोसं वा असच्चामोसं वा भासमाणो णो आराहए विराहएत्ति ॥" (ततः परोऽसंयताविरताप्रतिहताप्रत्याख्यातपापकर्मा सत्यां भाषां भाषमाणो मृषां वा सत्यामृषां वा असत्यामृषां वा भाषमाणो नोआराधकः विराधकः इति) इत्थं चाराधकत्वानाराधकत्वाभ्यामपि सत्यासत्ये द्वे एव भाषे निश्चयतः पर्यवसन्ने इति ॥ १९ ॥ नन्वेवं चातुर्विध्यं कल्पितमेवेत्याशङ्कायामाह—

**एवं चउव्विहत्तं, पकप्पियं होज्ज जइ मई एसा । सा ण जओ ववहारा-णुगयं वत्थुं पि सुयसिद्धं ।२०।**

एवं निश्चयनयस्य पारमार्थिकत्वे, चतुर्विधत्वं चतुष्प्रकारत्वं, प्रकल्पितं तुच्छं वासनामात्रसमुत्थप्ररूपणत्वात्, यदि एषा मतिर्भवेत् सा न यतो व्यवहारानुगतमपि वस्तु श्रुतसिद्धं' तथा हि खट्वाघटकुड्यादिषु स्त्रीत्वपुंस्त्वक्लीबत्वानि न प्रसिद्धानीति न तुच्छानि लिंगानुशासननियन्त्रितसङ्केतविशेषविषयशब्दाभिधेयत्वरूपस्त्रीत्वादीनामपि वास्तवत्वात्, रुयादिपदानां नानार्थकत्वात् । न च पारिभाषिकं स्त्रीत्वादि शब्दनिष्ठमेवेति वाच्यं, स्त्रीत्वादियोगिनि वस्तुन्येवेयमित्यादिव्यवहारात् ॥ तदिदमुक्तं शाकटसूनुनापि ॥ " इयमयमिदमिति

व्यवहार-नयसम्मत-भेदानां कल्पित-त्वारेका-निरासः ॥

For Private and Personal Use Only

सत्यभाषाया लक्षणप्ररूपणपूर्वकं आराधनीत्वं दशभेदोद्देशश्च ॥

शब्दव्यवस्थाहेतुरभिधेयधर्म उपदेशगम्यः स्त्रीपुंनपुंसकत्वानीति " ॥ एतदभिप्रायेण सूत्रमप्येवं व्यवस्थितम् ॥ " अह भंते जा य इत्थिवऊ जा य पुमवऊ जा य णपुंसगवऊ पण्णवणी णं एसा भासा, ण एसा भासा मोसा ? गोयमा ! जा य इत्थिवऊ जा य पुमवऊ जा य णपुंसगवऊ पण्णवणी णं एसा भासा ण एसा भासा मोसत्ति " ( अथ भदन्त या च स्त्रीवाक् या च पुंवाक् या च नपुंसकवाक् प्रज्ञापनी एषा भाषा नैषा भाषा मृषा ? गौतम ! या च स्त्रीवाक्० ) एवं भाषाचातुर्विध्यमपि व्यवहारानुगतं श्रुतमूलकतया नावास्तवमिति भावः । अथ निश्चयव्यवहारयोरेकमवश्यमप्रमाणमेवान्यथा वस्तुनस्तदभिमतद्वैरूप्यानुपपत्तेरिति चेत्, न, वस्तुनोऽनन्तधर्मात्मकत्वस्य प्रामाणिकत्वात्, अन्यथैकस्यैव पितृपुत्रादिव्यवस्थानुपपत्तेस्तत्तद्धर्मगौणमुख्यत्वोपपत्त्यर्थमेव नयभेदानुसरणादित्यन्यत्र विस्तरः ॥ २० ॥ तदेवं समर्थितं नयभेदेन भाषाया द्वैविध्यं चातुर्विध्यं च । अथ सौत्रविभागमनुसृत्योद्देशक्रमप्रामाण्यात्, सत्याया एव लक्षणाभिधानपूर्वकं विभागमाह—

**तम्मी तव्वयणं खलु, सच्चा अवहारणिक्कभावेणं ॥ आराहणी य एसा, सुअंमि परिभासिया दसहा ॥**
**[1]जणवय[2]संमय[3]ठवणा-[4]णामे [5]रूवे [6]पडुच्चसच्चे य ॥ [7]ववहार[8]भाव[9]जोए, दसमे [10]ओवम्मसच्चे य ॥ २२ ॥**

खल्विति निश्चये, अवधारणैकभावेन तस्मिंस्तद्वचनं सत्या, अवधारणैकभावेनेत्यसत्यामृषाव्यवच्छेदार्थं, तस्या आमन्त्रणाद्यभिप्रायेणैव प्रयोगात्, अवधारणस्य च वस्तुप्रतितिष्ठासायामेवैवकाराद्यध्याहारात्संसर्गमहिम्ना वा लाभात्तस्मिंस्तद्वचनं च 'तद्धर्मवति तद्धर्मप्रकारकशाब्दबोधजनकः शब्दः,' अनन्तधर्मात्मके वस्तुन्येक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्माभिधानं च न सत्यम्, अवधारणबाधादित्याद्यूह्यम् । एषा च श्रुते आराधनी परिभाषिता, परिभाषितत्वानुधावनं च पारिभाषिकाराधकत्वेन लक्षणत्वोपदर्शनार्थम्, अन्यथा विहितत्वेनाराधकत्वस्यासम्भवात्, विहितत्वं हि "विधिबोधितकर्त्तव्यताकत्वं" तच्च सत्यभाषाघटितमित्यन्योन्याश्रयात् सम्यगुपयोगपूर्वकत्वेन प्रातिस्विकरूपेण वाऽऽराधकशब्दत्वस्य वा सत्याद्यतिव्याप्तेरिति दिग् ॥ सा च दशधा जनपदसत्या[1], सम्मतसत्या[2], स्थापनासत्या[3], नामसत्या[4], रूपसत्या[5], प्रतीत्यसत्या[6], व्यवहारसत्या[7], भावसत्या[8], योगसत्या[9], औपम्यसत्या[10] चेति ॥ २२ ॥ तत्र पूर्वं जनपदसत्याया एव लक्षणमाह—

१ जनपदसत्याभाषायाः स्वरूपनिरूपणम् ॥

**जा जणवयसंकेया, अत्थं लोगस्स पत्तियावेई ॥ एसा जणवयसच्चा, पण्णत्ता धीरपुरिसेहिं १ ॥२३॥**

या जनपदसङ्केताल्लोकस्यार्थं प्रत्याययति, सैषा भाषा धीरपुरुषैस्तीर्थकरगणधरैः, जनपदसत्या प्रज्ञप्ता ॥ तथा च "जनपदसङ्केतमात्रप्रयुक्तार्थप्रत्यायकत्वम्" एतल्लक्षणम् । मात्रपदमनादिसिद्धसङ्केतव्यवच्छेदार्थम्, अस्ति चात्रेदं लक्षणं कोङ्कणादिसङ्केतज्ञानादेव पिच्चादिपदात्पयःप्रभृतिप्रतीतेः । स्यान्मतम्, अपभ्रंशे शक्त्यभावादबोधकत्वं, यदि च ततोपि बोधस्तदा शक्तिभ्रमादेवेति, मैवम्, ईश्वरासिद्धौ तत्तत्पदबोद्धव्यत्वप्रकारित्वावच्छिन्नेश्वरेच्छारूपशक्तेरप्यसिद्धेः, सङ्केतज्ञानत्वेनैव शाब्दबोधहेतुत्वात् । संस्कृतसङ्केतस्यैव सत्यत्वं नापभ्रंशसङ्केतस्येत्यर्थस्य विनिगन्तुमशक्यत्वाच्चेत्यन्यत्र विस्तरः ॥ न चेयं तत्तद्देश एव सत्या न तु शास्त्रेपि शक्तशब्दान्तरमध्यपतितापीति वाच्यम्, अविप्रतिपत्त्याऽदुष्टविवक्षाहेतुत्वेनान्यत्रापि तस्याः सत्यत्वात्, अन्यथा देशीयशब्देन

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुत्राप्यन्वयानुपपत्तिप्रसङ्गात् ॥ २३ ॥ उक्ता जनपदसत्या १ ॥ अथ सम्मतसत्यां निरूपयति—

णाइक्कमित्तु रूढिं, जा जोगत्थेण णिच्छयं कुणइ ॥ सम्मयसच्चा एसा, पंकयभासा जहा पउमे २ ॥२४॥

या रूढिमतिक्रम्य योगार्थेन व्युत्पत्त्यर्थसम्भवमात्रेण, न निश्चयं करोति एषा सम्मतसत्या यथा पद्मे पङ्कजभाषा, इयं हि शैवालादीनामपि समाने पङ्कसम्भवत्वेऽरविन्द एव प्रवर्त्तते, न तु शैवालादाविति सम्मतसत्या ॥ एवं च "समुदायशक्तिप्रतिसन्धानवैकल्यप्रयुक्ताबोधकत्ववत्पदघटिता भाषा" सम्मतसत्येति फलितम् ॥ अथैवं जनपदसत्यातिव्याप्तिः, न चावयवशक्त्यतिप्रसङ्गभञ्जकत्वेन समुदायशक्तेरुपादानान्न दोषः, व्युत्पत्तिविरहितरूढशब्दाव्याप्तेरिति चेत्, न, शक्तिर्हि न सङ्केतमात्रं किन्त्वनादिः शास्त्रीयोऽबाधितः सङ्केतोऽन्यथा लक्षणाद्युच्छेदादित्यनतिप्रसङ्गादिति दिग् ॥ २४ ॥ उक्ता सम्मतसत्या २ ॥ अथ स्थापनासत्यामाह—

ठवणाए वट्टंती, अवगयभावत्थरहियसंकेया ॥ ठवणासच्चा भन्नइ, जह जिणपडिमाइ जिणसद्दो ३ ॥२५॥

स्थापनायां वर्त्तमाना स्थापनासत्या भण्यते, कीदृशी, अवगतः प्रमितो भावार्थरहितो योगार्थविनिर्मुक्तः सङ्केतो यस्याः सा, उदाहरणमाह यथा जिनप्रतिमायां जिनशब्द इति । अयम्भावः जिनशब्दो यथा भावजिने प्रवर्त्तते तथा स्थापनाजिनेऽपि निक्षेपप्रामाण्यात्, नानार्थानां च शब्दानां प्रकरणादिमहिम्नैव विशेषे नियमनमिति, "यत्र प्रकरणादिबलाद्बहुशो भावे प्रवर्त्तमानानामपि शब्दानां नियन्त्रितशक्तितया स्थापनाप्रतिपादकत्वप्रतिपत्तिस्तत्र स्थापनासत्यत्वमिति," एतेनाचेतनायां प्रतिमायामर्हदादिपदं प्रतिपादयतामजीवे जीवसंज्ञेति

२ सम्मतसत्याभाषायाः जिनप्रतिमादृष्टान्तेन ३ स्थापनासत्याभाषायाश्च स्वरूपनिरूपणम् ॥



For Private and Personal Use Only

वदतामपहृतं सर्वस्वम्, एवम्भाषणे स्थापनासत्यत्वप्रतिपादकसूत्रोन्मूलनेनार्हदादीनामाशातनयाऽनन्तसंसारित्वप्रसङ्गादित्यन्यत्र विस्तरः ॥ सद्भावस्थापनायां च शक्तिः 'व्यक्त्याकृतिजातयः पदार्थ' इति वदतां गौतमीयादीनामप्यभिमता, न च गवादिपदानां लाघवाद्गोत्वादिविशिष्ट एव शक्तिः, आकृत्यादौ तु लक्षणैव, सूत्रं त्वन्याभिप्रायकमिति वाच्यम्, आनुशासनिके गुरावप्यर्थे शक्त्यङ्गीकारान्निक्षेपानुशासनस्य च स्थापनायामपि सत्त्वात्, असति बाधके तत्रापि शक्तेरिति दिग् । अस्तु वा तत्र निरूढलक्षणा तथापि सङ्केतपदेन तदाश्रयणान्न दोष इति दिग् ॥ अथ सम्मतसत्यालक्षणाक्रान्तैवेयमितिचेत्, न, उपधेयसाङ्कर्येप्युपाध्योरसाङ्कर्यात् ३ ॥ २५ ॥

उक्ता स्थापनासत्या ३ ॥ अथ नामसत्यामाह—

**भावत्थविहूणच्चिय,णामाभिप्पायलद्धपसरा जा। सा होइ णामसच्चा,जह धणरहिओवि धणवंतो॥४।२६**

**भावार्थविहीना एव या भाषा, नामाभिप्रायलब्धप्रसरा** 'नामसङ्केतमात्रादेव योगार्थबाधमवगणय्य स्वप्रतिपाद्यं प्रतिपादयतीति यावत्', **सा भवति नामसत्या यथा धनरहितोपि** नाम्ना **धनवानिति**। हन्त! यदीयं सत्या कथं तर्हि तत उपहास इतिचेत्, मध्यस्थानां न कथञ्चित्, अन्येषां तु नवकम्बलोऽयमित्यादाविवाभिप्रायान्तरावलम्बनेन वाक्छलादिति गृहाण, विचित्रो हि महामोहशैलूषस्य नर्त्तनप्रकार इति । यत्तु नाम यथार्थं तत्र न नामसत्यैव किंतु परिणामसत्यत्वम्, एवम्भूताभिप्रायेण क्रियाविरहकाले त्वतथात्वमपीत्याद्यूह्यम् ४ ॥ २६ ॥

उक्ता नामसत्या ४ ॥ अथ रूपसत्यामाह—

३

सत्याभाषाभेदविचारे ३ स्थापनासत्या ४ नामसत्ययोः सनिदर्शनं लक्षणस्वरूपवर्णनम् ॥

**एमेव रूवसच्चा, णवरं णामंमि रूवअभिलावो ॥ ठवणा पुण ण पवट्टइ, तज्जातीए सदोसे अ ५ ॥२७॥**

एवमेव नामसत्यावदेव, रूपसत्या ज्ञेया, नवरं केवलं, नाम्नि नामस्थले, रूपाभिलापः रूपशब्द-प्रयोगः कर्त्तव्यः, तथाच 'भावार्थबाधप्रतिसन्धानसध्रीचीनतद्रूपवद्गृहीतोपचारकपदघटितभाषात्वं' तल्लक्षणम् । अस्ति च प्रकटप्रतिषेविणि अयं यतिरिति यतिपदस्य तद्रूपवत्युपचारः श्रामण्यव्याप्यसदालयविहारादिप्रतिसन्धा-नबलान्मुख्यार्थाबाधदशायां तादृशे तत्पदप्रयोगे तु परमार्थतोऽसत्यभाषाप्रवृत्तावप्यसंक्लेशपरिणामेन न कर्मबन्धः प्रत्युत विधिविशुद्धपरिणामान्महानिर्जरैवेति ध्येयम् । नन्वत्र स्थापनासत्यमेवास्तु भावयतित्वबाधे स्थापनायति-त्वाश्रयणस्यैव युक्तत्वादित्यत आह–**स्थापना पुनर्न प्रवर्त्तते तज्जातीये सदोषे च**, स्थापना हि तज्जातीयभिन्ने दोषरहिते च प्रवर्त्तते न त्वन्यत्र तत्र तथाविधाभिप्रायाभावात् ॥ **तदिदमुक्तम्**, (आव० नि०) ॥ "उभयमवि अत्थि लिंगे, ण य पडिमासूभयं अत्थित्ति ॥११३५॥" (उभयमप्यस्ति [सावद्यत्वं निरवद्यत्वं च] लिङ्गे, न च प्रतिमासू-भयमस्ति इति) ॥ यथा चैतत्तत्त्वं तथा प्रपञ्चितमध्यात्ममतपरीक्षायाम् । एवञ्च, 'अतद्द्रव्ये तदाकारः स्थापना,' 'कूटद्रव्यं च रूपमिति' प्रतिविशेषो ज्ञेयः ५ ॥२७॥ उक्ता रूपसत्या ५ ॥ अथ प्रतीत्यसत्यामाह—

**अविरोहेण विलक्खण–पडुचभावाण दंसिणी भासा ॥ भन्नइ पडुचसच्चा, जह एगं अणु महंतं च ६ ॥२८॥**

**अविरोधेन** निमित्तभेदोपदर्शनाद्विरोधपरिहारेण, **विलक्षणानां** निमित्तभेदमन्तरेणैकप्रतिसन्धानाऽगोच-राणां, **प्रतीत्यभावानां** सप्रतियोगिकपदार्थानां, **दर्शिनी भाषा यथा एकं** फलादि, फलान्तराद्यपेक्षयाऽणु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महच्चेति, एवमनामिका कनिष्ठापेक्षया दीर्घा मध्यमापेक्षया ह्रस्वा चेत्याद्यप्यूह्यम् । निमित्तान्तरोपदर्शने तु मृषैवेयम् ६ ॥ २८ ॥ नन्वेकस्यैव कथमणुत्वमहत्त्वादिनानापरिणामसमावेशो विरोधात्, नचैकज्ञानज्ञेयत्वान्न विरोधः, तज्ज्ञानाप्रमात्वस्यैवापाद्यत्वादित्याशङ्कायामाह— [ ॥ २९ ॥

**भिण्णणिमित्तत्तणओ, ण य तेसि हंदि भण्णइ विरोहो। वंजयघडयाईयं, होइ णिमित्तं पि इह चित्तं**

**नच तेषां** विलक्षणप्रतीत्यभावानां, **हंदी**त्युपदर्शने, **भण्यते विरोधः**, कुतः ?, **भिन्ननिमित्तकत्वात्**, एवं चाणुत्वमहत्त्वादयो न विरुद्धाः, भिन्ननिमित्तकत्वात्, सत्त्वासत्त्ववदिति प्रयोगो द्रष्टव्यः । ननु सत्त्वासत्त्वयोरिव चाणुत्वमहत्त्वयोर्नैकरूपं भिन्ननिमित्तकत्वम्, अयमस्मादणुरितिवदयमस्मात्सन्नित्यव्यपदेशादिति वैषम्यमित्यत आह-**इह** प्रकृते, **निमित्तमपि व्यञ्जकघटकादिकं चित्रम्** अनेकप्रकारं भवति, तथा हि अणुत्वमहत्त्वादीनां व्यञ्जकप्रतियोग्यादिरूपनिमित्तभेदः सत्त्वासत्त्वादीनां च द्रव्यक्षेत्रकालभावरूपघटकस्वभावनिमित्तभेदः द्रव्यादीनां सत्त्वासत्त्वघटकत्वं च तदव्यतिरेकादतिरिक्तसत्त्वनिषेधादित्यन्यत्र विस्तरः । एकत्रैव महीरुहे मूलशाखाद्यवच्छिन्नसंयोगतदभावादीनामवच्छेदकरूपनिमित्तभेद इत्याद्यूहनीयम् । अणुत्वमहत्त्वादीनां विरोध एव न कल्प्यत इति किममुना प्रयासेनेति चेत्, हन्त, तर्हि कनिष्ठापेक्षयापि ह्रस्वत्वमनामिकायां किं न स्यादिति दिग् ॥ २९ ॥

नन्वणुत्वमहत्त्वादयो न भावाः, परापेक्षप्रतिभासविषयत्वात्, ये ये भावास्ते न परापेक्षप्रतिभासविषयाः, यथा रूपादयः, तथा च प्रतीत्यभाषाप्यसत्यैव तुच्छविषयत्वादिति चेत्, उच्यते ।

सत्याभाषा-भेदविचारे प्रतीत्यसत्यायां विरोधाशङ्का-परिहारनिरूपणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**ते होंति परावेक्खा, वंजयमुहदंसिणो त्ति ण य तुच्छा ॥ दिट्ठमिणं वेचित्तं, सरावकप्पूरगंधाणं ॥३०॥**

ते प्रतीत्यभावाः, व्यञ्जकमुखदर्शिनः प्रतिनियतव्यञ्जकव्यङ्ग्याः सन्तः, परापेक्षा इति, न च नैव, तुच्छाः, प्रतियोग्यनुस्मरणमत्र सप्रतियोगिकज्ञानसामग्रीसम्पादनार्थं न तु विकल्पशिल्पकल्पनार्थमिति भावः । अथ धर्मिज्ञानसामग्र्या एव धर्मज्ञानसामग्रीत्वात्कथमणुत्वमहत्त्वादिधर्मिज्ञाने तज्ज्ञानहेतुविलम्ब इत्यत आह–दृष्टं साक्षात्कृतम्, इदं वैचित्र्यं केचिद्भावाः सहकारिव्यङ्ग्यरूपाः केचिच्च न तथेति वैलक्षण्यं, शरावकर्पूरगन्धयोः कर्पूरगन्धो हि स्वरसत एव भासते, शरावगन्धस्तु जलसम्पर्कादिति, न च जलसम्पर्काच्छरावेऽभिनवगन्ध एवोत्पद्यते न तु प्रागुत्पन्न एव गन्धोऽभिव्यज्यत इति, पृथ्वीत्वेन पूर्वमपि तत्र गन्धावश्यकत्वात्, तन्नाशादिकल्पनायां मानाभावाद्, विलक्षणाग्निसंयोगादीनामेव पृथिवीगन्धनाशकत्वाच्चेतिदिग् । एवं द्वित्वादिकमप्यपेक्षाबुद्धिव्यङ्ग्यमेव न तु तज्जन्यं चैत्रीयापेक्षाबुद्धिजनितद्वित्वस्य मैत्रस्यापि प्रत्यक्षत्वप्रसङ्गात् । द्वित्वे च न चैत्रीयत्वमस्ति येन चैत्रीयद्वित्वे चैत्रीयापेक्षाबुद्धेश्चैत्रीयद्वित्वप्रत्यक्षे चैत्रीयद्वित्वस्य च हेतुत्वं स्यादित्यन्यत्र विस्तर इति किमतिप्रसङ्गेन ६ ॥ ३० ॥ उक्ता प्रतीत्यसत्या ६ ॥ अथ व्यवहारसत्यामाह ।

**ववहारो हु विवक्खा, लोगाणं जा पउज्जए तीए ॥ पिज्जइ णई य डज्झइ, गिरित्ति ववहारसच्चा सा ७ ॥३१**

व्यवहारो हि लोकानां विवक्षा 'वक्तुमिच्छा विवक्षा सा चाऽत्र नद्यादिपदं नदीगतनीरादिकं बोधयत्विति प्रयोक्त्रिच्छा' ततो नद्यादिपदान्नदीगतनीरादिप्रतिपत्तेः, नदीतन्नीरादीनामभेदप्रतिपत्तिरित्येके, 'नद्यादिपदं नद्यभिन्न-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वेन नदीगतनीरादिकं बोधयत्वित्याकारैव विवक्षा' इत्यपरे, तया विवक्षया, या भाषा प्रयुज्यते सा पीयते नदी, दह्यते गिरिरिति तत्र व्यवहारसत्या, अत्र पीयते नदीत्यस्य नदीगतं नीरं पीयत इति, दह्यते गिरिरित्यस्य च गिरिगतं तृणादिकं दह्यत इत्यर्थः। इदमुपलक्षणम्, गलति भाजनम्, अनुदरा कन्या, अलोमा एडकेत्यादीनां, भाजनगतं जलं गलति, सम्भोगजबीजप्रभवोदराभाववती कन्या, लवनयोग्यलोमाभाववत्येडकेत्याद्यर्थानामुदाहरणानाम्, न च गिरितृणादीनामभेदाभिधानान्मृषावादित्वप्रसङ्गः, व्यावहारिकाभेदाश्रयणेनादोषत्वात्, लोकविवक्षाग्रहणाच्च न रूपसत्याद्यतिव्याप्तिः, एवमामलक्यादौ एकेन्द्रियत्वेन नपुंसकत्वेऽपि स्त्र्याद्यभेदविवक्षया स्त्रीत्वादिप्रतिपादनमपि व्यवहारसत्यमेवेति द्रष्टव्यमिति दिग् ७ ॥ ३१ ॥ उक्ता व्यवहारसत्या ७॥ अथ भावसत्यामाह।

**सा होइ भावसच्चा, जा सदभिप्पायपुव्वमेवुत्ता। जह परमत्थो कुंभो, सिया बलाया य एसत्ति ८ ॥३२॥**

**सा भवति भावसत्या या सदभिप्रायपूर्वमेवोक्ता,** अभिप्रायस्य सत्त्वं च पारमार्थिकभावविषयत्वेन शास्त्रीयव्यवहारनियन्त्रितत्वेन च, अत एवोदाहरणद्वैविध्यमाह, **यथा परमार्थः कुम्भः सिता बलाका च एषेति।** अत्र प्रथममुदाहरणं पारमार्थिककुम्भबोधनाभिप्रायेण कुम्भपदप्रयोगात्सत्यत्वोपदर्शनार्थम्, द्वितीयं च सत्यपि बलाकायां पञ्चवर्णसम्भवे शुक्लवर्णावधारणस्योत्कटशुक्लपरतया तदुपदर्शनार्थम्। न चैवं द्वितीयं व्यवहारसत्य एवान्तर्भाव्यतामिति वाच्यम्, तस्य लोकविवक्षाघटितत्वात्, अथ द्वितीयमेवोदाहरणमन्यत्र प्रकृते प्रदर्शितमिति प्रथमोदाहरणप्रदर्शनं स्वच्छन्दमतिविकल्पितमिति चेत्, न, "भावसच्चं णाम जमहिप्पायतो, जहा घडमाणेहि

सत्याभाषाभेदविचारे ७ व्यवहारसत्या ८ भावसत्ययोः सनिदर्शनं लक्षणस्वरूपादि प्ररूपणम् ॥

For Private and Personal Use Only

त्ति अभिप्पायतो घडमाणेहि त्ति भणियं, गावी अभिप्पायेण गावी, अस्सो वा अस्सो भणिओ एवमादि त्ति" (भावसत्यं नाम, यदभिप्रायतो, यथा घटमानयेत्यभिप्रायतो 'घटमानय' इति भणितं भवति ॥ गौरित्यभिप्रायेण गौः। अश्वो वाऽश्वः भणित एवमादीति) चूर्णिकारवचनात्, अथ बलाकायाः पञ्चवर्णत्वं न युक्तिमत् शुक्लेतररूपस्य शुक्लरूपप्रतिबन्धकत्वात्, अन्यथा चित्ररूपोच्छेदात्, शुक्लादौ नीलादिसत्त्वे तत्प्रत्यक्षप्रसङ्गाच्चेति चेत्, न, शुक्लघटारम्भकपरमाणूनामेव कालान्तरे नीलघटाद्यारम्भकत्वेन नियमत एकत्र पञ्चवर्णत्वव्यवस्थितेः, न च शुक्लारम्भका न तदितरारम्भका इति वाच्यम्, नियतारम्भमतनिरासात्, अवयवगतशुक्लेतरस्य च न शुक्लप्रतिबन्धकत्वम्, मानाभावात्। न च चित्ररूपान्यथानुपपत्तिर्मानम्, नीलपीतादिरूपसमुदायेनैव चित्रव्यवहारोपपत्तावतिरिक्तचित्रे मानाभावादित्यधिकं मत्कृतवादमालायाम्। शुक्लघटे रूपान्तराप्रत्यक्षत्वं चोत्कटरूपत्वेन योग्यत्वात्, परेणाप्युद्भूतरूपस्यैव तथात्वोपगमात्, न चावयवगताऽनुत्कटरूपस्याऽवयविन्युत्कटरूपप्रतिबन्धकत्वादुक्तानुपपत्तिः, अन्यथा पिशाचेऽप्युत्कटरूपप्रसङ्गादिति वाच्यम्, उत्कटत्वस्य परिणामविशेषप्रयोज्यत्वेन तथाप्रतिबन्धकत्वाकल्पनात्, अन्यथा भर्जनकपालस्थानुद्भूतरूपवह्नेस्तप्ततैलसंसर्गादुद्भूतरूपानुपपत्तिप्रसङ्गादिति दिग्। उत्कटत्वं तादृशबह्ववयवकत्वं न तु जातिरित्यन्ये। तत्त्वमत्रत्यं मत्कृतवादरहस्यादवसेयम् ८॥३२॥ उक्ता भावसत्या ८॥ अथ योगसत्यामाह।

**सा होइ जोगसच्चा, उवयारो जत्थ वत्थुजोगम्मि ॥ छत्ताइअभावे विहु, जह छत्ती कुंडली दंडी ९॥३३॥**

**सा भवति योगसत्या यत्र यस्यां वस्तुयोगे उपचारः,** 'अतीतसम्बन्धवल्लाक्षणिकपदघटिता योग-

भावसत्यायां नैयायिकाद्यारेकापरिहारः ९ योगसत्यायाः सनिदर्शनं लक्षणस्वरूपादिप्ररूपणम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सत्येत्यर्थः' । अन्यथा वस्तुद्वयात्मकसम्बन्धस्यैकतराऽभावेऽभावात् कुत्रोपचारः ?, न, यदि च विशेषणविरहेप्यर्थान्तररूपः सम्बन्धोऽस्तीत्युपेयते तदा इदानीं न छत्रीति च तत्र स्यादिति ध्येयम् । उदाहरणमाह छत्राद्यभावेपि यथा छत्री कुण्डली दण्डीति ९ ॥ ३३ ॥

उक्ता योगसत्या ९॥ अथौपम्यसत्यामाह, तत्रौपम्यमुपमानापेक्षम् ,उपमानं ज्ञातमुदाहरणं निदर्शनं दृष्टान्तो वेति तु पर्यायाः ॥तथाचाह भगवान् भद्रबाहुः॥ "नायं आहरणं ति य, दिट्ठंतोवमनिदरिसणं तह य एगट्ठत्ति ॥" ( ज्ञातं आहरणं इति च, दृष्टान्त उपमा निदर्शनं तथा चैकार्था इति ) तच्चोपमानं सामान्यतो द्विविधमित्याह—

चरियं च कप्पियं तह, उवमाणं दुविहमेत्थ णिद्दिट्ठं ॥
कप्पियमवि रूवयमिव, भावाबाहेण ण णिरत्थं ॥ ३४ ॥

चरितं च पारमार्थिकं च यथा महारम्भो ब्रह्मदत्तादिवद्दुःखं भजत इति, तथा कल्पितं स्वबुद्धिकल्पनाशिल्पनिर्मितं यथाऽनित्यतायां पिप्पलपत्रोपमानम् ॥ उक्तं च (उत्त०नि०)॥ " जह तुब्भे तह अम्हे, तुब्भे विय होहिधा जधा अम्हे। अप्पाहेंति पडंतं, पंडुयपत्तं किसलयाणं ॥३०८॥ ति," (यथा यूयं तथा वयं यूयमपि भविष्यथ यथा वयं ॥ शिक्षयति पतत्पाण्डुपत्रं किशलयेभ्यः ॥ ) ननु कल्पितं न प्रयोज्यं बाधितार्थत्वादित्यत आह—कल्पितमपि रूपकमिव, भावाबाधेन न निरर्थमिति,अयं भावः—यथा संसारः समुद्र इति रूपकप्रयोगोऽभेदबाधेप्यनाहार्यज्ञान एव बाधधियः प्रतिबन्धकत्वादाहार्यशाब्दबोधद्वारा संसारस्य दुस्तरत्वव्यञ्जकतायां पर्यवस्यन्न निष्प्रयो-

सत्याभाषाभेदविचारे ९ योगसत्याविचारः । १० औपम्यसत्योपक्रमः, तत्प्रसङ्गे उपमानभेदप्ररूपणं च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनस्तथोक्तचरितोपमानप्रयोगोपि मुख्यार्थबाधेप्याहार्यशाब्दबोधद्वाराऽनित्यताप्रतिपत्तिपर्यवसायितया नाऽनर्थ इति, ॥ **अत एवोक्तम्** ॥ "णवि अत्थि णवि अ होही, उल्लावो किसलपंडुपत्ताणं। उवमा खलु एस कया, भवियजणविबोहणट्ठाए ॥३०९॥ इति" ( नाप्यस्ति नापि च भविष्यत्युल्लापः किशलयपाण्डुपत्राणाम्। उपमा खल्वेषा कृता, भव्यजनविबोधनार्थाय ॥ ) एवं च कल्पितोपमानं स्वतो नादरणीयं किन्त्विष्टार्थसाधकतया ॥ **अत एवोक्तम्** ॥ "अत्थस्स साहणट्ठा, इंधणमिव ओदणट्ठाए ॥ त्ति" (अर्थस्य साधनार्थायेन्धनमिवौदनार्थाय इति ॥) **चरितोपमानं तु स्वतोऽप्यादरणीयमिति** ध्येयम्॥ अनयैव दिशा प्रयोगेऽपि खरविषाणादिदृष्टान्तसप्रयोजनता यथाकथञ्चित्परिभावनीया बहुश्रुतैरिति दिग् ॥ ३४ ॥ तदप्येकैकं चतुर्विधमित्याह ।

**आहरणे तद्देसे, तद्दोसे तह पुणो उवन्नासे ॥ एक्केक्कं तं चउहा, णेयं सुत्ता उ बहुभेयं ॥ ३५ ॥**

उक्तयोः चरितकल्पितयोरुपमानयोर्मध्ये **एकैकं चतुर्विधं**, क्व विषय इत्याह–**उदाहरणे तद्देशे तद्दोषे तथा पुनरुपन्यासे ज्ञेयं** ज्ञातव्यं, **सूत्रात्**सिद्धान्तात्, कीदृशं **बहुभेदं** बहवो भेदा अवान्तरप्रकारा यस्य तत्, तथा हि **आहरणं** सम्पूर्णं प्रकृतोपयोगी दृष्टान्तः, स च चतुर्द्धा [1]अपायो[2]पाय[3]स्थापना[4]प्रत्युत्पन्नविन्यासभेदात्। तत्राऽपायोऽनिष्टप्राप्तिस्तद्विषयमुदाहरणमपायोदाहरणम् । स च चतुर्द्धा द्रव्यापायः क्षेत्रापायः कालापायो भावापायश्चेति । तत्र द्रव्यापाये धननिमित्तं परस्परवधपरिणतौ द्वौ भ्रातरावुदाहरणम् ॥ क्षेत्रापाये दशारवर्गः ॥ कालापाये द्वैपायनो ॥ भावापाये च मण्डूकिकाक्षपकः कूरगडुकजीव इति ध्येयम् ।

उपमानसत्यास्वरूपविचारे चरितकल्पितोपमानयोः प्रत्येकमपायादि चातुर्विध्यं प्रतिभेदादि समन्वितं च विस्तरतः॥



For Private and Personal Use Only

एतत्कथानकोपदर्शनं च श्रोतॄणां संवेगस्थैर्यार्थम् । इदं च चरणकरणानुयोगमधिकृत्योक्तम् ॥ द्रव्यानुयोगमधिकृत्य तु द्रव्याद्यपेक्षयात्मादेरेकान्तनित्यतादिवादिनां सुखदुःखाभावप्रसङ्गादिनिदर्शनं द्रष्टव्यम् १ ॥ उपायो'अभिलषितवस्त्ववाप्त्यर्थो व्यापारः' तद्विषयमुदाहरणमुपायोदाहरणं, सोपि च द्रव्यादिभेदादपायवच्चतुर्विधस्तत्र द्रव्योपायो लोके धातुर्वादादिः, लोकोत्तरे त्वध्वादौ पटलादिप्रयोगतः प्रासुकोदककरणादिः ॥ क्षेत्रोपायो लौकिको लाङ्गलकुलिकादिः, लोकोत्तरस्तु विधिना प्रातरशनाद्यर्थमटनादिना क्षेत्रसञ्चारः ॥ कालोपायो नाडिकादिर्लौकिकस्तस्य तज्ज्ञानोपायत्वेन तथाव्यपदेशात्, लोकोत्तरस्तु सूत्रपरावर्तनादिः ॥ भावोपायस्तु देवनिर्मितैकस्तम्भप्रासादोपशोभितसर्वर्तुकारामस्थरसालपादपस्य फलमवनामिन्या विद्यया गुर्विण्याः स्वगृहिण्या दोहदपूरणार्थं गृहीतवतश्चाण्डालचौरस्याभिप्रायपरिज्ञानार्थमभयस्येवाख्यायिकाप्रबन्धोपदर्शनादिक इति । इदं च लौकिकमर्थाक्षिप्तं चरणकरणानुयोगमधिकृत्य चोक्तम् ॥ द्रव्यानुयोगमधिकृत्य पुनरादानाद्युपायेनात्मास्तित्वसाधननिदर्शनं द्रष्टव्यम् २ ॥ स्थापना च 'दोषाच्छादनेनाभीष्टार्थप्ररूपणा,' तत्र लोके हिङ्गुशिवप्रवर्त्तकस्य निदर्शनम्, लोकोत्तरे च प्रमादवशाद्गच्छस्खलितस्य छादनेन कयाचित्कल्पनया प्रवचनं प्रभावयत इति चरणकरणानुयोगं लोकं चाधिकृत्य ॥ द्रव्यानुयोगमधिकृत्य तु नयभेदमतापेक्षया दुष्टहेत्वभिधानेपि तथाविधाभिप्रायेण तत्समर्थनं द्रष्टव्यम् ३ ॥ प्रत्युत्पन्नविन्यासश्च 'तदात्वोपस्थितानिष्टनिरासः,' तस्योदाहरणमेकस्य वणिजो गृहसमीपे बद्धगानतानानां गान्धर्विकाणां गीतश्रवणेनोत्पन्नकामोद्रेकनिजकामिनीपरिजनर-

औपम्यसत्यास्वरूपविचारे प्रथमोदाहरणभेदप्रतिभेदविचारः सनिदर्शनः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणार्थं पृष्टमित्रदत्तोपायस्य गृहसमीपे निर्मापितव्यन्तरभवनस्य गान्धर्विकाणां गानसमये व्यन्तरगृहे पटहादिध्वानेन तेषां क्षोभमुत्पादयतः ॥ लोकोत्तरे तु शिष्यस्यापि कदाचिदध्युपपन्नस्य सूत्रोक्तदिशा वारयतो धर्माचार्यस्य ॥ इदं च लोकं चरणकरणानुयोगं चाधिकृत्य ॥ द्रव्यानुयोगमधिकृत्य तु यदि नास्तिको वदेद्भावा एव न सन्ति आत्मा तु सुतरां नास्तीति, तदा तमेवं निवारयेत्, किमेतत्तव वचनमस्ति नास्ति वा, आद्ये प्रतिज्ञाहानिः, द्वितीये च निषेधकस्यैवासत्त्वे किं केन निषेधनीयं ? किं नास्त्यात्मेति ? । किञ्च नास्त्यात्मेतिप्रतिषेधको ध्वनिः शब्दः, शब्दश्च विवक्षापूर्वक इति नाजीवोद्भव इति प्रतिषेधध्वनेरेव सिद्ध आत्मेति ४॥ दर्शितं सभेदमुदाहरणम् १ ॥ तद्देशश्च 'निगमनोपयोगिदेशघटितो दृष्टान्तः'। स चतुर्द्धा अनुशास्तिः १ उपालम्भः २ पृच्छा ३ निश्रावचनं ४ चेति। तत्र सद्गुणोत्कीर्तनेनोपबृंहणमनुशास्तिः। अत्र च सुभद्राकथानकं वक्तव्यम्, तत्रापि तस्याः शील गुणदृढत्वपरीक्षोत्तरं लोकप्रशंसा, एकदेशस्यैव प्रकृतोपसंहारोपयोगित्वादुदाहरणैकदेशता॥ एवं भरतकथानकेनापि एकदेशेन वैयावृत्त्यगुणोपसंहाराद् गुरोः शिष्याप्रमादोपबृंहणमुचितम्, इदमपि लौकिकं चरणकरणानुयोगं चाधिकृत्योक्तम् ॥ द्रव्यानुयोगमधिकृत्य पुनरात्मास्तित्ववादिनस्तन्त्रान्तरीयान् प्रति वक्तव्यम्, यदुत साध्वेतत् यदात्मास्तीत्यभ्युपगतं, किन्त्वकर्त्तायं न भवति ज्ञानादीनां कृतिसामानाधिकरण्यनियमादित्यादि॥ उदाहरणदेशता त्वस्यात्मनः कर्तृत्वदेशसाधन एव निदर्शनाभिधानादित्यवधेयम् १ ॥ उपालम्भो 'दोषोपदर्शनम्'। तत्र मृगावतीदेव्युदाहरणम्, एवं प्रमाद्यन् शिष्योऽप्युपालब्धव्य इति चरणकरणानुयोगमधिकृत्य ॥ द्रव्यानु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगमधिकृत्य तु बहुधा नास्तिकवादप्रकटनलम्पटस्य चार्वाकस्यात्मनास्तित्वकथायामेवं वक्तव्यं, यदुतात्माभावेऽस्त्यात्मेति वितर्को नास्त्यात्मेति कुविज्ञानं च नोपपद्येत धर्म्यभावे धर्मस्यैवासम्भवादित्यादि । उदाहरणदेशता चास्य परलोकादिप्रतिषेधवादिनो नास्तिकस्व जीवसद्भावसाधनाद्भावनीया २ ॥ पृच्छा 'प्रश्नः' । तत्र क्वाऽहमुत्पत्स्य इति भगवति पृष्टे षष्ठ्यां नरकपृथिव्यामिति भगवतोत्तरितः सप्तमनरकपृथिवीगमननिमित्तचक्रवर्त्तिसाम्राज्यसम्पादनायाभ्युद्यतः कृतमालेन हतः कूणिक उदाहरणं लोके । लोकोत्तरेपि प्रष्टव्या आचार्या जिज्ञासितमर्थम्, पृष्ट्वा च समाचरणीयानि शक्यानि अशक्यानि वा परिहर्त्तव्यानि ॥ उदाहरणदेशता चास्याभिहितैकदेश एव प्रष्टुराग्रहात्तेनैव चोपसंहारादवसेया । इदमपि लोकं चरणकरणानुयोगं चाधिकृत्य ॥ द्रव्यानुयोगमधिकृत्य तु नास्त्यात्मेतिवादी नास्तिकः पृच्छ्यते, कुतो नास्त्यात्मेति, स चेद् ब्रूयात् सतोऽपरोक्ष इति, तदाभिधेयम्, भद्र ? कुविज्ञानमेतत्ते, विवक्षाभावे विशिष्टशब्दानुपपत्तेः, इत एवात्मसाधनादिति ३ ॥ निश्रावचनं च तत् 'यदेकं कञ्चन निश्राभूतं कृत्वा विचित्रप्रतिपादनम्' । यथा द्रुमपत्रकाध्ययने भगवता गौतमनिश्रयाऽन्येप्यनुशासिताः, एवमसहना अपि शिष्या मार्द्दवसम्पन्नमेकं शिष्यं निश्राभूतं कृत्वाऽनुशासनीयाः ॥ उदाहरणदेशता चास्य लेशत एव तथानुशासनात् । एवं तावच्चरणकरणानुयोगमधिकृत्योक्तम् ॥ द्रव्यानुयोगमधिकृत्य तु अन्यापदेशेन लोकायतो वक्तव्यः, अहो धिकष्टं नास्ति येषामात्मा, तदभावे दानादिक्रियावैफल्यात्, न च तद्वैफल्यम्, सत्त्ववैचित्र्यानुपपत्तेरित्यादि ४ ॥ उक्तः सभेद उदाहरणदेशः २ ॥ तद्दोषश्च 'बहुव्रीह्याश्रयणाद्-

औपम्यसत्यास्वरूपविचारे द्वितीयोदाहरणदेशभेदप्रतिभेदविचारः सनिदर्शनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुष्टमुदाहरणम् ’। तच्चतुर्द्धा, अधर्मयुक्तप्रतिलोमात्मोपन्यासदुरुपनीतभेदात् । तत्राधर्मयुक्ते लोके नलदामकुविन्द उदाहरणं लोके, लोकोत्तरेपि चरणकरणानुयोगमधिकृत्य तथाविधं निदर्शनमवधार्य नाधर्मयुक्तं भणितव्यम् ॥ द्रव्यानुयोगमधिकृत्य च वादे रूपविद्याबलेन प्रवचनार्थं सावद्यमपि कुर्यात् यथा मयूरीनकुलीप्रभृतिविद्याभिः स परिव्राजको विलक्षीकृत इति, दोषत्वं चात्र सर्वथा स्वरूपतो वाऽधर्मयुक्तत्वादिति ध्येयम् १ ॥ प्रतिलोमं प्रतिकूलं, तत्र कथानकं प्रद्योतेन हृतस्य पुनस्तमेव हृतवतोऽभयस्य द्रष्टव्यम्, इदं च लोके । लोकोत्तरे तु चरणकरणानुयोगमधिकृत्य “ णो किंचिवि पडिकूलं, कायव्वं भवभएणमण्णेसिं । अविणीतसिक्खगाण उ जयणाइ जहोचितं कुज्जा ॥१॥” (नो किञ्चिदपि प्रतिकूलं कर्तव्यं भवभयेनान्येषाम् ॥ अविनीतशिक्षकाणां तु यतनया यथोचितं कुर्यात् ) ॥ द्रव्यानुयोगमधिकृत्य तु द्रव्यार्थिकपर्यायार्थिकयोरन्यतरेणान्यतरं चोदयेत्, दुर्वादिनां द्विराश्यादिप्रतिपादकानां निरासार्थं त्रिराश्यादिकं वा स्थापयेत्, अत्र चाद्ये पक्षे साध्यार्थासिद्धेः, द्वितीये तु विरुद्धभाषणादेव दुष्टत्वमित्यवसेयम् २ ॥ आत्मोपन्यासश्चायं यत्रानुपन्यसनीय आत्मैवोपन्यस्यते, तत्र च लोके तटाकभेदे पिङ्गलस्थपतिरुदाहरणम्, अन्यत्रापि चरणकरणानुयोगे नैवं ब्रूयात्, यदुत ॥ लोइयधम्मातो वि हु, जे पब्भट्ठा नराधमा ते उ ॥ कह दव्वसोयरहिया, धम्मस्साराहगा होंति ॥१॥ त्ति ॥ (लौकिकधर्मादपि खलु ये प्रभ्रष्टा नराधमास्ते तु ॥ कथं द्रव्यशौचरहिता धर्मस्याराधका भवन्ति ॥ इति ) द्रव्यानुयोगेपि नैवं प्रयुञ्जीत एकेन्द्रिया जीवा व्यक्तोच्छ्वासादिलिङ्गत्वाद्, व्यतिरेके घटवदिति, अत्र च न च तथैतेष्वसद्भावस्तस्माज्जीवा एवैत इति, आत्म-

औपम्यस-
त्यास्वरूप-
विचारे
तृतीयोदा-
हरणदोषभे-
दप्रतिभेद-
विचारः स-
निदर्शनः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नोऽपि तद्रूपापत्त्यात्मोपन्यासत्वमुदाहरणदोषता चात्मोपघातजनकत्वेन तच्चासाधारण्यादित्यवसीयते ३ ॥ दुरुपनीतं च दुष्टनिगमनं, तत्र लोके मत्स्यग्रहणपरो भिक्षुरुदाहरणं 'कन्थाचार्य[1] श्लथा ते' इत्यादिकाव्यादवसेयम् ॥ चरणकरणानुयोगे तु ॥ इय सासणस्सऽवन्नो, जायइ जेणं ण तारिसं बूया ॥ वाएवि उवहसिज्जइ, णिगमणतो जेण तं चेव ॥१॥ त्ति ॥ (इति शासनस्यावर्णो जायते येन न तादृशं ब्रूयात्। वादेऽप्युपहस्यते निगमनतो येन तदेवेति)॥ द्रव्यानुयोगेपि ॥ जीवचिंताए वादिणा तहा भणितव्वं वादो(दे)जेण ण जिप्पइ परवाइणत्ति" ॥ (जीवचिन्तायां वादिना तथा भणितव्यं। वादे येन न जीयते परवादिना)॥४॥ उक्तं सभेदमुदाहरणम् ॥ उपन्यासः 'तथाविधप्रतिकूलाभिप्रायपूर्व उदाहारः'। स चतुर्द्धा तद्वस्तु[1]तदन्यवस्तु[2]प्रतिनिभ[3]हेतू[4]पन्यासभेदात् तत्र 'वाद्युक्तमेव वस्त्वादाय उपन्यासस्तद्वस्तूपन्यासः,' तत्रोदाहरणम् एकः कार्पटिको बहून् देशान् भ्रान्त्वा समागतः, अन्यैः कार्पटिकैराश्चर्यं पृष्ट उक्तवान् समुद्रतीरे एकत्र मया महान्महीरुहो दृष्टस्तस्यैका शाखा समुद्रे प्रतिष्ठिताऽन्या च स्थले, ततः समुद्रे पतितानि फलानि जलचरा भवन्ति, स्थले पतितानि च स्थलचरा इति, तदिदमाकर्ण्य श्राद्धकार्पटिकेनोक्तं यान्यर्धमध्यपतितानि तानि किं भवन्तीति, तूष्णीम्भूतः कार्पटिक इति लोके ॥ चरणकरणानुयोगे तु यदि कश्चिद्विनेयः कश्चिदसद्ग्रहं गृहीत्वा न सम्यग् वर्त्तते स खलु तद्वस्तूप-

औपम्यसत्यास्वरूपविचारे तृतीयोदाहरणदोषभेदप्रतिभेदविचारः सनिदर्शनः॥

---

१ कन्थाऽऽचार्य श्लथा ते नहि शफरिवधे जालमश्नासि मत्स्यां-स्ते वै मद्योपदंशाः पिबसि मधु हि किं वेश्यया यासि वेश्याम्॥ दत्त्वाङ्घ्री मुर्ध्न्यरीणां तव किमु रिपवो भित्तिभेत्तास्मि येषां, चौरोसि द्यूतहेतोस्त्वयि सकलमिदं नास्ति भ्रष्टे विचारः ॥१॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यासेनैव प्रज्ञापनीयः, यथा कश्चिदाह ॥ ‘ न मांसभक्षणे दोषो, न मद्ये न च मैथुने ॥ प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला ॥१॥” इदं च किलैवमेव युज्यते प्रवृत्तिमन्तरेण निवृत्तेः फलाभावान्निर्विषयत्वेनासम्भवाच्च, तस्मात्फलनिबन्धननिवृत्तिनिमित्तत्वेन प्रवृत्तिरप्यदुष्टैवेति, अत्रोच्यते, इह निवृत्तेर्महाफलत्वं किं दुष्टप्रवृत्तिपरिहारात्मकत्वेन, आहोश्विददुष्टप्रवृत्तिपरिहारात्मकत्वेन, आद्ये कथं प्रवृत्तेरदुष्टत्वम्, अन्त्ये चादुष्टनिवृत्तिपरिहारात्मकप्रवृत्तेरपि महाफलत्वप्रसङ्गेन पूर्वापरविरोध इति ॥ न मांसभक्षणेऽदोष इत्यत्र नञ्प्र(अप्र)श्लेषः कर्त्तव्यः, यतः भूतानाम् जीवानाम्, एषा प्रवृत्तिरुत्पत्तिस्थानं, भूतानां पिशाचप्रायाणां वा, एषा प्रवृत्तिर्न तु विवेकिनामिति व्याख्येयम् ॥ **द्रव्यानुयोगे** त्वेकान्तनित्यो जीवः, अमूर्त्तत्वादाकाशवदिति प्रयोगे कर्मवदमूर्त्तत्वेऽनित्यं स्यादिति । एवं व्यभिचारोदाहरणात्तु कर्मामूर्त्तमनित्यं चेत्ययं **वृद्धदर्शनेनो**दाहरणदोष एव, यथाऽन्येषां साधर्म्यसमा जातिरिति ध्येयम् १ ॥ **तदन्यवस्तू**पन्यासस्तुल्यवस्त्वन्तराश्रयणेन, यथा पूर्वोदाहरण एव, यानि पुनः फलानि पातयित्वा कश्चिद्भक्षयति गृहे नयति वा तानि किं भवन्तीति लोके । **चरणकरणानुयोगे** तु न मांस इत्यादौ यथाश्रुत एव कुग्रहे “न हिंस्यात् सर्वाभूतानीति” वचनान्तरोपन्यासेन परिहारः ॥ **द्रव्यानुयोगे** तु कश्चिद्वदेत् यस्य वादिनोऽन्यो जीवोऽन्यच्च शरीरमिति तस्यान्यशब्दस्याविशिष्टत्वात्तयोरपि तद्वाच्यतयाऽविशेषादेकत्वप्रसङ्ग इति, तं प्रत्येवं तदन्यवस्तूपन्यासो विधेयः, हन्तैवं परमाणुद्व्यणुकघटपटादीनामेकत्वप्रसङ्गः, अन्यशब्दवाच्यत्वाविशेषात्, तस्माज्जीवशरीरयोरन्यत्वाभिधानं शोभनमेवेति २ ॥ **प्रतिनिभस्तु** छलनिपुणवादिनं प्रति प्रतिच्छले-

औपम्यसत्यास्वरूपविचारे चतुर्थोदाहरणभेदोपन्यासप्रतिभेदविचारः सनिदर्शनः ॥



For Private and Personal Use Only

नोपन्यासः:, यथा “ एगंमि नयरे एगो परिव्वायगो सोवण्णेणं खोरएणं तहिं हिंडति, सो भणति जो ममं असुअं सुणावेति तस्सेतं देमि खोरयं, तत्थ एगो सावगो, तेण भणियं “ तुज्झ पिया मह पिउणो, धारेइ अणूणगं सयसहस्सं ॥ जइ सुयपुव्वं दिज्जसु, अह न हु तं (सुयं) खोरगं देहि ॥१॥ त्ति ” (एकस्मिन्नगरे एकः परिव्राजकः सौवर्णेन खोरकेण तत्र भ्रमति स भणति यो ममाऽश्रुतं श्रावयति तस्मै एतत्खोरकं ददामि तत्रैकः श्रावकः तेन भणितं “ तव पिता मम पितुर्धारयत्यनूनकं शतसहस्रं । यदि श्रुतपूर्वं देहि अथ न श्रुतं खोरकं देहि ॥ ) अयं च लोके । चरणकरणानुयोगे च येषां सर्वथा हिंसायामधर्मस्तेषामनशनविषयाचित्तोद्रेकभङ्गादात्महिंसायामप्यधर्म एवेति तदकरणप्रसङ्गः ॥ द्रव्यानुयोगे पुनरदुष्टं मद्वचनमिति मन्यमानो यः कश्चिदाह ‘अस्ति जीव’ इत्यत्र वद किञ्चित्, यद्यपि वावदूक इति स वक्तव्यो, यद्यस्ति जीव एवं तर्हि घटादीनामप्यस्तित्वाज्जीवत्वप्रसङ्ग इति ३ । हेतुरुपपादकस्तदुपन्यासो हेतूपन्यासो, यथा किं नु यवाः क्रीयन्त ? इति प्रश्ने, उत्तरं, येन मुधा न लभ्यन्त इति लोके । चरणकरणानुयोगे तु यदि शिष्येण पृच्छयते किमितीयं भिक्षाटनाद्याऽतिकष्टा क्रिया क्रियत इति ?, तदा स वक्तव्यो येन न कष्टतरा वेदना वेद्यते नरकादाविति ॥ द्रव्यानुयोगे तु यद्याह कश्चित्किमित्यात्मा न चक्षुरादिभिरुपलभ्यते, स वक्तव्यो येनातीन्द्रिय इति ॥ उक्तः सभेद उपन्यासस्तदेवं सुव्याख्यातं समासतो बहुभेदमिति पदम् ॥ ३५ ॥

एवं सप्रपञ्चमुपदर्शितमुपमानम्, अथास्योपमासत्याया लक्षणघटकतया साफल्यमाह ।

औपन्यस-त्यास्वरूप-विचारे च-तुर्थोदाह-रणभेदोप-न्यासप्रति-भेदवि-चारः स-निदर्शनः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उवमासच्चा सा खलु,एएसु सदुवमाणघडिया जा ॥ णासंभविधम्मग्गह–दुट्ठा देसाइगहणाओ ॥३६॥

खल्विति निश्चये, सा भाषा, उपमासत्या या एतेषूपदर्शितभेदेषु मध्ये, सदुपमानघटिता, उदाहरणदोषघटितायाः सत्यत्ववारणायेदम् । इदमुत्सर्गतः ॥ कारणतस्तूदाहरणदोषप्रतिपादनेऽपि नासत्यत्वमिति ध्येयम् ॥ ननु सदुपमापि न सत्या चन्द्रमुखीत्यादौ मुखे यावच्चन्द्रधर्मबाधात्, न चोपमानगतयत्किञ्चिद्धर्मपुरस्कारेणोपमाप्रवृत्तिः, अत्यन्तविलक्षणानामप्यभिधेयत्वज्ञेयत्वादिना परस्परमुपमानोपमेयभावप्रसङ्गादित्यतआह, न नैव, असम्भविनो मुखाद्युपमेयावृत्तयो ये धर्माश्चन्द्राद्युपमानगतकलङ्कितत्वादयः, तद्ग्रहेण दुष्टाः । कुत इत्याह देशादिग्रहणेन चन्द्रमुखीत्यादौ देशोपमायां सम्भविनां प्रसन्नत्वादिधर्माणामेव ग्रहान्न दुष्टत्वं, नियामकश्चात्र समभिव्याहारविशेषादिरिति द्रष्टव्यम् । अत्यन्तविलक्षणानां च नोपमानोपमेयभावोऽसाधारणधर्मघटितत्वादुपमाया इति ध्येयम् ॥ ननु व्यतिरेकालङ्कारादिवचनानां क्वान्तर्भावः?, यदि व्यवहारसत्यादौ, उपमाया अपि कथं न तत्र स इति चेत्, न, एतद्भेदस्य तत्र प्रवेशादुपमाया एव व्यतिरेकाद्युपलक्षणत्वाद्वेतिदिग् १० ॥ ३६ ॥ उक्ता औपम्यसत्या १० ॥ तदेवं निरूपिता सत्या भाषेत्युपसंहारमसत्याभाषानिरूपणप्रतिज्ञाञ्चाह ।

एवं सच्चा भासा, सुआणुसारेण वण्णिया चित्ता ॥ भासाइ असच्चाए, सरूवमह कित्तइस्सामि ॥३७॥

एवमुक्तप्रकारेण, सत्या भाषा, श्रुतस्य प्रज्ञापनादेरनुसारेण तदभिप्रायापरित्यागेन, वर्णिता लक्षणादिभिर्निरूपिता । कीदृशीत्याह–चित्रा बहुभेदप्रभेदघटितत्वात् विचित्रा, अथवा चित्तात् ' गम्ययपः ( कर्माधारे

औपम्यसत्यास्वरूपविचारे लक्षणघटकपदसाफल्यं परारेकापरिहरणं च प्रसङ्गतः ॥ असत्याभाषोपक्रमश्च ॥



For Private and Personal Use Only

सिद्धहैम० २–२–७४ ) प्रयोगे ’ पञ्चम्याश्रयणात् चित्तमभिप्रायं गृहीत्वेत्यर्थः, एतेन श्रुतस्य न यथाश्रुत एवार्थो व्याख्येयः किन्त्वाभिप्रायिकोपि, अन्यथा कालिकानुयोगवैफल्यप्रसङ्गात् हेतुग्राह्याणामर्थानामाज्ञाग्राह्यतया पर्यवसाननिमित्तकाऽऽशातनाप्रसङ्गाच्चेति व्यज्यते ॥ अथ सत्यभाषानिरूपणानन्तरमसत्याया भाषायाः स्वरूपं कीर्त्तयिष्यामि, इत्थं चोद्देशक्रमानुरूपैव सङ्गतिरत्रेति सूचितम् ॥ ३७ ॥

तत्र पूर्वं लक्षणाभिधानपूर्वमसत्याया भेदानाह ।

**सच्चाए विवरीया, होइ असच्चा विराहिणी तत्थ । दव्वाई चउभंगा, दसहा सा पुण सुए भणिआ॥३८॥**

**कोहे माणे माया, लोभे पिज्जे तहेव दोसे अ ॥ हास भए अक्खाइअ, उवघाए णिस्सिया दसमा॥३९॥**

सत्यातो विपरीताऽसत्या भवति ‘ अतस्मिंस्तद्वचनमिति ’ यावत्, न च चरितोपमाद्यतिव्याप्तिः, यथार्थतात्पर्यविरहेण तद्वचनमिति गाथार्थात् । परिभाषानुरोधादाह, विराहिणित्ति विराधिकेत्यर्थः । लक्षणान्तरं चेदम्, विराधकत्वं च सद्भूतप्रतिषेधत्वादिनेति नानुपपत्तिः । तत्र द्रव्यादयश्चत्वारो भङ्गाः, ज्ञातव्या इति शेषः, तथाहि चतुर्द्धाऽसत्या भाषा प्रवर्त्तते द्रव्यतः क्षेत्रतः कालतो भावतश्चेति, द्रव्यतः सर्वेषु द्रव्येषु, क्षेत्रतो लोकेऽलोके वा, लोकेऽनन्तप्रदेशमयो लोक इत्यादिः । अलोके च वसन्ति जीवाः पुद्गला वा, न वाऽलोक इत्यादिः । कालतो दिवा रात्रौ वा, भावतस्तु क्रोधाद्वा लोभाद्वा भयाद्वा हास्याद्वा, अत्र ‘एकग्रहणे तज्जातीयानां ग्रहणम्’ इति न्यायात् क्रोधग्रहणान्मानग्रहः, लोभग्रहणाच्च मायाग्रहः, भयहास्यग्रहणेन च प्रेमद्वेषकलहाभ्याख्यानादिग्रह इति

असत्याया भाषाया लक्षणं, विराधनीत्वं, द्रव्यादितश्चतुर्विधत्वं क्रोधादिभेदाच्च दशभेदत्वं निरूपितम्॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृद्धसम्प्रदायः ॥ भावाऽसत्याभेदा एव च दश, अनन्तरं निर्युक्तिगाथया दर्शयिष्यन्त इति ध्येयम् ॥ अत्र द्रव्यभावसंयोगे विधिप्रतिषेधाभ्यामपि चतुर्भङ्गी भावनीया ॥ तथाहि ॥ "दव्वओ णाम एगे मुसावाए णो भावओ १, भावओ णाम एगे मुसावाए नो दव्वओ २, एगे दव्वओ वि भावओ वि ३, एगे णो दव्वओ णो भावओ ४। तत्थ दव्वओ मुसावाओ णो भावओ जहा कोई भणिज्जा-अत्थि ते कहिं पसुमिगाइणो दिठा? ताहे भणइ णत्थि, एस दव्वओ मुसावाओ णो भावओ १ ॥ भावओ णो दव्वओ जहा मुसं भणिहामित्ति, तओ तस्स वंजणाणि सहसत्ति सच्चगाणि विणिग्गयाणि ताणि। एस भावओ णो दव्वओ २ ॥ दव्वओ वि भावओ वि जहा मुसावायपरिणओ कोइ तमेव मुसावायं वदेज्जा ३ ॥ चउत्थो भंगो सुण्णोत्ति" ॥ (द्रव्यतो नामैको मृषावादो नो भावतः १। भावतो नामैको न द्रव्यतः २। एको द्रव्यतोपि भावतोपि ३। एको नो द्रव्यतो नो भावतः ४। तत्र द्रव्यतो मृषावादो नो भावतो यथा कश्चिद्भणेत्। अस्ति त्वया कुत्र पशुमृगादयो दृष्टाः?, तदा भणति नास्ति, एष द्रव्यतो मृषावादो न भावतः १। भावतो नो द्रव्यतः यथा मृषां भणिष्यामि इति ततस्तस्य व्यञ्जनानि सहसात्सत्यानि विनिर्गतानि तानि, एष भावतो न द्रव्यतः २। द्रव्यतोपि भावतोपि यथा मृषावादपरिणतः कश्चित्तमेव मृषावादं वदेत् ३॥ चतुर्थो भङ्गः शून्य इति ॥ ) सा पुनरुक्तलक्षणाऽसत्या, दशधा ॥ तथाहि-कोहेत्ति अत्र सप्तमी पञ्चम्यर्थे, तथा च क्रोधान्निःसृता निर्गतेत्यादि व्याख्येयम्, अथवा निश्रा जाताऽस्याः सा निश्रिता क्रोधे निश्रिता क्रोधनिश्रितेत्यादि यथाश्रुतमेव क्रोधे इति। शिष्टं स्पष्टम् ॥ २९ ॥ अत्र पूर्वं क्रोधनिःसृतामेव निरूपयति।

असत्या-भाषाया द्रव्यभाव संयोगतो विधिनिषेधमुखेन चतुर्भङ्गी निरूपणम्॥



For Private and Personal Use Only

साकोहणिस्सिया खलु, कोहाविट्ठो कहेइ जंभासं। जह ण तुमं ममपुत्तो, अहवा सव्वंपि तव्वयणं॥

सा क्रोधनिःसृता खलु यां भाषां क्रोधाविष्टः कथयति यथा न त्वं मम पुत्र इति, इदं हि कुपितस्य पितुः पुत्रं प्रति वचनम्, अथवा सर्वमपि तस्य क्रोधाविष्टस्य वचनम्। नन्विदमयुक्तं क्रोधाविष्टस्यापि गां गामेव वदतोऽसत्यत्वाभावादिति चेत्, न, क्रोधाकुलचित्तत्वेन तस्य गवि गवाभिधानस्याप्यप्रमाणत्वादिति सम्प्रदायः। इदन्तु ध्येयं, तत्र सम्मुग्धव्यवहारौपयिकसत्यत्वेऽपि फलौपयिकं न सत्यत्वम्, संक्लिष्टाचरणस्य निष्फलत्वादिति ॥ ४० ॥ ननु कुपितस्य घुणाक्षरन्यायेनापि सत्यभाषणेनाप्रशस्तक्रोधवशात्क्लिष्टकर्मबध्नतोऽपि[सत्यं भाषमाणस्य नाप्रशस्तक्रोधवशात्क्लिष्टकर्मबन्धत्वमपि–पाठान्तरम्]सत्यभाषाप्रत्ययं शुभं कर्म किमिति न बद्ध्यत इति मुग्धाशङ्कायामाह।

ठिइरसबन्धकराणं, हंदि कसायाण चेव अणुरूवं। पयडिप्पएसकम्मं, जोगा बज्झंति ण विरूवं॥४१॥

हंदीत्युपदर्शने, योगाः स्थितिरसबन्धकराणां कषायाणामनुरूपमेव प्रकृतिप्रदेशकर्म बध्नन्ति न विरूपम्, एवं च व्यवहारतः सत्याया अपि कस्याश्चिद्भाषायाः क्लिष्टकर्मबन्धसामग्रीभूतकषायाद्यन्तर्गताया न स्वातन्त्र्येण शुभकर्मबन्धहेतुत्वेन फलवत्त्वं, तथा च क्रोधाभिभूतस्य सर्वापि भाषाऽसत्यैवेति स्थितम् ॥ ४१ ॥

न तावदस्याः शुभफलाहेतुत्वमेव प्रत्युताशुभफलजनकत्वमपीत्याह।

दुट्ठगरा वा सच्चा, कोहाविट्ठाण जेण सप्पसरा। मिच्छाभिणिवेसकए, जीवाणं हंदि सा होइ॥४२॥

असत्याभाषाया दशभेदेषु प्रथमक्रोधनिःसृतालक्षणस्वरूपादिनिरूपणं सनिदर्शनम्। फलस्वरूपं च॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्रोधाविष्टानां वाऽथवा, दुष्टतरा सत्या, अतिशयिता दुष्टा दुष्टतरा, कुत इत्याह, हंदीत्युपदर्शने, येन कारणेन, सप्रसरा प्रसरणयुक्ता सा सत्या भाषा, जीवानां मिथ्याभिनिवेशकृते भवति, क्लिष्टाशयानां सत्यभाषणं सम्यगिदं मयोक्तमिति दुर्भाषितानुमोदनं जनयन् महाकर्मबन्धहेतुरिति परमार्थतोऽसत्यमित्यर्थ इति ॥ किमतिविस्तरेण १ ॥ ४२ ॥ उक्ता क्रोधनिःसृता, अथ माननिःसृतामाह ।

**सा माणणिस्सिया खलु, माणाविट्ठो कहेइ जं भासं ॥ जह बहुधणवंतोऽहं, अहवा सव्वंपि- [ तव्वयणं ॥ ४३ ॥**

स्पष्टा । नवरं यथा बहुधनवानहमिति वचनमल्पधनस्यापि मानिनः क्वचित्केनचित्पृष्टस्येव च तदऽवधेयम् ॥ शेषं प्राग्वत् २ ॥ ४३ ॥ उक्ता माननिःसृता, अथ मायानिःसृतामाह ।

**मायाइ णिस्सिया सा,मायाविट्ठो कहेइ जं भासं ॥ जह एसो देविंदो,अहवा सव्वंपि तव्वयणं ॥४४॥**

स्पष्टा । नवरं यथा एष देवेन्द्र इत्यैन्द्रजालिकस्यावास्तवशक्रप्रदर्शकस्य मायावचनम् । शेषं प्राग्वत् ३ ॥४४॥

उक्ता मायानिःसृता, अथ लोभनिःसृतामाह ।

**सा लोभणिस्सिया खलु, लोभाविट्ठो कहेइ जं भासं ॥ जह पुण्णमिणं माणं, अहवा सव्वंपि- [ तव्वयणं ॥ ४५ ॥**

स्पष्टा । नवरं पूर्णमिदं मानमिति कूटतुलादौ ग्राहकं प्रति लुब्धस्य वणिजो वचनम् । शेषं प्राग्वत् ४ ॥४५॥

उक्ता लोभनिःसृता, अथ प्रेमनिःसृतामाह ।

**सा पेम्मणिस्सिया खलु, पेम्माविट्ठो कहेइ जं भासं ॥ जह तुज्झ अहं दासो, अहवा सव्वंपि- [ तव्वयणं ॥ ४६ ॥**



For Private and Personal Use Only

स्पष्टा । नवरं तवाहं दास इति स्नेहाकुलस्य प्रियतमस्य प्रियतमां प्रति वचनं प्रेमवतीप्रवरमोहोदयजनितः परिणामविशेष इति ध्येयम् । शेषं स्पष्टम् ५ ॥ ४६ ॥ उक्ता प्रेमनिःसृता, अथ द्वेषनिःसृतामाह । [ ॥४७॥

**सादोसणिस्सिया खलु,दोसाविट्ठो कहेइ जं भासं ॥ जह न जिणो कयकिचो,अहवा सव्वंपितव्वयणं ६**

स्पष्टा । नवरं न जिनः कृतकृत्य इत्यभिनिविष्टपाखण्डिकस्येन्द्रजालिकतया विद्यातिशयेनैव कार्य(चाय)मैश्वर्यं दर्शयति न तु कर्मक्षयेण कृतार्थोऽयमिति भगवद्गुणमत्सरिणो वचनं, 'द्वेषश्चात्र परगुणासहनमात्सर्यं' 'क्रोधस्तु तदतिरिक्तोऽप्रीतिरूपः परिणाम' इति भेदः ॥ शेषं प्राग्वत् ६ ॥४७॥ उक्ता द्वेषनिःसृता, अथ हास्यनिःसृतामाह ।

**साहासणिस्सिया खलु,हासपरिणओ कहेइ जं मोसं ॥ जह पेच्छगहासट्ठा,दिट्ठेवि नदिट्ठमियवयणं ॥**

खलु निश्चये,सा हास्यनिःसृता, हास्यं नाम 'हास्यमोहोदयजनितः परिणामविशेषः' तत्र परिणतो हास्यपरिणतो, यन्मृषा बाधितार्थं कथयेत्, यथा प्रेक्षकहास्यार्थं विलोकमानस्त्रीजनमित्रादिहास्योत्पादनकृते कान्दर्पिकाणां, दृष्टेपि वस्तुनि, न दृष्टमिति वचनं, तथावचन एव परस्य प्रवृत्तिनिवृत्त्या हासोत्पत्तेः ७ ॥४८॥

उक्ता हास्यनिःसृता, अथ भयनिःसृतामाह । [ णइ नरो ॥४९॥

**सा य भयणिस्सिया खलु, जं भासइ भयवसेण विवरीयं॥जह णिवगहिओ चोरो, नाहं चोरोत्ति भ-**

भाषामित्यस्यानिबद्धस्य ग्रहणात् यां भाषां, भयवशेन विपरीतामसदर्थां, भाषते सा च खलु भयनिःसृता, यथा नृपगृहीतश्चौरो नरो नाहं चौर इति भणति ८ ॥ ४९ ॥

असत्याभाषाभेदविचारे ६ प्रेमऽद्वेष- ७ हास्य- ८ भयनिःसृताऽसत्यलक्षणस्वरूपादिनिरूपणं सनिदर्शनम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्ता भयनिःसृता, अथाख्यायिकानिःसृतामाह ।

**जा कूडकहाकेली, अक्खाइअणिस्सिया हवे एसा ॥ जह भारहरामायण-सत्थेऽसंबद्धवयणाणि ९ ॥ ५० ॥**

या कूटकथाकेलिरेषाऽऽख्यायिकानिःसृता भवेत्, यथा भारतरामायणशास्त्रेऽसम्बद्धवचनानि ॥ वेदादौ विध्यादिवचनानि तु परप्रतारणार्थं कालासुरादिकृतत्वेन मायानिःसृतायामन्तर्भवन्तीत्यवधेयम् ९ ॥ ५० ॥

उक्ताऽऽख्यायिकानिःसृता, अथोपघातनिःसृतामाह । [ चोरोक्ति १० ॥ ५१ ॥

**जं उवघायपरिणओ, भासइ वयणं अलीअमिह जीवो ॥ उवघायणिस्सिआ सा, जहा अचोरेवि ॥**

उपघातपरिणतः पराशुभचिन्तनपरिणतः, इह जगति जीवो यदलीकमनृतं वचनं भाषते सा उपघातनिःसृता यथाऽचौरे चौर इति ॥ वचनमिति शेषः १० ॥ ५१ ॥

उक्तोपघातनिःसृता ॥ तदेवमुपदर्शिता दशाप्यसत्याभेदा इत्युपसंहरति ।

**एवं दसहाऽसचा, भासा उवदंसिया जहासुत्तं ॥ एसावि होइ सच्चा, पसत्थपरिणामजोगेणं ॥ ५२ ॥**

एवमुक्तप्रकारेण, दशधा दशभिः प्रकारैः, असत्या भाषा उपदर्शिता, कथं ?, यथासूत्रं समयपरिभाषामनुल्लङ्घ्येत्यर्थः । दर्शनीयशेषमाह । एषा उपदर्शिता असत्या, सत्यापि प्रशस्तपरिणामयोगेन, तथा हि प्रवचनप्रद्विष्टनृपादिकं प्रति लब्धिमतो महर्षेर्न त्वं नृप इत्यादिक्रोधनिःसृतं वचनं सत्यमेव, न चात्र नृपपदस्य प्रशस्तनृपे लक्षणा, अन्यत्रापि तत्प्रसक्तेरित्येवमन्यत्राप्यूह्यम् ॥ ५२ ॥ नन्वयं कारणभेदकृतः कार्यविभागः,

असत्याभाषाभेदविचारे ९ आख्यायिका-१० उपघातनिःसृताऽसत्यलक्षणस्वरूपादिनिरूपणं सनिदर्शनमसत्याभाषोपसंहारश्च ॥


For Private and Personal Use Only

कारणानि च करणापाटवादीन्यतिरिच्यन्तेऽपि अन्तर्भवन्ति च रागद्वेषमोहेष्वपीत्यत आह ।

**रागेण व दोसेण व, मोहेण व भासई मुसं भासं ॥ तहवि दसहा विभागो, अणाइणिदेससंसिद्धो ॥५३॥**

"**रागेण वा द्वेषेण वा मोहेन वा भाषते मृषां भाषाम्** ॥यदुक्तं॥ "रागाद्वा द्वेषाद्वा, मोहाद्वा ॥ वाक्यमुच्यते ह्यनृतम् ॥ यस्य तु नैते दोषा–स्तस्यानृतकारणं किं स्यात् ॥१॥ इति ।" इदं चावधारणमितरासाधारणकारणनिषेधार्थम्, क्रोधभयादिकषायनोकषायाणां द्वेषे,मायाहास्यादिकषायनोकषायाणां च राग एवान्तर्भावात्,पराभिमतानां भ्रमप्रमादविप्रलिप्साकरणापाटवहेतूनामपि मध्ये, अतस्मिंस्तदध्यवसायरूपस्य भ्रमस्य,चित्तानवधानतारूपप्रमादस्य, इन्द्रियासामर्थ्यरूपकरणापाटवस्य च फलतो मोहे विप्रलिप्सायाश्च द्वेष एवान्तर्भावात् ॥ यद्येवं तर्हि त्रिधैव विभागः क्रियतामत आह । **तथापि दशधा विभागोऽनादिनिर्देशसंसिद्धः** । अयं भावः ॥ सङ्ग्रहाभिप्रायेण त्रिधाविभागसङ्क्षेपेऽप्यनतिविस्तरं सङ्क्षेपरुचितयाभिप्रायसिद्धोऽनादिर्दशधा विभागः, यथाप्रयोगमेव प्रयोगार्हस्तथैव व्यवहारसिद्धेरिति ॥ ५३ ॥ भङ्ग्यन्तरेण चतुर्द्धापि मृषाभाषाविभागमाह ।

**संभावस्स णिसेहो-ऽसंभूयुब्भावणं च अत्थम्मि।अत्थतरं च गरहा,इय चउहा वा मुसा भासा॥५४॥**

**सद्भावस्य निषेधो** धर्मिमात्रे नास्तिप्रतिपादनम्, यथा नास्ति जीवो, नास्ति पुण्यं, नास्ति पापमित्यादि १। **असद्भूतोद्भावनम्** अभ्युपगते धर्मिणि विरुद्धधर्मप्रतिपादनं, धर्म्यभ्युपगमदर्शनार्यैवार्थे इति पदं, यथास्ति जीवः परमणुपरिमाणो व्यापको वेत्यादिः २। **अर्थान्तरं** नाम 'अन्यत्र वस्तुनि अन्यशब्दप्रयोगो,' यथा गव्यश्वशब्दाभिधा-

असत्यभेदानां नयान्तरेण भेदत्रिकेऽन्तर्भावेऽपि दशभेदनिरूपणोपपत्तिः प्रकारान्तरेण चतुर्धा निरूपणं च ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नम् ३। च पुनः, गर्हा 'निन्दाभिप्रायेण नीचत्वव्यञ्जककाणाङ्गताद्यशोभनधर्माणामभिधानं,' यथा काणोऽयं बधिरोऽयमित्यादिः ४। इति अमुना प्रकारेण, चतुर्द्धा वा मृषा भाषा, इत्थं यथायोगं विभागान्तरमपि विभावनीयम् ॥५४॥

अथ मृषाभाषानिरूपणस्य सिद्धत्वं सत्यामृषानिरूपणप्रतिज्ञां चाह ।

**एवमसच्चा भासा, निरूविया पवयणस्स नीईए। सच्चामोसं भासं, अओ परं कित्तइस्सामि ॥५५॥**

स्पष्टा ॥ ५५ ॥ प्रतिज्ञातनिरूपणाया एव सत्यामृषाभाषाया लक्षणपूर्वं विभागमाह ।

**अंसे जीसे अत्थो, विवरीओ होइ तह तहारूवो। सच्चामोसा मीसा, सुअंमि परिभासिआ दसहा ॥५६॥**

**उप्पन्न[1]विगय[2]मीसग[3], जीवम[4]जीवे[5] अ जीवअज्जीवे[6]। तहणंत[7]मीसिया खलु, परित्त[8] अद्धा[9] य अद्धद्धा[10] ॥५७॥**

यस्या भाषायाः, अर्थो विषयः, अंशे देशे, विपरीतो बाधितसंसर्गो, भवति तथा पुनः, तथारूपोऽबाधितसंसर्गो भवति, तच्छब्दस्य यच्छब्देनाक्षेपात्, सा सत्यामृषा श्रुते मिश्रेति परिभाषिता, सत्यत्वेन स्वरूपत आराधकत्वादसत्यत्वेन च स्वरूपतो विराधकत्वात्। युगपत् फलद्वयानुत्पत्तेस्तु कारणान्तरविरहप्रयोज्यत्वादिति दिग्। सा च दशधा उत्पन्नमिश्रिता, विगतमिश्रिता, उत्पन्नविगतमिश्रिता देशेषु जीवमिश्रिता अजीवमिश्रिता जीवाजीवमिश्रिताऽनन्तमिश्रिता प्रत्येकमिश्रिताऽद्धामिश्रिताऽद्धाद्धामिश्रिता चेति। ननु शतकेषु देशेषु पञ्चाशत्सु देशेषु शतं दत्ता इत्याद्यानां धवखदिराशोकद्रुमसमूहे वाऽशोकवनमित्याद्यानां भाषाणां च काऽन्तर्भावः?, उत्पत्तिजीवादिमिश्रितानिदर्शना स्यात् तत्त्वादितिचेत्, सत्यं, उत्पत्तिजीवादीनां क्रियान्तरवस्त्वन्तरा-

असत्याभाषोपसंहारः । असत्यामृषोपक्रमस्तल्लक्षणं भेदविभागश्च ॥

॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्युपलक्षणत्वात्, विशेषस्यैव वा विभागाश्रयणाद्। एतेन ज्ञाने यथा'अतस्मिंस्तदवगाहित्वरूपं भ्रमत्वं' 'तद्वति तदवगाहित्वरूपं प्रमात्वं' चैकत्रैव इदं रजतमिति ज्ञानस्य धर्म्यंशे प्रमात्वाद्रजतांशे च भ्रमत्वात्, एवमघटवत्यपि भूतले भूतलं घटवदिति भाषाया भूतलांशे प्रमाजनकत्वात् घटांशे च भ्रमजनकत्वात्सत्यामृषात्वमित्युक्तावपि न क्षतिः। वस्तुतस्त्वेवं सत्ये(ति) मृषाभेदोच्छेदापत्तिः सर्वस्या अप्यसत्याया अंशे सत्यत्वात्। 'सर्वं ज्ञानं धर्मिण्यभ्रान्तम्' इति न्यायात् धर्म्यंशे प्रमाजनकत्वात्। तस्माद्धर्म्यंशविनिर्मोकेन परिस्थूरभ्रमप्रमाजनकत्वमादायैवैतद्भेदातिरेक इति ध्येयम्। ननु तथापि मूले वृक्षः कपिसंयोगीत्यत्र मूलस्य कपिसंयोगावच्छेदकत्वांशेऽसत्यत्वेऽपि वृक्षस्य कपिसंयोगवत्त्वांशे सत्यत्वात्सत्यामृषात्वं स्यादितिचेत्, न, मूलावच्छिन्नकपिसंयोगवत्त्वांशे मूलावच्छिन्नसमवायसम्बन्धेन वा तदंशेऽप्रमात्वादेवेति दिग्॥ ५६–५७॥ तत्रादावुत्पन्नमिश्रितामेवाह।

सत्यामृषाभेदविचारे सनिदर्शनं १ उत्पन्नमिश्रिता लक्षणस्वरूपादिप्ररूपणम्॥

**उप्पन्नमीसिया सा, उप्पन्ना जत्थ मीसिया हुंति॥ संखाइ पूरणत्थं, सद्धिमणुप्पन्नभावेहिं १॥५८॥**

**सा उत्पन्नमिश्रितेति** विधेयनिर्देशः, **यत्रानुत्पन्नभावैः सार्द्धं संख्यायाः पूरणार्थं उत्पन्ना मिश्रिता भवन्तीत्यनूद्य** निर्देशः, उदाहरणं तु क्वचिदुत्पन्नेषु पञ्चसु दारकेषु दशाभ्यधिकेषु वाऽद्य दश दारका जाता इति स्वयमेव द्रष्टव्यम्, अत्र च दशसङ्ख्यायाः पञ्चसङ्ख्याद्वयात्मिकाया अंशयोरेव बाधाबाधाभ्यां सत्यासत्यत्वं न तु कार्त्स्न्येनान्यतररूपानुप्रवेशः, अत एव श्वस्ते शतं दास्यामीति प्रतिज्ञाय पञ्चाशद्दानोऽपि नादातृवत्सर्वथा मृषाभाषित्वेन व्यवह्रियते इति प्रकृते तथाविधव्यवहारानुरोधान्नानुपपत्तिः। ननु शतं दास्यामीति

५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिज्ञाय पश्चाशद्दाने मृषाभाषित्वं न वास्तवं व्यवह्रियते किन्तु तत्कार्यकारित्वादिरूपं भाक्तमेवात एव तस्य पश्चाशद्दत्वा शतं दत्तमिति गिरा लोकान् साक्षीकुर्वतो मृषाभाषित्वेनैव निग्रह इति चेत्, न, तत्रांशिकमृषाभाषित्वस्याप्यदत्तापलापद्वारा निग्रहप्रयोजकत्वात्, अन्यथा जाताजातविषयभेदेन प्रकृतप्रयोगोच्छेदप्रसङ्गात्, न च दशसङ्ख्यापर्याप्तेरद्य जातेषु बाधात्सर्वथा मृषात्वमन्यथा एको न द्वाविति न स्यादिति वाच्यम्, दशस्वेतत्कालोत्पत्तिकाभेदस्यांशेन संवादादिति दिग् । एवमन्यत्राप्यूह्यम् १ ॥५८॥ उक्ता उत्पन्नमिश्रिता, अथ विगतमिश्रितामाह ।

**सा विगयमीसिया खलु,विगया भन्नंति मीसिया जत्थ । संखाइ पूरणत्थं,सद्धिमविगएहिं अन्नेहिं २।५९**

खल्विति निश्चये, सा भाषा विगतमिश्रिता भण्यते, यत्र यस्यां, विगताः प्रध्वस्ताः पदार्थाः, सङ्ख्यायाः पूरणार्थमन्यैरविगतैरप्रध्वस्तैः, सार्द्धं मिश्रिता भण्यन्ते, यथैकं ग्राममधिकृत्य यन्न्यूनाधिकेषु विगतेष्वद्य दश वृद्धा विगता इत्युदाहरणम् २ ॥५९॥ उक्ता विगतमिश्रिता, अथोत्पन्नविगतमिश्रितामाह । [ ३ ॥६०॥

**उप्पन्नविगयमीसिअ-मेयं पभणंति जत्थ खलु जुगवं ॥ उप्पन्ना विगया वि य, ऊणब्भहिया भणिज्जंति**

एतां भाषामुत्पन्नविगतमिश्रितां प्रभणन्ति, श्रुतधरा इति शेषः, यत्र यस्यां भाषायां, खलु निश्चये, उत्पन्ना विगता अपि च भावा, ऊना अधिका युगपद्भण्यन्ते ॥ उदाहरणं चास्मिन् ग्रामे दश जाता दश च मृता इत्यवधारणानुपपत्तौ द्रष्टव्यम् ३ ॥६०॥ उक्ता उत्पन्नविगतमिश्रिता, अथ जीवमिश्रितामाह । [ ४ ॥६१॥

**सा जीवमिस्सिया खलु, जा भन्नइ उभयरासिविसया वि । वज्जित्तु विसयमन्नं, एसो बहुजीवरासित्ति**

सत्यामृषा-
भेदविचारे
सनिदर्शनं
२विगतमि-
श्रितो३त्प-
न्नविगत-
मिश्रितयोः
सनिदर्शनं
लक्षण-
स्वरूपादि-
प्ररूपणम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा खलु जीवमिश्रिता या उभयराशिविषयापि जीवाजीवसमूहविषयापि, अन्यमजीवाख्यं विषयं वर्जयित्वा एष बहुजीवराशिरिति भण्यते, अत्र हि जीवांशे सत्यत्वमजीवांशे चासत्यत्वम्, न च बहुषु जीवत्सु शङ्खादिष्वल्पेषु च मृतेषु महानयं जीवराशिरित्यभिधाने जीवप्राधान्यविवक्षणान्न दोषो बाहुल्येन प्रयोगोपलम्भादिति वाच्यम्, एवं हि प्रयोगसमर्थनेऽप्युभयीयसमूहे एकीयत्वासमर्थनादुभयीयस्यैकीयत्वनियमेपि प्रतिनियतैकत्वानियमात् । न च प्रतिनियतत्वस्याबोध एव बोधे वा मृषात्वमेव स्यादिति वाच्यम्, बोधसामग्रीमहिम्नैव तद्बोधात्, समूहस्य सामान्यत एकीकृतस्यापि विशेषार्पणया विभेदाच्च तन्मृषात्वमिति पर्यालोचनीयं सूक्ष्मेक्षिकया नयनिपुणैः, एवमन्यत्राप्यवसेयम् ४ ॥ ६१ ॥ उक्ता जीवमिश्रिता, अथाऽजीवमिश्रितामाह । [ ५ ॥६१॥

**साऽजीवमीसिया विय, जा भन्नइ उभयरासिविसया वि । वज्जित्तु विसयमन्नं, एस बहुअजीवरासित्ति**

स्पष्टा । नवरं बहुषु मृतेषु स्तोकेषु च जीवत्सु शङ्खादिषु महानयमजीवराशिरित्येवोदाहरणम् ५ ॥ ६२ ॥

उक्ताऽजीवमिश्रिता, अथ जीवाजीबमिश्रितामाह । [ संखाए ६ ॥ ६३ ॥

**सा उभयमिस्सिया वि य, जीवाजीवाण जत्थ रासिम्मि ॥ किज्जइ फुडो पओगो, ऊणब्भहिआइ-**

उभयमत्र जीवाजीवौ तन्मिश्रितोभयमिश्रितापि सा भवति, यत्र यस्यां, जीवाजीवयोः राशौ, ऊनाभ्यधिकायाः सङ्ख्यायाः स्फुटः प्रकटः प्रयोगः क्रियते, यथा मृतेषु जीवत्सु च शङ्खादिषु एतावन्तोऽत्र मृता एतावन्तश्च जीवन्त्येवेति यथोक्तप्रमाणविसंवादे ६ ॥६३॥ उक्ता जीवाजीवमिश्रिता, अथाऽनन्तमिश्रितामाह ।

सत्यामृषाभेदविचारे ४ जीवमिश्रिता ५ अजीवमिश्रिता ६ जीवाजीवमिश्रितानां सनिदर्शनं लक्षणस्वरूपादिप्ररूपणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**साऽणंतमीसिया वि य, परित्तपत्ताइजुत्तकंदम्मि ॥ एसो अणंतकाओ, त्ति जत्थ सव्वत्थ वि पओगो ७॥**

अनन्तमिश्रितापि च सा भवति, यत्र यस्यां, परित्तानि यानि पत्रादीनि तद्युक्ते कन्दे मूलकादौ, सर्वत्रापि सर्वावच्छेदेनापि, एषोऽनन्तकाय इति प्रयोगः। नन्वत्र मृषात्वमेव, अन्यथा घटपटयोर्द्वयोरिमौ घटौ इति वचो मृषा न स्यादिति चेत्, न, द्वित्वावछिन्नत्वस्याद्वित्वव्यापकत्वरूपस्यैकत्वव्यापकत्वद्वयरूपत्वेनोक्तवचसोऽप्यांशिकसत्यत्वात्समुदायावच्छिन्नत्वस्यापि प्रकृतेऽवयवावच्छिन्नत्वानतिरेकादिति दिग् ७ ॥ ६४ ॥

उक्ताऽनन्तमिश्रिता, अथ परित्तमिश्रितामाह । [ ८ ॥६५॥

**परमपुरिसेहि भणिया, एसा य परित्तमीसिया भासा ॥ जाऽणंतजुअपरित्ते, भण्णई एसो परित्तो त्ति**

एषा च भाषा परमपुरुषैस्तीर्थंकरगणधरप्रभृतिभिः, परित्तमिश्रिता भणिता, एषा केत्याह याऽनन्तेनानन्तकायलेशेन युते म्लानमूलादौ, एष परीत इति भण्यते, इयं हि परीतांशे सत्याऽनन्तांशे चासत्येति सत्यामृषा । स्यादेतत्, परीतानन्तकायोभयसंवलिते एकत्रैतावन्तोऽनन्ता एतावन्तश्च परीता इति यथोक्तप्रमाणविसंवादे परीतानन्तमिश्रिताप्यतिरिच्यते । मैवम्, इयत्तायास्तत्राप्रयोगात्, उभयातिरेकनिमित्तस्य बुद्धिविशेषस्य वाऽभावात्प्रत्येकानन्तप्रयोगनिमित्तं तु वैलक्षण्यमस्त्येव ॥ अत एवाह चूर्णिकारः–"अणंतमिस्सिया जहा कोइ मूलगछोढं(थूडं) दट्ठूणं अन्नं वा कंचि तारिसं भणिज्जा जहा सव्वो एस अणंतकाओत्ति, तस्स मूलपत्ताणि जिण्णत्तणेण परित्तीभूआणि, केवलं तु जलसिंचणगुणेण केइ तस्स किसलया पादुब्भूआ, अओ अणंता परित्तेण मीसिया भन्नइ। परि-

सत्यामृषा-
भेदविचारे
७ अनन्त-
मिश्रिता
८ परित्तमि-
श्रितयोः
सनिदर्शनं
लक्षण-
स्वरूपादि-
वर्णनम् ॥



For Private and Personal Use Only

त्तमीसिया जहा अभिनवउक्खयं मूलगं कोइ परिमिलाणं ति काऊणं भणेज्जा जहा सव्वो एस परित्तो, तत्थ अंता परित्तीभूआ, मज्झपएसा अणंता चेव, एसा परित्तमीसियत्ति" (अनन्तमिश्रिता यथा कश्चिन्मूलकस्थूडं दृष्ट्वा अन्यं कञ्चित्तादृशं भणेत् यथा सर्व एष अनन्तकाय इति तस्य मूलकपत्राणि जीर्णत्वेन परित्तीभूतानि केवलं तु जलसिंचनगुणेन केचित्तस्य किशलयाः प्रादुर्भूता अतो अनन्ताः परित्तत्वेन मिश्रिता भण्यन्ते ॥ प्रत्येकमिश्रिता नाम यथा अभिनवोत्खातं मूलकं कश्चित्परिम्लानमिति कृत्वा भणेत् यथा सर्व एषः प्रत्येकः, तत्राऽन्ताः प्रत्येकीभूताः मध्यप्रदेशा अनन्ता एव एषा प्रत्येकमिश्रितेति ) ॥ अत्र हि जीर्णपत्रत्वं म्लानकन्दत्वं च स्पष्टावेव विवक्षाहेतू उक्तौ। एवं च प्रायिकप्रयोगविवक्षाहेतुं विना यादृच्छिकदुष्टप्रयोगविवक्षाप्रसूतभाषाया मृषात्वमेवावसीयते। तत्त्वं तु बहुश्रुता विदन्ति ८ ॥ ६५ ॥ उक्ता परित्तमिश्रिता, अथाऽद्धामिश्रितामाह—

**सच्चामोसा भासा, सा अद्धामीसिया भवे जत्थ। भन्नइ पओअणवसा, दिवसनिसाणं विवज्जासो९॥६६॥**

सत्यामृषा-भेदविचारे-९ अद्धामिश्रितायाः सनिदर्शनं लक्षणस्वरूपादिप्ररूपणम् ॥

**सा अद्धामिश्रिता सत्यामृषा भाषा भवेत् यत्र प्रयोजनादिवशाद्दिवसनिशयोर्विपर्यासो** भण्यते, यथाऽपरिणत एव दिवसे कश्चित् सहायं त्वरयन् वदति उत्तिष्ठोत्तिष्ठ रजनी वर्त्तते इति। रात्रौ वा वर्त्तमानायां वदति उत्तिष्ठोत्तिष्ठोद्गतः सूर्य इति। नन्वियं मृषैव दिवसे रजनीवर्त्तमानत्वस्य रजन्यां वा दिवससत्त्वस्य बाधात्, वर्त्तमानावदभिधायकवचनस्याऽव्यवहितोत्पत्तिकत्वे लक्षणायां च सत्यत्वमेवेति नातिरेक इति चेत्, न, लक्ष्यतावच्छेदकघटकऽव्यवधानाभावकूटेऽशतो बाधाबाधाभ्यामुभयरूपसमावेशादन्यथा प्रहरान्तरऽव्यवधानेपि तथा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोगप्रसङ्गात् । पदान्तरे लक्षणा च नानुशासनस्वरससिद्धेत्याभाति ९ ॥ उक्ताऽद्धामिश्रिताऽथाद्धाद्धामिश्रितामाह ।

रयणीए दिवसस्स व,देसो देसेण मीसिओ जत्थ ॥ भन्नइ सच्चामोसा, अद्धद्धामीसिया एसा १० ॥६७॥

रजन्या दिवसस्य वा देशः प्रथमप्रहरादिलक्षणो, देशेन द्वितीयप्रहरादिलक्षणेन, यत्र मिश्रितो भण्यते एषा अद्धाद्धामिश्रिता सत्यामृषा, यथा प्रथमपौरुष्यामेव वर्त्तमानायां कश्चित् कञ्चित् त्वरयन् वदति चल मध्यन्दिनो जात इत्यादि । उक्ताऽद्धाद्धामिश्रिता १० ॥ ६७ ॥

तदेवमुपदर्शिताः सत्यामृषाभेदाः ॥ अथैतन्निरूपणसिद्धत्वमसत्यामृषानिरूपणप्रतिज्ञां चाह ।

एवं सच्चामोसा–भेया उवदंसिया समयसिद्धा ॥ भासं असच्चमोसं, अओ परं कित्तइस्सामि ॥६८॥

स्पष्टा ॥ ६८ ॥ अथ प्रतिज्ञातनिरूपणाया एवासत्यामृषाया लक्षणाभिधानपूर्वं विभागमाह । [ सहा ॥६९॥

अणहिगया जा तीसुवि, ण य आराहणविराहणुवउत्ता । भासा असच्चमोसा, एसा भणिया दुवाल–

[1]आमंतणि [2]आणवणी, [3]जायणि तह [4]पुच्छणी य [5]पन्नवणी । [6]पच्चक्खाणी भासा, भासा [7]इच्छाणुलोमा य ॥

[8]अणभिग्गहिआ भासा, भासाय[9]अभिग्गहम्मि बोधव्वा ॥ सं[10]संयकरणी भासा, [11]वायड [12]अव्वायडा चेव ॥

या तिसृष्वपि सत्या-मृषा-सत्यामृषाभाषास्वनधिकृता, एतेन 'उक्तभाषात्रयविलक्षणभाषात्वम्', एतल्लक्षण-मुक्तं । च पुनर्न आराधनविराधनोपयुक्ता एतेनापि परिभाषानियन्त्रितम्,' अनाराधकविराधकत्वं ' लक्षणान्तर-माक्षिप्तम् । एषाऽसत्यामृषा भाषा द्वादशधा भणिता तथा हि–आमन्त्रणी १, आज्ञापनी २, याचनी ३,

सत्यामृषा-भेदविचारे-१० अद्धा-द्धामिश्रि-तायाः स-निदर्शनं लक्षणस्व-रूपादिप्र-रूपणं, स-त्यामृषोप-संहारः, अ-सत्यामृषा-लक्षणोद्दे-शादिनिरू-पणं च ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृच्छनी ४, प्रज्ञापनी ५, प्रत्याख्यानी ६, इच्छानुलोभा ७, अनभिगृहीता ८, अभिगृहीता ९, संशयकरणी १०, व्याकृता ११, अव्याकृता १२, चेति ॥ ६९-७०-७१ ॥ तत्रादावामन्त्रणीमेवाह ।

**संबोहणजुत्ता जा, अवहाणं होइ जं च सोऊणं। आमंतणी य एसा, पण्णत्ता तत्तदंसीहिं १ ॥७२॥**

**या सम्बोधनैः** हे-अये-भो-प्रभृतिपदैर्युक्ता सम्बद्धा, यां च श्रुत्वा अवधानं श्रोतॄणां श्रवणाभिमुख्यम्, सम्बोधनमात्रेणोपरमे किमामन्त्रयसीति प्रश्नहेतुजिज्ञासाफलकं, भवति, एषा तत्त्वदर्शिभिरामन्त्रणी प्रज्ञप्ता तदेवमत्र 'सम्बोधनपदघटिता' इत्येकं लक्षणं 'श्रवणाभिमुख्यप्रयोजकभाषात्वं' चापरं लक्षणं द्रष्टव्यम्, अस्याश्चासत्यामृषात्वे हेतुत्रयमुक्तम्, एषा किलाप्रवर्त्तकत्वात्, सत्यादिभाषात्रयलक्षणवियोगतः, तथाविधद(पुद्ग)लोत्पत्तेरिति, तत्राद्यहेतौ प्रवृत्तिपदेन सत्यादिजन्यप्रवृत्तिविशेषो ग्राह्यो, द्वितीये तु प्रकृतलक्षणमेव, तृतीये तु भाषावर्गणाविशेषजन्यत्वमेतल्लक्षणमभिप्रेतमिति द्रष्टव्यम् ॥ ७२ ॥ उक्ताऽऽमन्त्रणी १॥ अथाऽऽज्ञापनीमाह । [भिण्णा २ ॥ ७३ ॥

असत्यामृषाभेदविचारे १ आमंत्रणी २ आज्ञापनीभाषयोर्लक्षणस्वरूपादिवर्णनम् ॥

**आणावयणेण जुआ, आणवणी पुव्वभणिअभासाओ। करणाकरणाणियमा-दुट्ठविवक्खाइ सा**

**आज्ञावचनम्**, अकरणस्य बलवदनिष्टानुबन्धित्वाभिधायकं करणवचनं पञ्चम्यादिकं (आख्यातविभक्तीनां पाणिनीये लट् लिटादिका, सिद्धहैमे च वर्तमानापञ्चम्यादिसंज्ञा) तेन युक्ता सहिता, आज्ञापनी यथेदं कुर्विति । नन्वस्याः कथं सत्यादितो भेद इत्याचक्षते, आह **पूर्वभणितभाषातः करणाकरणानियमादुष्टविवक्षातः सा भिन्नेति** । अयं भावः, करणनियमे सत्यैवेयं स्यात्, अकरणनियमे तु मृषैव स्यादित्युभयानियमादुभयातिरेको

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दुष्टविवक्षापूर्वकत्वाभावाच्च मृषातिरेकः सत्यामृषात्वप्रतिषेधस्त्वप्रसक्तत्वादेव न कृत इति । नन्वाज्ञाविषये आज्ञां ददतः कथं न सत्यवादित्वं श्रोतुः प्रवृत्त्यभावस्य निमित्तान्तराद्यधीनत्वादिति चेत्, न, प्रवर्त्तकादप्रवृत्तौ परमार्थतोऽसत्यत्वादाज्ञाप्यस्य तथात्वानिर्णये भावभाषात्वनियामकसम्यगुपयोगनिर्वाहाच्चेति दिग् २ ॥ ७३ ॥

उक्ताऽऽज्ञापनी २ ॥ साम्प्रतं याचनीमाह ।

**सा जायणी य णेया, जं इच्छियपत्थणापरं वयणं ॥ भत्तिपउत्ता एसा, विणावि विसयं गुणोवेया ३ ॥७४॥**

यदीप्सितस्य स्वेच्छाविषयस्य, प्रार्थनापरं याचनप्रवणं, वचनं मम भिक्षां प्रदेहीत्यादिरूपं, सा याचनी ज्ञेया, चः समुच्चये, तन्नियमाविषयेऽसत्यैव, यथा अविनीतादावाज्ञापनी । एवञ्च रागाद्यभावेन किञ्चिदपि कस्यचिदददतः तीर्थङ्करान् प्रति “ आरुग्गबोहिलाभं, समाहिवरमुत्तमं दिंतु ” ॥ (आरोग्यबोधिलाभं समाधिवरमुत्तमं ददतु ) इति सूत्रस्थाऽसत्यामृषा याचनी कथं सत्यामृषा स्यादित्यत आह ।

भक्तिप्रयुक्ता एषा याचनी, विषयं विनापि, गुणेन सत्यामृषालक्षणेन, निश्चयतस्तु सत्यान्तःप्रवेशलक्षणेनोपेता युक्ता, न तु दुष्टेति भावः ॥ अत एवोक्तम् (आव० भाष्ये) “भासा असच्चमोसा, णवरं भत्तीइ भासिआ एसा । ण हु खीणपेम्मदोसा, दिंति समाहिं च बोहिं च ॥ १०९५ ॥” (भाषा असत्यामृषा नवरं भक्त्या भाषितैषा । न खलु क्षीणप्रेमद्वेषा ददति समाधिं च बोधिं च) परमार्थतो दातृत्वमपि तेष्वस्त्येव ॥ अत एवोक्तम् ॥ “जं तेहिं दायव्वं, तं दिन्नं जिणवरेहिं सव्वेहिं । दंसणनाणचरित्तस्स, मोक्खमग्गस्स (एसतिविहस्स) उवएसो त्ति ॥ १०९६ ॥” (यत्तैर्दातव्यं तद्दत्तं जिनवरैः सर्वैः । दर्शनज्ञान-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारित्रस्य मोक्षमार्गस्योपदेश इति) न चेदं दातृत्वं गौणम्, दातृत्वान्तरस्य तथात्वे विनिगमकाभावात् प्रार्थितोपाय-प्राप्तावपि तदकरणे च प्रार्थना परमार्थतो मृषैव ॥तदुक्तम्॥ "लद्धिल्लियं च बोहिं, अकरिंतोऽणागयं च पत्थेंतो । अण्णं-दाइं बोहिं, लब्भिसि कयरेण मुल्लेण ॥ ११०० ॥त्ति" (लब्धां च बोधिमकुर्वन्ननागतां च प्रार्थयन् । अन्यामिदानीं बोधिं लप्स्यसे कतरेण मूल्येन) एवं स्वधियाऽभ्यूह्यम् ३ ॥७४॥ उक्ता याचनी ३ ॥ अथ पृच्छनीमाह । [॥७५॥

**जिन्नासियत्थकहणं, परूविया पुच्छणी जिणवरेहिं ४। पन्नवणी पन्नत्ता, विणीयविणयम्मि विहिवाओ५।**

जिज्ञासितस्य ज्ञातुमिष्टस्यार्थस्य कथनं तद्विदः पार्श्वे, जिनवरैः पृच्छनी प्रज्ञप्ता । न च निग्रहार्थं विकल्पो-क्तायाम् "एगे भवं दुवे भवं" इत्यादिसोमिलादिभाषायामव्याप्तिः, छलवाग्भूतायास्तस्या अलक्ष्यत्वात् । 'कुतः आगतः' 'क गमिष्यसि' 'कइविहा णं भंते जीवा पण्णत्ता' इत्यादिभाषाणामेव लक्ष्यत्वात् ४ ॥ उक्ता पृच्छनी, ४॥ अथ प्रज्ञापनीमाह । विनीतः शिक्षितो विनयो येन एतादृशे शिष्ये, यः विधिवादो विध्युपदेशः, सा प्रज्ञा-पनी प्रज्ञप्ता कर्त्तव्यत्वप्रतिपादकः प्रत्ययस्तद्घटितं वा, यथा च विधेः कृतिसाध्यत्वादिकमेवार्थो न त्वपूर्वादि-स्तथा मत्कृतवादरहस्यादाववसेयम् । इह तु न प्रतन्यते ग्रन्थान्तरप्रसङ्गात् । यथा प्राणिवधान्निवृत्ता जीवा दीर्घायुषो भवन्तीति । इदमुपलक्षणं हिंसादिप्रवृत्तो जीवो दुःखितो भवतीत्यादिनिषेधोपदेशस्यापि ॥ उक्तं च ॥ "पाणिवहाउ णियत्ता, हवंति दीहाउआ अरोगा य । एमाई पन्नत्ता, पण्णवणी वीयराएहिं ॥१॥" ति । (प्राणिवधान्निवृत्ता भवन्ति दीर्घायुषोऽरोगाश्च । एवमादि प्रज्ञप्ता प्रज्ञापनी वीतरागैः)एवं च 'भयाप्रयोज्यप्रवृत्तिजनकेच्छाप्रयोजकभाषात्वम्'एतल्ल-

असत्या-मृषाभेद-विचारे ४ पृच्छनी-५ प्रज्ञापनी भाषायोः सनिदर्शनं सोपपत्तिकं लक्षण-स्वरूपादि वर्णनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणम्। आज्ञापनीवारणाय भयाप्रयोज्येति। तादृशेच्छाप्रयोजकत्वं च विधेस्तज्जनकेष्टसाधनताज्ञानजनकतया वाक्यान्तरस्य च विध्युन्नायकतयाऽहिंसापरा दीर्घायुषः स्युरित्याद्युपदेशेषु उद्देश्यविधेयभावमहिम्नैवाहिंसादीर्घायुरादीनां हेतुहेतुमद्भावलाभस्तत एव चाहत्य विवेकिनां प्रवृत्तिरित्यपि वदन्ति ५ ॥ उक्ता प्रज्ञापनी ५॥ अथ प्रत्याख्यानीमाह ।

**पत्थियणिसेहवयणं, पच्चक्खाणी जिणेहि पन्नत्ता ६। णियइच्छियत्तकहणं, णेया इच्छाणुलोमा य ७ ॥७६**

प्रार्थितस्य याचितवस्तुनो, यन्निषेधवचनं, सा जिनैः प्रत्याख्यानी प्रज्ञप्ता, यथा इदं न ददामीत्यादि। प्रार्थितस्येत्युपलक्षणं दुराचरितनिषेधवचनस्यापि पापं न करिष्यामीत्याद्याकारस्य तथात्वात्। तस्मान्निषेधविषये निषेधप्रतिज्ञैव प्रत्याख्यानी ६॥ उक्ता प्रत्याख्यानी ६॥ अथेच्छानुलोमामाह। निजेप्सितत्वं स्वेच्छाविषयत्वं, तत्कथनं चेच्छानुलोमा ज्ञेया, यथा कश्चित् किञ्चित्कार्यमारभमाणः कञ्चन पृच्छति 'करोम्येतदिति'। स प्राह, करोतु भवान् ममाप्येतदभिप्रेतमिति । अत्र चाप्तेच्छाविषयत्वेन स्वेष्टसाधनत्वशङ्काप्रतिरोधेन तन्निश्चयात्स्वेच्छाया अविलम्बेन प्रादुर्भावादिच्छानुलोमत्वम् । यत्रापि शोभनमेतदित्येवोच्यते तत्रापि वक्त्रिच्छाविषयत्वमर्थात् प्रतीयत एव, अथ यत्र जातदीक्षेच्छस्यापि पित्राद्यनुमत्यर्थं गुरुं प्रति प्रश्नस्तत्र च 'यथासुखं मा प्रतिबन्धं कुर्या' इत्युत्तरं तत्र कथमिच्छानुलोमत्वम्, इच्छाया उत्पन्नत्वेन पुनरनुत्पादनादिति ?, मैवं, तत्रोपेयेच्छाया उत्पन्नत्वेऽप्यनुमतिरूपोपाये कालविलम्बरूपाऽनिष्टसाधनत्वशङ्कानिरासेनोपायेच्छोत्पादनेनेच्छानुलोमत्वनिर्वाहात् । 'विध्यादिभिन्नप्रवृत्त्यप्रतिबन्धकवचनत्वमेवेच्छानुलोमत्वम्' इत्यपि कश्चित् ७ ॥७६॥ उक्ता इच्छानुलोमा ७ ॥ अथाऽनभिगृहीतामाह ।



For Private and Personal Use Only

**सा होइ अणभिगहिया,जत्थ अणेगेसु पुट्ठकज्जेसु। एगयराणवहारण-महवा डित्थाइयं वयणं ८॥७७॥**

यत्र यस्याम्, अनेकेषु पृष्टकार्येषु मध्ये, एकतरस्यानवधारणमनिश्चयो भवति, 'एतावत्सु कार्येषु मध्ये किं करोमि ?' इति प्रश्ने 'यत्प्रतिभासते तत्कुरु' इति प्रतिवचने कस्यापि शृङ्गग्राहिकयाऽनिर्द्धारणात्। साऽनभिगृहीता भवति। नन्वेकतरानवधारणं प्रतिषेधवचनेप्यस्तीत्यतिव्याप्तिरिति चेत्, न, प्रकृतप्रवृत्त्यप्रतिबन्धकस्यानवधारणस्य विवक्षितत्वादस्याश्च फलं सर्वेषु कर्मसु तुल्यफलहेतुत्वप्रतिसन्धानेन प्रथमोपस्थित एव झटिति प्रवृत्तिर्न त्वधिकेच्छया कर्मान्तरसामग्रीविलम्बेन तद्विलम्ब इति ध्येयम्। आदेशान्तरमाह, अथवा डित्थादिकं यदृच्छामात्रमूलकं, वचनं अनभिगृहीता। एतन्मते प्रागुक्तं वचनमाज्ञापनीविशेष एवेत्यवधेयम्॥७७॥उक्ताऽनभिगृहीता,अथाभिगृहीतामाह।

**अभिगहिया पडिवक्खो९,संसयकरणी य सा मुणेयव्वा १०। जत्थ अणेगत्थपयं, सोऊणं होइ संदेहो ७८**

अभिगृहीता प्रतिपक्षो विपरीता, प्रस्तावादनभिगृहीताया इति लभ्यते। तथा चानेकेषु कार्येषु पृष्टेषु यदेकतरस्यावधारणम्, इदमिदानीं कर्त्तव्यमिति साऽभिगृहीता, अथवा घट इत्यादिप्रसिद्धप्रवृत्तिनिमित्तकपदाभिधानं सेति द्रष्टव्यम्। उक्ताभिगृहीता, ९॥ अथ संशयकरणीमाह॥ संशयकरणी च सा मुणितव्या ज्ञातव्या, यत्र यस्याम्, अनेकार्थं बह्वर्थाभिधायकं, पदं, श्रुत्वा श्रोतुः सन्देहो भवति। तथा हि–सैन्धवमानयेत्युक्ते सैन्धवपदस्य लवणघोटकादिष्वनेकेष्वर्थेषु शक्तिग्रहादनेकार्थपदजन्यशाब्दबोधे प्रकरणादीनां विशिष्य हेतुत्वेन तद्विरहे शाब्दबोधविरहेऽपि भवति वक्त्रभिप्रायसन्देहाल्लवणानयनं घोटकानयनं वा मम कर्त्तव्यमिति मानसः

असत्या-मृषाभेद-विचारे ८ अनभिगृ-हीता ९ अभिगृ-हिता १० संशयकरणी भाषाणां च सनिदर्शनं लक्षण-स्वरूपादि-वर्णनम्॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्देहः परोक्षसंशयाभ्युपगमे तात्पर्यनिश्चयस्य प्रतिनियतार्थनिश्चयहेतुत्वेन तत्संशये शाब्द एव वा स इतीयं संशयकरणी। 'अनेकार्थपदं श्रुत्वेतिप्रायिकं संशयहेतुत्वमात्रमेव लक्षणम्,' अतः स्थाणुर्वा पुरुषो वेति भाषापि प्रतियोगिपदाभ्यां कोटिद्वयं वाकारेण च विरोधमुपस्थाप्य संशयं जनयन्ती तादृश्येवेति ध्येयम् १० ॥७८॥

उक्ता संशयकरणी, १०॥ अथ व्याकृतामाह। [त्ता १२ ॥७९॥

**भासा असच्चमोसा, पयडत्था वाअडा मुणेयव्वा ११ ॥ अइगंभीरमहत्था, अवाअडा अहव अव्व-**

व्याकृताऽसत्यामृषा भाषा, प्रकटः सुज्ञानोऽर्थो यस्यास्तादृशी, मुणिअव्वा ज्ञातव्या, यथा एष भ्राता देवदत्तस्येत्यादिः। अर्थस्य सुज्ञानत्वं च 'तात्पर्यज्ञानादिबहुहेतुसम्पत्त्यविलम्बेनाचिरकालोत्पत्तिकप्रतिसन्धानविषयत्वं' बोध्यम् ११॥ उक्ता व्याकृता ११ ॥ अथाऽव्याकृतामाह। अतिगम्भीरो दुर्ज्ञानतात्पर्यो महान् अर्थो यस्याः साऽव्याकृता भवति, अथवा बालादीनामव्यक्ता भाषाऽव्याकृता, भवति १२ ॥ ७९ ॥

उक्ताऽव्याकृता, १२ ॥ तदभिधानाच्चाभिहिता द्वादशाप्यसत्यामृषाभेदाः ॥ अथोपसंहरति।

**एवमसच्चामोसा, दुवालसविहा परूविआ सम्मं॥ दव्वम्मि भावभासा, तेण समत्ता समासेणं ॥८०॥**

स्पष्टा ॥ ८० ॥ अथैतासां भाषाणां मध्ये केषां काः सम्भवन्तीति प्रसङ्गादाह। [रहियाणं ॥ ८१ ॥

**सव्वावि हु सुरनारय-नराण विगलिन्दियाण चरमा य। पंचिंदियतिरियाणवि, सा सिक्खालद्धि-**

सुरनारकनराणां सर्वा अपि हि सत्याद्या भाषाः सम्भवन्ति। विकलेन्द्रिया द्वित्रिचतुरिन्द्रियाः,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां, चतसृणां चरमाऽसत्यामृषा भाषा भवति, तेषां सम्यक्परिज्ञानपरवञ्चनाद्यभिप्रायाभावेन सत्यादिभाषाऽसम्भवात् । शिक्षा संस्कारविशेषजनकः पाठः, लब्धिश्च जातिस्मरणरूपा तथाविधव्यवहारकौशलजनकक्षयोपशमरूपा वा, ताभ्यां ग्रहरहितानां पञ्चेन्द्रियतिरश्चामपि साऽसत्यामृषा भवति, तेऽपि हि न सम्यग्यथास्थितवस्तुप्रतिपादनाभिप्रायेण भाषन्ते नापि परविप्रतारणबुद्ध्या, किन्तु कुपिता अपि परं मारयितुकामा अप्येवमेव भाषन्त इति तेषामसत्यामृषैव भाषा, न च कुपितानां तेषां भाषा क्रोधनिःसृताऽसत्यैव स्यादिति वाच्यम्, अव्यक्तत्वेनानवधारणीयत्वाद्विलक्षणदलजन्यत्वाच्चेत्यवधेयम् । शिक्षालब्धिसहितास्तु शुकसारिकादयोऽन्ये च तिर्यञ्चो यथायोगं चतुर्विधामपि भाषां भाषन्ते शिक्षालब्धिभ्यां व्यक्तभाषोत्पत्तेरित्यवधेयम् ॥ ८१ ॥ ( पञ्चदश्यां गाथायां भावभाषाया द्रव्य–श्रुत–चारित्रभेदात्त्रैविध्यमुक्तं तत्र ) उक्ता द्रव्यभावभाषा, अथ श्रुतभावभाषामाह ।

**तिविहा सुअम्मि भासा, सच्चा मोसा असच्चमोसा य । सम्मं उवउत्तस्स उ, सच्चा सम्मत्तजुत्तस्स ॥८२॥**

भाषापदस्य प्रकरणमहिम्ना भावभाषापरत्वात् श्रुते श्रुतविषया भावभाषा, त्रिविधा त्रिप्रकारा भवति, तद्यथा, सत्या मृषाऽसत्यामृषा च । तत्र सम्यगुपयुक्तस्यागमानुसारेण यथावद्वदतः, तुर्विशेषणे, किं विशिनष्टि बहुश्रुतत्वादिगुणं, सत्या सत्यैव भवति विशुद्धाशयत्वादिति भावः ॥ ८२ ॥

अस्तु सम्यग्दृष्टेरुपयुक्तस्य सत्या, असत्या तु कस्येत्याह । [ अस्स ॥ ८३ ॥

**होइ असच्चा भासा, तस्सेव य अणुवउत्तभावेणं । मिच्छत्ताविट्ठस्स व, अवितहपरिणामरहि–**

भावभाषाया द्रव्य-श्रुत-चारित्र-भेदेषु द्रव्यभाव-भाषोपसंहारः श्रुतभाव-भाषोपक्रम-स्तत्त्रैविध्ये सत्याभाषास्वामि-प्ररूपणं च॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुतभाव-भाषाभे-देषु-असत्या-असत्यामृषा-भाषयोः स्वामिनिरूपणं च ॥

तस्यैव च सम्यग्दृष्टेः, अनुपयुक्तभावेन वदतः श्रुतविषयिणी, असत्या भावभाषा भवति । अथोपयुक्तानां भाषा भावभाषेति पूर्वं प्रतिज्ञानादनुपयुक्तानां तदभिधाने कथं न पूर्वापरविरोध इति चेत्, न, तत्राभिलापजनकविवक्षारूपोपयोगस्यैव ग्रहणादत्र च हेत्वाद्युपयोगाभावस्य ग्रहणेनाऽविरोधात् । सर्वथानुपयोगे तूष्णीम्भावप्रसङ्गात् । हेत्वाद्यनुपयोगे कथमहेतुकं वदेदिति चेत्, विपरीतव्युत्पत्तेरिति गृहाण । वाऽथवा, अवितथपरिणामरहितस्य सम्यक्श्रुतपरिणामविकलस्य, मिथ्यात्वाविष्टस्योपयुक्तस्यानुपयुक्तस्य वा सर्वापि श्रुतगोचरा भाषाऽसत्या । उन्मत्तवचनवत्तद्वचनस्य घुणाक्षरन्यायेनापाततः संवादेपि प्रमाणत्वेनाव्यवहारात् । कथं तर्हि श्रुते अवतरत्येषा तज्ज्ञानस्य सदसदविशेषादिहेतुनाऽज्ञानत्वादिति ?, सत्यम् । अविशेषितश्रुतपदेनोभयोपग्रहात्, विशेषितस्यैव प्रातिस्विकरूपानुप्रवेशेनाभिलापादिति दिग् ॥ तदिदमाह भगवान् भद्रबाहुः ॥"सम्मदिट्ठी उ सुअं–मि अणुवउत्तो अहेउअं चेव । जं भासइ सा मोसा, मिच्छदिट्ठीवि य तहेव ॥२८०॥" त्ति (दश० अ० ७ निर्यु०) (सम्यग्दृष्टिस्तु श्रुतेऽनुपयुक्तः अहेतुकमेव । यद् भाषते सा मृषा मिथ्यादृष्टिरपि च तथैव इति ) अहेतुकं तन्तुभ्यः पट एव भवतीत्यादि ॥ ८३ ॥ अथाऽसत्यामृषा श्रुतभावभाषा कस्येत्याह ।

**उवरिल्ले नाणतिगे, उवउत्तो जं च भासइ सुअंमि । सा खलु असच्चमोसा, जं बाहुल्लेण सा सुत्ते ॥८४॥**

यत् श्रुते परावर्त्तनादि कुर्वन्, उपयुक्तो भाषते एषाऽसत्यामृषा यद् यस्मात्कारणात्, सूत्रे सिद्धान्ते, बाहुल्येन प्रायः, सा आमन्त्रण्यादिरूपा, असत्यामृषैवास्तीति, चः पुनः, उपरितने ज्ञानत्रि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केऽवधिमनःपर्यायकेवलज्ञानलक्षणे प्रत्येकं प्रत्येकमुपयुक्तो यद्भाषते साप्यसत्यामृषा, आमन्त्रण्यादिवत्तथाविधाध्यवसायप्रवृत्तेरिति सम्प्रदायः ॥ ननु श्रुतभावभाषायां निरूपणीयायां न ज्ञानत्रिकस्यावसरः केवलज्ञानस्य श्रुतज्ञाननाशं विनाऽनुत्पादादिति चेत्, सत्यम्, द्रव्यश्रुतं प्रतीत्य भावभाषायाः केवलज्ञानेऽपि सम्भवात् ॥ तदुक्तं "केवलनाणेणत्थे, णाउं जे तत्थ पन्नवणजोग्गे। ते भासइ तित्थयरो, वइजोग सुअं हवइ सेसं ॥ ७८ ॥ ति" (केवलज्ञानेनार्थान् ज्ञात्वा ये तत्र प्रज्ञापनायोग्याः। तान्भाषते तीर्थकरो वचोयोगः श्रुतं भवति शेषमिति) [आव० नि०] प्रसङ्गाद्वैतदभिधानमिति ध्येयम् ॥ ८४ ॥ उक्ता श्रुतभावभाषा, अथ चारित्रभावभाषामाह।

**चारित्तविसोहिकरी, सच्चा मोसा य अविसोहिकरी ॥ दो एयाउ चरित्ते, भावं तु पडुच्च णेयाओ ॥८५॥**

**चारित्रविशोधिकरी** यां भाषमाणस्य साधोश्चारित्रमुत्कृष्यत इत्यर्थः। **सा सत्या, मृषा** च यां भाषमाणस्याचारित्रपरिणामो वर्द्धत इत्यर्थः। इदमुपलक्षणं यां भाषमाणस्य चारित्रं तिष्ठति सा सत्याऽसंक्लेशकरी, यां भाषमाणस्य चारित्रं न तिष्ठति सा त्वसत्येत्यपि द्रष्टव्यम्। **द्वे एते भाषे, चारित्रे भावं प्रतीत्य ज्ञेये** द्रव्यतस्त्वन्यासामपि भाषणसम्भवादित्यभिप्रायः ॥८५॥ द्रव्यतोऽपि साधोः सत्यासत्यामृषे एव भाषे वक्तुमनुज्ञाते नान्ये इत्याह।

**दो चेव अणुमयाओ, वोत्तुं सच्चा य असच्चमोसा य ॥ दोन्नि य पडिसिद्धाओ, मोसा य सच्चमोसा य ८६**

स्पष्टा। नवरं प्रतिषेधो विना कारणं, कारणे तु तयोरप्यनुज्ञैवेति द्रष्टव्यम् ॥ ८६ ॥

अनुमतयोरपि द्वयोर्भाषयोर्विनयशिक्षामाह।

साक्षेपपरिहारमसत्यामृषास्वामिप्ररूपणं चारित्रभावभाषाभेदविचारः अनुज्ञातप्रतिषिद्धभाषास्वरूपञ्च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कालाइसंकिया जा, जा वि य सव्वोवघाइणी होइ ॥ आमंतणी य संगा-इदूसिया जा ण तं भासे ८७**

कालशङ्किता याऽनिर्णीतकालसम्बन्धविषया यथा गमिष्यामः स्थास्याम इत्याद्या अनागतकाले, इदं करोमीत्याद्या वर्त्तमानकाले, भवद्भिः सार्द्धमागतोऽहमिदं चाऽभ्यधामित्याद्या वा ( अतीतकाले ) तां न भाषेत। तथा भावनिश्चयाभावेन व्यभिचारतो मृषात्वोपपत्तेर्विघ्नतोऽगमनादौ गृहस्थमध्ये लाघवादिप्रसङ्गाच्च। यदि पुनरुत्सर्गतो निषिद्धमपि नक्षत्रादियोगं गृहस्थानां पुरः कथयेत् तदा निमित्तादेष्यत्कालज्ञानेपि विध्याराधनार्थमेवं वदेत् यदद्य यथेदं निमित्तं दृश्यते तथा वर्षेण भवितव्यम्, अमुको वाऽऽगमिष्यतीति । पद(र)निश्चितापि च त्रिष्वपि कालेषु शङ्कितैव यथा देवदत्त इदं करिष्यतीत्याद्येति तामपि न वदेत्। कथं पुनः परनिश्चितां वदेदिति चेत्, इत्थम्। अयमेवं भणत्यागमिष्यामीति न पुनर्ज्ञायते आगमिष्यत्येवेति। कालादीत्यादिना देशादिपरिग्रहो, यथाऽत्रै(द्यै)व या(स्था)स्याम इत्यादि। शङ्कितेत्युपलक्षणम्, अनवधृतमप्यर्थं न वदेत्, अवधृतं तु निमित्तादिना कथयेत्, अनवधृते तु गन्धादौ परस्य तदनुभवप्रश्ने न विभावयामीत्युत्तरयेत्। या च व्यवहारतः सत्यापि सती काण-पण्डक-व्याधित-स्तेनादिषु काणादिभाषाऽप्रीति-लज्जानाश-स्थिररोगबुद्धि-विराधनादिदोषजननेन कुलपुत्रत्वादिना प्रसिद्धे दासादिभाषा च परप्राणसन्देहोत्पादकतयोपघातिनी भवति तामपि न भाषेत। तथा स्त्रियमधिकृत्य हे आर्यिके! प्रार्जिके! इत्याद्या, तथा हे भट्टे! स्वामिनीत्याद्या, हे होले! गोले! इत्याद्या वा, या सङ्गगर्हा तत्प्रद्वेषप्रवचनलाघवादिदोषजननी, पुरुषमधिकृत्यापि च पुल्लिंगाभिलापेनोक्तरूपा या आमन्त्रणी, तामपि न



For Private and Personal Use Only

भाषेत । कारणे उत्पन्ने स्त्रियं पुरुषं वा नामधेयेनामन्त्रयेत्, तदस्मरणे च हे काश्यपगोत्रे ! हे काश्यपगोत्र ! इत्यादिगोत्राभिलापेन वाऽऽमन्त्रयेत् ॥ ८७ ॥ अन्यच्च ।

पंचिंदियपाणाणं, थीपुरिसानिण्णए वए जाइं । इहरा उ विपरिणामो, जणवयववहारसच्चे वि ॥८८॥

नरनारीगतवाग्विधेरुक्तत्वात् पञ्चेन्द्रियप्राणानां गवादीनां स्त्रीपुरुषानिर्णय इति भावप्रधाननिर्देशात् विप्रकृष्टदेशावस्थितत्वेन मिथः स्त्रीत्वपुरुषत्वानिश्चये सति, जातिं वदेत् । मार्गप्रश्नादौ प्रयोजने उत्पन्ने सत्यसमाद्गोरूपजातात्कियद्दूरेणेदमित्येवमादिलिङ्गाविशिष्टमुभयसाधारणधर्म्मं प्रतिपादयेदन्यथा लिङ्गव्यत्ययेन मृषावादापत्तेः । विना तु कारणमव्यापार एवोचितः साधूनामिति ध्येयम् । ननु यद्येवं लिङ्गव्यत्ययेन मृषावादस्तदा प्रस्तरमृत्तिकाकरकावस्यायादीनां नियमतो नपुंसकत्वे कथमन्यलिङ्गप्रयोगः ?, जनपदव्यवहारसत्याश्रयणादितिचेत्, सत्यम्, किं प्रकृते पाणिपिहित इत्यत आह सत्यपि जनपदव्यवहारसत्ये इतरथा तु विशिष्यानिर्णये एकतरप्रयोगे तु विपरिणामः स्यादहो एते न सुदृष्टधर्माण इति विरुद्धः परिणामः स्यात् गोपालादीनामपि । अतो व्यतिरेके उक्तदोषादन्वये च पृष्टानां साधुसमाचारीकथनेन गुणसम्भवात् यथोक्तमेव विधेयमित्यवधेयम् ॥ ८८ ॥ किञ्च ।

थूलाइसु पुण भासे, परिवूढाईणि चेव वयणाणि । दोहाइसु य तयट्ठय-सिद्धाणि विसेसणाणि वए ॥

स्थूलादिषु मनुष्यपशुपक्षिसरीसृपादिषु, परिवृद्धादीन्येव वचनानि भाषेत कारणे उत्पन्नेपि । परिवृद्धं पलोपचितं सञ्जातं प्रीणितं महाकायं वा परिहरेदित्यादौ स्थूलादीन् परिवृद्धादिशब्देन ब्रूयात्, न तु स्थूलोऽयं प्रमे-

दशवैकालिकसप्तमाध्ययनसद्वाक्यशुद्धिगदितभाषाभाषणविवेकः सोपपत्तिकः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुरोऽयं वध्योऽयं पाक्योऽयमिति वदेत्। पाक्यः पाकप्रायोग्यः, कालप्राप्त इत्यन्ये। अप्रीतिव्यापत्त्यादिदोषप्रसङ्गा-ल्लोकविरुद्धत्वाच्च। तथा दोह्यादिष्वप्यर्थेषु साध्यक्रियाभिधायीनि वचनानि न वदेत्, यथा दोह्या गावः, दम्या गोरथका, वाह्या रथयोग्या वेति। आप्तवचनात्तदानीं गोदोहादिकर्त्तव्यत्वनिश्चये श्रोतृप्रवृत्त्यादिनाऽधिकरणलाघवादि-दोषप्रसङ्गात्। दिगुपलक्षणादौ प्रयोजने पुनः, तदर्थकानि दोह्याद्यर्थकानि स्निग्धानि, साध्यविलक्षणानि, विशेषणानि वदेत् यथा रसदा धेनुः, युवा गौः, ह्रस्वो महल्लकः संवहनो वेति। नैवमुक्तदोष इति भावः ॥ ८९ ॥ किञ्च।

**पासायखंभतोरण–गिहाइजोग्गा य णो वए रुक्खे। कारणजाए अ वए, ते जाइप्पभिइगुणजुत्ते॥९०॥**

प्रासाद एकस्तम्भः, स्तम्भस्तु स्तम्भ एव, तोरणानि नगरतोरणादीनि, गृहाणि कुटीरकादीनि, आदिपदात् परिघाऽर्गलानावुदकद्रोणीपीठकचङ्गबेरालाङ्गलमयिकयन्त्रयष्टिनाभिगण्डिकासनशयनयानद्वारपात्रादिपरिग्रहस्तद्योग्यान् वृक्षान्न वदेत्। एतादृशं वदतो हि साधोस्तद्वनस्वामिव्यन्तरात् कोपादिः स्यात्। सलक्षणो वा वृक्ष इति कश्चिदभिगृह्णीयादनियमितभाषिणो लाघवं वा स्यादिति। विश्रमणतदासन्नमार्गकथनादौ कारणजाते च सति तान् जातिप्रभृतिगुणयुक्तान् वदेत्, तथा हि–उत्तमजातय एते वृक्षा अशोकादयः, दीर्घा वा नालिकेरीप्रभृतयो, वृत्ता नन्दिवृक्षादयो, महालया वटादयः, प्रजातशाखाः प्रशाखावन्तो दर्शनीया वेति ॥ ९० ॥ किञ्च।

**ण फलेसु ओसहीसु य, पक्काइवओ वए वयणकुसलो। असमत्थप्परूढाइ, पओअणे पुण वए वयणं॥**

फलेष्वौषधीषु वा, वचनकुशलो वाग्विधिनिपुणः, पक्कादिवचो न वदेत्, तथा हि– पक्कानि पाक-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तान्येतानि फलानि तथा पाकखाद्यानि बद्धास्थीनीति गर्त्तप्रक्षेपकोद्रवपलालादिना विपाच्य भक्षणयोग्यानीति यावत् । तथा **वेलोचितानि** पाकातिशयतो वा ग्रहणकालोचितान्यतः परं कालं न विषहन्त इति यावत् । तथा **टालानि** अबद्धास्थीनि कोमलानीति यावत्। तथा **द्वैधिकानि** पेशीसम्पादनेन द्वैधीभावकरणयोग्यानीति । तथा **पक्का** एताः शाल्याद्या औषध्यस्तथा नीलाश्छविमत्यो वा लवनयोग्या वा भर्जनयोग्या वा पृथुकखाद्या वा इति। एतादृशाननुमतभाषाभाषणे फलादिनिश्रितदेवताकोप इत ऊर्द्ध्वमेतन्नाश एव प्रकारान्तरेणैतद्भोगो न शोभन इत्यवधार्य गृहिप्रवृत्तावधिकरणादिदोषोपपातश्चेति । **प्रयोजने** पुनर्मार्गदेशनादावसमर्थप्ररूढादिवचनं वदेत्, तथा हि—**असमर्था** एते आम्राः फलान्यतिभारेण न शक्नुवन्ति धारयितुमित्यर्थः । फलपक्कार्थप्रदर्शनमेतदप्राधान्येनेति द्रष्टव्यम् । तथा बहुनिर्वर्त्तितफला एते, अनेन पाकखाद्यत्वार्थ उक्तः । तथा बहुसम्भूतफला एतेऽनेन वेलोचितार्थः प्रदर्शितः। तथा भूतरूपा एतेऽनेन टालार्थ उक्तः । न चैवमितोपि प्रागुक्तार्थप्रतीतिपूर्वकप्रवृत्तावधिकरणादिदोषप्रसङ्ग इति वाच्यम् , साक्षादधिकरणत्वादिप्रवृत्तिजनकवचनस्यैव निषिद्धत्वात् । प्रकृते तु शुद्धाशयेन कारणतो भाषणे कथञ्चित्परकीयकुप्रवृत्त्या दोषाभावात्, अन्यथातिप्रसङ्गादिति दिक् । औषधिनिर्देशेप्येवं वदेत्, यथा **प्ररूढा** एते **बहुसंभूता** वा निष्पन्नप्राया इत्यर्थः। **स्थिरा** वा निष्पन्ना इत्यर्थः । **उत्सृता** वा उपघातेभ्यो निर्गता इत्यर्थः । **गर्भिता** वाऽनिर्गतशीर्षका इत्यर्थः। **प्रसूता** वा निर्गतशीर्षका इत्यर्थः । **ससारा** वा सञ्जाततन्दुलादिसारा इत्यर्थः। इत्येवमादिविधिः ॥ पक्काद्यर्थयोजनातदाक्षेपपरिहारास्तु प्राग्वत् ॥ ९१ ॥ किञ्च । [ सुहृतित्था ॥ ९२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**[1]संखडि-[2]तेण-[3]नईओ, [1]संखडि-[2]पणियट्ठ-[3]सुबहुसमतित्था। भासेज्जा पओयणओ, ण कज्ज-हंतव्व-**

सङ्खड्यन्ते प्राणिनामायूंषि यस्यां प्रकरणक्रियायां सा **सङ्खडी** पितृदेवताद्यर्थभोजनक्रिया, तां प्रयोजने साधुकथनादौ सङ्कीर्णादौ सङ्खडीत्येव वदेत्, नतु पित्राद्यर्थं कार्येयं क्रियेति वदेत् मिथ्यात्वोपबृंहणदोषप्रसङ्गात्। तद्भावेनाप्रयोगेऽपि तदुपबृंहकत्वेन तत्प्रयोगे निषिद्धाचरणात् ॥ तथा **स्तेनमपि** बन्ध(वध)स्थानं नीयमानं शैक्षकादिकर्मविपाकदर्शनादौ **प्रयोजने पणितार्थं** वदेत् प्राणद्यूतप्रयोजनमित्यर्थः, नतु वध्योऽयमिति वदेत्, तदनुमतत्वेन बह्वपराधतया हन्तॄणां हनननिश्चयप्रसङ्गात् ॥ तथा साधुकथनादिविषये **नद्यः** सुबहुसमतीर्था इति वदेत् न तु सुतीर्था उपलक्षणात् कुतीर्था इति वा न वदेत्। अधिकरणविघातादिदोषप्रसङ्गात् ॥ ९२ ॥ किञ्च।

**पुन्ना उ कायतिज्जा, नईउ णावाहि तारिमाओत्ति॥ ण वए अ पाणिपिज्जा, वए पुणो सुद्धवयणेणं॥९३॥**

**नद्यः पूर्णा** इति **न वदेत्**, तथाश्रवणतः प्रवृत्तस्य निवृत्त्यादिदोषप्रसङ्गात्। तथा **कायतीर्याः** शरीरतरणीया इत्यपि **न वदेत्** साधुवचनतोऽविघ्नप्रवृत्तिधिया निवर्त्तितुमुद्यतानामप्यनिवृत्तिप्रसङ्गात्। **कायपेया** इति सूत्रपाठान्तरे तु **प्रा(पा)णिपेया** इत्यर्थान्नातिविशेष इति ध्येयम्। तथा **नौभिर्द्रोणीभिः, तरणीयास्तरणयोग्या** इत्यपि न वदेत्, अन्यथाविघ्नशङ्कया तत्प्रवृत्तिप्रसङ्गात्। तथा **प्राणिपेयास्तटस्थजन्तुपानीयपानीया** वा इत्यपि न वदेत् तथैव प्रवर्त्तनादिदोषात्! **वदेत् पुनः** साधुमार्गकथनादौ प्रयोजने, **शुद्धवचनेन**, तथा हि-**बहुभृता** एताः प्रायशो भृता इत्यर्थः। तथा **बह्वगाधाः** प्रायोगम्भीरा इत्यर्थः। तथा **बहुसलिलोत्पीडोदकाः** प्रतिश्रोतो-

For Private and Personal Use Only

वाहितापरसरित इत्यर्थः । तथा बहुविस्तीर्णोदकाः स्वतीरप्लावनप्रवृत्तजला इत्यर्थः । अत्र यद्प्येतादृशशुद्धवचनार्थैदम्पर्यपरिज्ञाने श्रोतॄणां प्रवृत्तिनिवृत्त्यादिपूर्वोक्तदोषतादवस्थ्यं तदाऽऽगतप्रश्नापेक्षया तूष्णीम्भावे च प्रयोजनासिद्धेर्न वेद्म्यहमित्युत्तरप्रदाने च प्रत्यक्षमृषावादित्वेन प्रवचनोड्डाहतत्प्रद्वेषादिदोषोपनिपातस्तथाप्येतादृशस्थले संमुग्धमेवोत्तरं देयमित्यभिप्रायेणैतदभिधानं ॥ तदिदमाह भगवान् दशवैकालिकचूर्णिकारः ॥ "तम्हा बहुवाहडाई भणेज्जा तमवि तुरियमवक्कमंतो भणेज्जा जहा ण विभावेइ किमवि एस भणतित्ति ॥" ( तस्माद् बहुव्याहृ( भृ ) तादीन्भणेत्तमपि त्वरितमपक्रामन्भणेद्यथा न विभावयति किमप्येष भणतीति ) तथा चैतादृशसंमुग्धवचनाद्व्युत्पन्नानां प्रश्नोद्यतमुनीनां प्रयोजनसिद्धिरितरेषां त्वनुषङ्गतोऽपि नाधिकरणप्रवृत्तिरपरिज्ञानादिति सर्वमवदातम् ॥ ९३ ॥ किञ्च ।

**सावज्जे सुकडाई, ण वए सुकए वए अ तं वयणं ॥ अणवज्जं चिय भासे, सम्मं णाऊण विहिभेयं ॥९४॥**

**सावद्ये आरम्भमये कार्ये, सुकृतादिवचनं न वदेत्।** तथा हि सुष्ठु कृतमेतत्सभादि, सुष्ठु पक्वमेतत् सहस्रपाकादि, सुष्ठुच्छिन्नमेतद्वनादि, सुष्ठु हृतं क्षुद्रस्य वित्तं, सुष्ठु मृतः प्रत्यनीकः, सुष्ठु निष्ठितं वित्ताभिमानिनो वित्तं, सुष्ठु सुन्दरा कन्या इत्यादि न भाषेत मुनिः, अनुमत्यादिदोषप्रसङ्गात् ॥ सुकृते निरवद्ये तु तत्सुकृतादिवचनं वदेत् । तथा हि–सुष्ठु कृतं वैयावृत्त्यमनेन, सुष्ठु पक्वं ब्रह्मचर्यमस्य साधोः, सुष्ठु च्छिन्नं स्नेहबन्धनमनेन, सुष्ठु हृतं शिक्षकोपकरणमुपसर्गे, सुष्ठु मृतः पण्डितमरणेन साधुः, सुनिष्ठितं कर्माऽप्रमत्तसंयतस्य,

दशवैकालिकसप्तमाध्ययनसद्वाक्यशुद्ध्यादिगदितभाषाभाषणविवेकः सोपपत्तिकः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुष्ठु सुन्दरा साधुक्रियेत्यादि। तथा क्वचिद्व्यवहारे प्रक्रान्ते पृष्टोऽपृष्टोवा साधुर्नैवं वदेत् यदुतैतत्सर्वोत्कृष्टं स्वभावेन सुन्दरमित्यर्थः। परार्घं उत्तमार्घं महार्घं क्रीतमिति भावः। अतुलं नास्तीदृशमन्यत्र क्वचिदित्यर्थः। असंस्कृतं सुलभमीदृशमन्यत्रापीत्यर्थः। अवक्तव्यं अनिर्वचनीयगुणोपेतमित्यर्थः, अचिन्त्यमप्रीतिकरं वेत्यादि। एतादृशभाषणेऽधिकरणान्तरायादिदोषप्रसङ्गात्। तथा सुक्रीतमेतत्, सुविक्रीतमेतत्, अक्रयार्हमेवैतत्, क्रयार्हमेवैतत्, तथेदं समर्घं भविष्यति, महार्घं वा भविष्यति इत्यादि न वदेत् अप्रीत्यधिकरणादिदोषप्रसङ्गात्। अभिधानप्रयोजने तूपस्थिते सम्यक्तात्पर्यशुद्ध्या विधिभेदं विधिविशेषं ज्ञात्वा निरवद्यमवभाषेत तथा हि–ग्लानप्रयोजने प्रयत्नपक्वमेतत् सहस्रपाकादीति वदेत्। प्रयत्नच्छिन्नमेतद्वनादीति साधुनिवेदनादौ वदेत्। तथा प्रयत्नसुन्दरा कन्येति दीक्षिता सती सम्यक्पालनीयेत्यर्थः। तथा सर्वमेव वा कृतादि कर्मनिमित्तमालपेत्, गाढप्रहारं च क्वचित्प्रयोजने गाढप्रहारं ब्रूयादेवं हि तदप्रीत्यादयो दोषाः परिहृता भवन्तीति॥ व्यवहारं पृष्टश्च साधुरेवं भाषेत यदुत नाहं भाण्डमूल्यविशेषं जानामि न चात्र क्रयविक्रयार्हं वस्तु ददामि कस्यचित्किं वा विरतानामस्माकमीदृशेन व्यापारेणेति ॥ ९४ ॥ किञ्च।

**अब्भुचयं ण भासिज्जा, आणत्तिं अजयाण य। असाहुलोगं साहुत्ति सदोसासंसणं तहा ॥९५॥**

केनचित्कस्यचित्सर्वमेतत् त्वया वक्तव्यमिति सन्दिष्टे सर्वमेतद्वक्ष्यामीति सन्देशं प्रयच्छन् सर्वमेतदिति वाऽभ्युचयं न भाषेत न वदेत्, सर्वस्य तथास्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वेनासम्भवाभिधाने द्वितीयव्रतवि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राधनप्रसङ्गात्। तथाच सर्वे साधवो गता न गता वेत्यादिस्थले सर्वथानुविचिन्त्यैव वदेत् यथाऽसम्भवाभिधानं न भवतीति। ननु सर्वो ग्रामो भोक्तुमागत इत्यादिवत् सर्वमेतदित्यादिकं नासम्भवग्रस्तमिति चेत्, न, समुच्चये तथाविधविवक्षाभावाच्चारित्रभावावस्थायामेतादृशाप्रयोगाच्च। तथाऽयतानामसंयतानां, आज्ञप्तिम् 'आस्व एहि कुरु वेदं कार्यं शेष्व तिष्ठ व्रज' इत्यादिरूपां न भाषेत न वदेत् अयतनाप्रवर्त्तनप्रयुक्तदोषप्रसङ्गात्। तथाऽसाधुलोकमाजीविकादिकं लोकैः साधुशब्देनाभिलप्यमानं साधुरयमिति न वदेत् मृषावादप्रसङ्गात्। नचैतद्वचनस्य रूपसत्याद्यन्तर्गततया न मृषात्वमिति शङ्कनीयम्, गुणोपबृंहणप्रवणानामीदृशानामन्वर्थशब्दानामविषये मोहादेव प्रयुज्यमानत्वेन दोषानुबन्धितया च मृषात्वोपपत्तेः। अत एव स्वविषये एतत्प्रयोगस्य गुणानुबन्धितया ज्ञानदर्शनचारित्रसम्पन्ने भावसाधौ साधुपदानभिलापेन उपबृंहणातिचारदोषप्रसङ्ग इति वदन्ति। ननु यद्येवं बोटिकनिह्नवादेरन्वर्थसाधुशब्दाभिधानं मृषा, कथं तर्हि पाषाणमय्यां प्रतिमायामन्वर्थार्हदादिपदगर्भस्तुतिकरणं सार्थकमिति चेत्, आः पाप? वृथा छिद्रान्वेषणमेतत्, उक्तस्थलेऽसंयतोपबृंहणदोषाभावतः स्थापनासत्यस्यानिरुद्धप्रसरतया दोषाभावात्। अन्यथा निक्षेपनैष्फल्यादिति दिग्। तथा सदोषाशंसनं न वदेत्। तथा हि। देवासुरनृतिरश्चां विग्रहे अमुकस्य जयो भवतु मा वाऽमुकस्य भवत्विति नालपेदधिकरणतत्स्वामिद्वेषादिदोषप्रसङ्गात्। तथा वातवृष्टिशीतोष्णक्षेमसुभिक्षादिकमपि भवतु मा वेति च न वदेत् विनातिशयप्राप्तं वचनमात्रात् फलाभावेन मृषावादप्रसङ्गात्। तथाभवनेऽप्यार्त्तध्यानभावात्, अधिकरणादिदोषप्रसङ्गात्, वातादिषु सत्सु सत्त्वपीडापत्तेश्च, कथं तर्हि "शिवमस्तु सर्वजगत" इति?,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिवेऽपि चौरादीनां चौर्याद्यन्तरायदोषादिति चेत् ?, सदाशयवशादेतादृशप्रार्थनाया असत्यामृषाङ्गतया श्रुतभावभाषायामधिकारेपि प्रकृतानुपयोगादिति दिग् ॥ ९५ ॥ किञ्च ।

**मेहं णहं मणुस्सं वा, देवत्ति न लवे मुणी ॥ उण्णए अंतलिक्खत्ति, इड्ढिमंतत्ति वा वए ॥ ९६ ॥**

मेघं नभो मनुष्यं वा राजानं देव इति मुनिर्न लपेत् मिथ्यावादलाघवादिदोषप्रसङ्गात् । कथं तर्हि वदेदित्याह मेघं दृष्ट्वा उन्नतोयं मेघ इति वदेत् । आकाशं पुनरिदमन्तरिक्षमिति, राजानं च ऋद्धिमानयमिति । कारणे च राजस्तुत्यादौ देवादिपदैरपि राजाद्यालपनं न विरुद्ध्यत इति ध्येयम् ॥ ९६ ॥ तदेवमुक्तः कियाँश्चिदनुमतभाषाभाषणविधिः । अथ कियद्विस्तरतोऽनुशासितुं शक्यमिति सामान्यतो रहस्योपदेशमाह ।

**दोसे गुणे य णाऊणं, जुत्तीए आगमेण य ॥ गुणा जह ण हायंति, वत्तव्वं साहुणा तहा ॥ ९७ ॥**

यथा गुणाश्चारित्रपरिणामवृद्धिहेतवो, न हीयन्ते अपकर्षं नाशं वा न गच्छन्ति, तथा साधुना वक्तव्यम् । किं कृत्वा आगमेन युक्त्या च दोषान् गुणांश्च ज्ञात्वा । एवञ्च गुणदोषचिन्तया क्वचिद्विहितस्याकरणे विपर्यये वा न दोषः । पुष्टालम्बनाश्रयणेनाज्ञानतिक्रमात् ॥ अत एवोक्तं॥ "तम्हा सव्वाणुन्ना, सव्वणिसेहो य पवयणे नत्थि । आयं वयं तुलिज्जा, लाहाकंखिव्व वाणियओ ॥३९२॥" त्ति (तस्मात्सर्वानुज्ञा सर्वनिषेधश्च प्रवचने नास्ति । आयं व्ययं च तोलयेल्लाभाऽऽकांक्षीव वाणिजक उप०) ॥९७॥ अथ कीदृशस्येयं भाषा चारित्रं विशोधयतीत्याह । [ चरणं विसुद्धं ॥९८॥

**महेसिणो धम्मपरायणस्स, अज्झप्पजोगे परिणिट्ठिअस्स । पभासमाणस्स हियं मियं च, करेइ भासा**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मे चारित्रधर्मे परायणस्य नित्यमुद्युक्तस्य, तथाऽध्यात्मयोगे परद्रव्यप्रवृत्तिनिवृत्तिप्रादुर्भूतप्रभूतगुणग्रामरामणीयकमये स्वस्वभावसमवस्थाने, परिनिष्ठितस्य प्राप्तनिष्ठस्य, तथा हितमायतिगुणावहं, मितं च स्तोकं, प्रकर्षेणावसरोचितत्वादिलक्षणेन भाषमाणस्य महर्षेर्भाषा चरणं चारित्रं, विशुद्धं विपुलनिर्जराप्रवणं, करोति ॥ ९८ ॥ ततः किमित्याह ।

चरित्तसोहीइ खवित्तु मोहं, लद्धुं तओ केवलनाणलच्छिं ।
सेलेसिजोगेण सुसंवुडप्पा, अणुत्तरं पावइ मुक्खसुक्खं ॥ ९९ ॥

चारित्रशुद्ध्या मोहमष्टाविंशतिप्रकृतिमयं कर्म, क्षपयित्वा ततस्तदनन्तरं, केवलज्ञानलक्ष्मीं लब्ध्वा सयोगिकेवलिभावमनुभूयोत्कर्षतः पूर्वकोटीं यावद्विहृत्य, शैलेशीयोगेन योगत्रयनिरोधकरणेन, सुसंवृतः सर्वसंवरभागात्मा यश्चैतादृशो महर्षिः, अनुत्तरं सकलसांसारिकसुखसमूहादनन्तगुणत्वेन दुःखलेशासंपृक्ततया चातिशायितं, मोक्षसौख्यं, प्राप्नोति ॥ ९९ ॥ तदेवं चारित्रशुद्धेर्मोक्षफलत्वमुक्त्वा प्रकृतग्रन्थप्रयोग(जन)माह ।

तम्हा बुहो भासरहस्समेयं, चरित्तसंसुद्धिकए समिक्ख ।
जहा विलिज्जंति हु रागदोसा, तहा पवट्टिज्ज गुणेसु सम्मं ॥ १०० ॥

तस्मादुक्तहेतोः, बुधो विचक्षणः, चारित्रशुद्धेः कृते एतद्भाषारहस्यं समीक्ष्य हुर्निश्चये, यथा रागद्वेषौ विलीयेते तथा सम्यग् गुणेषु चारित्रपालनोपायेषु, प्रवर्त्तेत नाऽत्रोपायप्रवृत्तावेकान्तः, किन्तु रागद्वेषपरित्याग-

भाषाविशुद्धेः परम्परया यावन्मोक्षपर्यन्तफलनिरूपणं तदभिलाषिणश्च प्रवृत्त्युपदेशः ॥



For Private and Personal Use Only

लक्षणफल एव, फलेच्छायाः फलसिद्धिं विनाऽपूर्णत्वाद्, उपायेच्छापूर्तेस्त्वन्यतरसम्पत्त्यापि निर्वाहात् । न च फल-
विशेषसम्पत्तये उपायविशेषे प्रवृत्तिनियमः फलविशेषस्यैवासिद्धेः । राजरङ्कमरणयोरविशेषदर्शनेनायुःकर्मण इव कर्मा-
न्तरस्यापि क्षये विशेषाभावात् । न च प्रतियोगिविशेषकृतस्तद्विशेषः । प्रतियोगिविशेषस्यापि तथाविधस्यासिद्धेः,
स्वरूपात्मकस्य च तस्य हेतुहेतुमद्भावभेदानियामकत्वात् । कथं तर्हि व्यभिचाराद्बहूनामुपायानामेकफलहेतुत्वमिति
चेत्?, किं न दृष्टं तृणारणिमणीनामेकवह्निहेतुत्वं, तृणादिजन्यवह्नौ जातिविशेषोऽस्त्येवेति चेत्, न, अनुपलम्भात् । जाति-
त्रयकल्पनात् एकशक्तिकल्पनाया एव लघुत्वाच्च । यथा तृणादीनामेकशक्त्या वह्निहेतुत्वं तथा बहूनामप्युपायानामेक-
यैव शक्त्या कर्मक्षयहेतुत्वं नानुपपन्नमिति सर्वमवदातम् ॥ १०० ॥ अथ ग्रन्थं सम्पूर्य तच्छोधनाय गीतार्थान् प्रार्थयति ।

**एवं (यं) भासरहस्सं, रइयं भविआण तत्तबोहत्थं । सोहिंतु पसायपरा, तं गीयत्था विसेसविऊ ॥ १०१ ॥**

स्पष्टा ॥ १०१ ॥ (॥ अथ ग्रन्थकारगुरुपरम्पराप्रशस्तिः ॥)

**सोम इव गोविलासैः, कुवलयबोधप्रसिद्धमहिमकलः । श्रीहीरविजयसूरि–स्तपगच्छव्योमतिलकमभूत् ॥ १ ॥**
**श्रीविजयसेनसूरि–स्तत्पट्टोदयरविरिवाभूत् । यस्य पुरो द्योतन्ते, शलभा इव भान्ति कुमतिगणाः ॥ २ ॥**
**तत्पट्टनन्दनवने, कल्पतरुर्विजयदेवसूरिवरः । विबुधैरुपास्यमानो, जयति जगज्जन्तुवाञ्छितदः ॥ ३ ॥**
**तत्पट्टरोहणगिरौ, सुररत्नं विजयसिंहसूरिगुरुः । भूपालभालतिलकी–भूतक्रमनखरुचिर्जयति ॥ ४ ॥**
**राज्ये प्राज्ये विजयिनि, तस्य जनानन्दकन्दजलदस्य । ग्रन्थोऽयं निष्पन्नः, सन्नयभाजां प्रमोदाय ॥ ५ ॥**

यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया, भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरः, सोऽयं न्यायविशारदः स्म तनुते भाषारहस्यं मुदा ॥ ६ ॥
कृत्वा प्रकरणमेतत्, यदवापि शुभाशयान्मया कुशलम् । तेन मम जन्मबीजे, रागद्वेषौ विलीयेताम् ॥ ७ ॥
सूर्याचन्द्रमसौ याव-दुदयेते नभस्थले । तावन्नन्दत्वयं ग्रन्थो, वाच्यमानो विचक्षणैः ॥ ८ ॥
असतां कर्णयोः शूलं, सतां कर्णामृतच्छटा । विभाव्यमानो ग्रन्थोऽयं, यशोविजयसम्पदे ॥ ९ ॥

न्यायविशारद–न्यायाचार्य–कूर्चालसरस्वती–श्रीहरिभद्रसूरिलघुबान्धव–महामहोपाध्याय
श्रीयशोविजयगणिप्रणीतं स्वोपज्ञविवरणविभूषितं श्रीभाषारहस्यप्रकरणं सम्पूर्णम् ॥

( मूलगाथासंस्कृतानुवादः ) प्रणम्य पार्श्वजिनेन्द्रं भाषारहस्यं समासतो वक्ष्ये ॥ यज्ज्ञात्वा सुविहिताश्चरणविशोधिमुपलभन्ते ॥ १ ॥ नामादयो निक्षेपाश्चत्वारश्चतुरैरत्र ज्ञातव्याः ॥ द्रव्ये त्रिविधा ग्रहणं तथा च निसरणं पराघातः ॥ २ ॥ गृह्णाति स्थितानि जीवो नैव चास्थितानि भाषाद्रव्याणि ॥ द्रव्यादिचतुर्विशेषो ज्ञातव्यः पुनर्यथायोगम् ॥ ३ ॥ स्पृष्टावगाढानन्तराणुबादरोर्ध्वाधस्तिर्यग्गानि ॥ आदिविषयानुपूर्वीकलितानि षड्दिग्भ्य एव ॥ ४ ॥ भिन्नानि कश्चिन्निसृजति तीव्रप्रयत्नः, परोऽभिन्नानि ॥ भिन्नानि यान्ति लोकमनन्तगुणवृद्धियुक्तानि ॥ ५ ॥ भिद्यन्तेऽभिन्नानि अवगाहनवर्गणा असंख्येयाः ॥ गत्वा वा योजनानि संख्येयानि विलीयन्ते ॥ ६ ॥ स भेदः पञ्चविधः खंडः प्रतरश्च चूर्णिकाभेदः ॥ अनुतटिकाभेदस्तथा चरिम उत्कारिकाभेदः ॥ ७ ॥ अयःखंडवंशपिप्पलीचूर्णह्रदैरण्डबीजभेदसमाः ॥ एते भेद-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विशेषा दृष्टास्त्रैलोक्यदर्शिभिः ॥ ८ ॥ भवन्त्यनन्तगुणानि द्रव्याण्येभिर्भिद्यमानानि ॥ पश्चानुपूर्वीभेदात्सर्वस्तोकानि चरमाणि ॥ ९ ॥ द्रव्यैर्निसृष्टैस्तत्प्रायोग्याणां किल पराघातः ॥ विश्रेण्यामेको मिश्रश्च समायां श्रेण्याम् ॥ १० ॥ प्राधान्यं द्रव्यस्य चाप्राधान्यं तथैव क्रियाणाम् ॥ भावस्य चावलम्ब्य ग्रहणादिषु द्रव्यव्यपदेशः ॥ ११ ॥ अन्यथा विरुध्यते किल द्वाभ्यां च समयाभ्यां भाषते भाषां ॥ वचोयोगप्रभवा सा भाषा भाष्यमाणेति ॥ १२ ॥ उपयुक्तानां भाषा ज्ञातव्याऽत्र भावभाषेति ॥ उपयोगः खलु भावोऽनुपयोगो द्रव्यमिति कृत्वा ॥ १३ ॥ अवधारणी चैषा श्रुताज्ज्ञातमेतदिति व्यवहारात् ॥ सम्भावना च निर्णयहेत्वसाध्येति द्रष्टव्यम् ॥ १४ ॥ भावेपिभवति त्रिविधा द्रव्ये च श्रुते तथा चारित्रे च ॥ द्रव्ये चतुर्धा सत्याऽसत्या मिश्राऽनुभया च ॥१५॥ प्रथमे द्वे पर्याप्ते उपरितने च द्वे अपर्याप्ते ॥ अवधारयितुं शक्यते पर्याप्ताऽन्या च विपरीता ॥ १६ ॥ भाषा चतुर्विधेति च व्यवहारनयाच्छ्रुते प्रज्ञानम् ॥ सत्या मृषेति भाषा द्विविधैव हन्दि निश्चयतः ॥ १७ ॥ इत एवाऽऽज्ञापनी जात्या केवला च निर्दिष्टा ॥ प्रज्ञापनी प्रज्ञापनासूत्रे तत्त्वार्थदर्शिभिः ॥ १८ ॥ आराधनां प्रतीत्यापि परिभाषैव चतुर्विभागे ॥ सत्यान्तर्भाव एव चतुर्णामाराधकत्वं यत् ॥१९॥ एवं चतुर्विधत्वं प्रकल्पितं भवेद्यदि मतिरेषा ॥ सा न यतो व्यवहारानुगतं वस्त्वपि श्रुतसिद्धम् ॥ २० ॥ तस्मिंस्तद्वचनं खलु सत्याऽवधारणैकभावेन ॥ आराधनी चैषा श्रुते परिभाषिता दशधा ॥ २१ ॥ जनपदसम्मतस्थापनायां नाम्नि रूपे प्रतीत्यसत्यं च। व्यवहारभावयोगे दशममौपम्यसत्यं च ॥ २२ ॥ या जनपदसङ्केतादर्थं लोकस्य प्रत्याययति ॥ एषा जनपदसत्या प्रज्ञप्ता धीरपुरुषैः ॥ २३ ॥ नातिक्रम्य रूढिं या योगार्थेन निश्चयं करोति ॥ सम्मतसत्यैषा पङ्कजभाषा यथा पद्मे ॥ २४ ॥ स्थापनायां वर्तमानाऽवगतभावार्थरहितसंकेतात् ॥ स्थापनासत्या भण्यते यथा जिनप्रतिमायां जिनशब्दः ॥ २५ ॥ भावार्थविहीनैव नामाभिप्रायलब्धप्रसरा या ॥ सा भवति नामसत्या यथा धनरहितोपि धनवान् ॥ २६ ॥ एवमेव रूपसत्या नवरं नाम्नि रूपाभिलाषः ॥ स्थापना पुनर्न प्रवर्तते तज्जातीये सदोषे च ॥ २७ ॥ अविरोधेन



For Private and Personal Use Only

मूलगाथा संस्कृतानुवादः ॥

विलक्षणप्रतीत्यभावानां दर्शिनी भाषा ॥ भण्यते प्रतीत्यसत्या यथैकमणु महच्च ॥ २८ ॥ भिन्ननिमित्तत्वतो न च तेषां हन्दि भण्यते विरोधः ॥ व्यञ्जकघटकादिकं भवति निमित्तमपीह चित्रम् ॥ २९ ॥ ते भवन्ति परापेक्षा व्यञ्जकमुखदर्शिन इति न च तुच्छाः ॥ दृष्टमिदं वैचित्र्यं शरावकर्पूरगन्धयोः ॥ ३० ॥ व्यवहारो हि विवक्षा लोकानां या प्रयुज्यते तया ॥ पीयते नदी च दह्यते गिरिरिति व्यवहारसत्या सा ॥ ३१ ॥ सा भवति भावसत्या या सदभिप्रायपूर्वमेवोक्ता ॥ यथा परमार्थः कुम्भः सिता बलाका चैषेति ॥ ३२ ॥ सा भवति योगसत्या उपचारो यत्र वस्तुयोगे ॥ छत्राद्यभावेऽपि हि यथा छत्री कुण्डली दण्डी ॥ ३३ ॥ चरितं च कल्पितं तथा उपमानं द्विविधमत्र निर्दिष्टम् ॥ कल्पितमपि रूपकमिव भावाबाधेन न निरर्थम् ॥ ३४ ॥ आहरणे तद्देशे तद्दोषे तथा पुनरुपन्यासे ॥ एकैकं तच्चतुर्धा ज्ञेयं सूत्राद् बहुभेदम् ॥ ३५ ॥ उपमासत्या सा खलु एतेषु सदुपमानघटिता या ॥ नासम्भविधर्मग्रहदुष्टा देशादिग्रहणात् ॥ ३६ ॥ एवं सत्या भाषा श्रुतानुसारेण वर्णिता चित्रा (चित्तात्) ॥ भाषाया असत्यायाः स्वरूपमथ कीर्तयिष्यामि ॥ ३७ ॥ सत्याया विपरीता भवत्यसत्या विराधिनी तत्र ॥ द्रव्यादयश्चत्वारो भङ्गा दशधा सा पुनः श्रुते भणिता ॥ ३८ ॥ क्रोधान्मानान्मायाया लोभात्प्रेम्णस्तथैव द्वेषाच्च ॥ हास्याद्भयादाख्यायिका-दुपघातान्निश्रिता दशमा ॥ ३९ ॥ सा क्रोधनिश्रि(निःसृ)ता खलु क्रोधाविष्टः कथयति यां भाषाम् ॥ यथा न त्वं मम पुत्रोऽथवा सर्वमपि तद्वचनम् ॥ ४० ॥ स्थितिरसबन्धकराणां हन्दि कषायाणामेवानुरूपम् ॥ प्रकृतिप्रदेशकर्म योगा बध्नन्ति न विरूपम् ॥ ४१ ॥ दुष्टतरा वा सत्या क्रोधाविष्टानां येन सप्रसरा ॥ मिथ्याभिनिवेशकृते जीवानां हन्दि सा भवति ॥ ४२ ॥ सा माननिश्रि(निःसृ)ता खलु मानाविष्टः कथयति यां भाषाम् ॥ यथा बहुधनवानहं अथवा सर्वमपि तद्वचनम् ॥ ४३ ॥ मायया निश्रि(निःसृ)ता खलु सा मायाविष्टः कथयति यां भाषाम् ॥ यथैष देवेन्द्रोऽथवा सर्वमपि तद्वचनम् ॥ ४४ ॥ सा लोभनिःसृता खलु लोभाविष्टः कथयति यां भाषाम् ॥ यथा पूर्णमिदं मानं अथवा सर्वमपि तद्वचनम् ॥ ४५ ॥ सा प्रेमनिःसृता खलु प्रेमाविष्टः कथय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ति यां भाषाम् ॥ यथा तवाहं दासोऽथवा सर्वमपि तद्वचनम् ॥ ४६ ॥ सा द्वेषनिःसृता खलु द्वेषाविष्टः कथयति यां भाषाम् ॥ यथा न जिनः कृतकृत्योऽथवा सर्वमपि तद्वचनम् ॥ ४७ ॥ सा हास्यनिसृता खलु हास्यपरिणतः कथयति यां भाषाम् ॥ यथा प्रेक्षकहास्यार्थाय दृष्टेपि न दृष्टमिति वचनम् ॥ ४८ ॥ सा च भयनिःसृता खलु यां भाषते भयवशेन विपरीताम् ॥ यथा नृपगृहीतश्चौरो नाहं चौर इति भणति नरः ॥ ४९ ॥ या कूटकथाकेलिराख्यायिकानिःसृता भवेदेषा ॥ यथा भारतरामायणशास्त्रेऽसम्बद्धवचनानि ॥ ५० ॥ यदुपघातपरिणतो भाषते वचनमलीकमिह जीवः ॥ उपघातनिःसृता सा यथाऽचौरेपि चौर इति ॥ ५१ ॥ एवं दशधाऽसत्या भाषोपदर्शिता यथासूत्रम् ॥ एषाऽपि भवति सत्या प्रशस्तपरिणामयोगेन ॥ ५२ ॥ रागेण वा द्वेषेण वा मोहेन वा भाषते मृषां भाषाम् ॥ तथापि दशधा विभागोऽनादिनिर्देशसंसिद्धः ॥ ५३ ॥ सद्भावस्य निषेधोऽसद्भूतोद्भावनं चार्थे ॥ अर्थान्तरं च गर्हा इति चतुर्धा वा मृषाभाषा ॥ ५४ ॥ एवमसत्याभाषा निरूपिता प्रवचनस्य नीत्या ॥ सत्यामृषां भाषामतः परं कीर्तयिष्यामि ॥ ५५ ॥ अंशे यस्या अर्थो विपरीतो भवति तथा तथारूपः ॥ सत्यामृषा मिश्रा श्रुते परिभाषिता दशधा ॥ ५६ ॥ उत्पन्नविगतमिश्रके जीवेऽजीवे च जीवाजीवे ॥ तथाऽनन्तमिश्रिता खलु प्रत्येकाद्धायां चाऽद्धाद्धायाम् ॥ ५७ ॥ उत्पन्नमिश्रिता सा उत्पन्ना यत्र मिश्रिता भवन्ति ॥ संख्यायाः पूरणार्थं सार्धमनुत्पन्नभावैः ॥ ५८ ॥ सा विगतमिश्रिता खलु विगता भण्यन्ते मिश्रिता यत्र ॥ संख्यायाः पूरणार्थं सार्धमविगतैरन्यैः ॥ ५९ ॥ उत्पन्नविगतमिश्रितामेतां प्रभणन्ति यत्र खलु युगपत् ॥ उत्पन्ना विगता अपि च ऊनाभ्यधिका भण्यन्ते ॥ ६० ॥ सा जीवमिश्रिता खलु या भण्यते उभयराशिविषयापि ॥ वर्जयित्वा विषयमन्यमेषो बहुजीवराशिरिति ॥ ६१ ॥ साऽजीवमिश्रितापि च या भण्यते उभयराशिविषयापि ॥ वर्जयित्वा विषयमन्यमेषो बह्वजीवराशिरिति ॥ ६२ ॥ सोभयमिश्रितापि च जीवाजीवयोर्यत्र राशौ ॥ क्रियते स्फुटः प्रयोगः ऊनाभ्यधिकायाः संख्यायाः ॥ ६३ ॥ साऽनन्तमिश्रितापि च परित्तपत्रादियुक्तकन्दे ॥ एषोऽनन्तकाय इति यत्र सर्वत्रापि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोगः ॥ ६४ ॥ परमपुरुषैर्भणिता एषा च परित्त (प्रत्येक) मिश्रिता भाषा ॥ याऽनन्तयुतपरित्ते भण्यते एषः परीत इति ॥ ६५ ॥ सत्यामृषा भाषा साऽद्धामिश्रिता भवेद्यत्र ॥ भण्यते प्रयोजनवशाद्दिवसनिशयोर्विपर्यासः ॥ ६६ ॥ रजन्यादिवसस्य च देशो देशेन मिश्रितो यत्र ॥ भण्यते सत्यामृषाऽद्धाद्धामिश्रितैषा ॥ ६७ ॥ एवं सत्यामृषाभेदा उपदर्शिताः समयसिद्धाः ॥ भाषामसत्यामृषामतः परं कीर्तयिष्यामि ॥६८॥ अनधिकृता या तिसृष्वपि न चाराधनविराधनोपयुक्ता ॥ भाषाऽसत्यामृषा एषा भणिता द्वादशधा ॥ ६९ ॥ आमन्त्रणी आज्ञापनी याचनी तथा पृच्छनी च प्रज्ञापनी ॥ प्रत्याख्यानी भाषा भाषा इच्छानुलोमा च ॥ ७० ॥ अनभिगृहीता भाषा भाषा चाभिग्रहे बोद्धव्या ॥ संशयकरणी भाषा व्याकृताऽव्याकृता चैव ॥ ७१ ॥ सम्बोधनयुक्ता याऽवधानं भवति यां च श्रुत्वा ॥ आमंत्रणी चैषा प्रज्ञप्ता तत्त्वदर्शिभिः ॥ ७२ ॥ आज्ञावचनेन युता आज्ञापनी पूर्वभणितभाषातः । करणाकरणानियमादुष्टविवक्षया सा भिन्ना ॥ ७३ ॥ सा याचनी च ज्ञेया यदीप्सितप्रार्थनापरं वचनम् ॥ भक्तिप्रयुक्तैषा विनापि विषयं गुणोपेता ॥७४॥ जिज्ञासितार्थकथनं प्ररूपिता पृच्छनी जिनवरैः ॥ प्रज्ञापनी प्रज्ञप्ता विनीतविनये विधिवादः ॥ ७५ ॥ प्रार्थितनिषेधवचनं प्रत्याख्यानी जिनैः प्रज्ञप्ता ॥ निजेप्सितत्वकथनं ज्ञेया इच्छानुलोमा च ॥ ७६ ॥ सा भवत्यनभिगृहीता यत्रानेकेषु पृष्टकार्येषु ॥ एकतरानवधारणमथवा डित्था ( यदृच्छा )दिकं वचनम् ॥ ७७ ॥ अभिगृहीता प्रतिपक्षः संशयकरणी च सा मुणि(ज्ञा)तव्या ॥ यत्रानेकार्थपदं श्रुत्वा भवति सन्देहः ॥ ७८ ॥ भाषाऽसत्यामृषा प्रकटार्था व्याकृता मुणि( ज्ञा ) तव्या ॥ अतिगम्भीरमहार्था अव्याकृताऽथवाऽव्यक्ता ॥ ७९ ॥ एवमसत्यामृषा द्वादशविधा प्ररूपिता सम्यक् ॥ द्रव्ये भावभाषा तेन समाप्ता समासेन ॥ ८० ॥ सर्वा अपि हि सुरनारकनराणां विकलेन्द्रियाणां चरमा च ॥ पञ्चेन्द्रियतिरश्चामपि सा शिक्षा लब्धिरहितानाम् ॥ ८१ ॥ त्रिविधा श्रुते भाषा सत्या मृषाऽसत्यामृषा च ॥ सम्यगुपयुक्तस्य तु सत्या सम्यक्त्वयुक्तस्य ॥ ८२ ॥ भवत्यसत्याभाषा तस्यैव चानुपयुक्तभावेन ॥ मिथ्यात्वाविष्टस्य वाऽवितथपरिणामरहितस्य ॥ ८३ ॥ उपरितने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ज्ञानत्रिके उपयुक्तो यच्च भाषते श्रुते ॥ सा खल्वसत्यामृषा यद्बाहुल्येन सा सूत्रे ॥ ८४ ॥ चारित्रविशोधिकरी सत्या मृषा चाविशोधिकरी ॥ द्वे एते चारित्रे भावं तु प्रतीत्य ज्ञेये ॥ ८५ ॥ द्वे एवानुमते वक्तुं सत्या चासत्यामृषा च ॥ द्वे च प्रतिषिद्धे मृषा च सत्यामृषा च ॥ ८६ ॥ कालादिशङ्किता या यापि च सर्वोपघातिनी भवति ॥ आमंत्रणी च सङ्गादिदूषिता या न तां भाषेत ॥ ८७ ॥ पञ्चेन्द्रियप्राणिनां स्त्रीपुरुषानिर्णये वदेज्जातिम् ॥ इतरथा तु विपरिणामः जनपदव्यवहारसत्येपि ॥ ८८ ॥ स्थूलादिषु पुनर्भाषेत परिवृद्धादीन्येव वचनानि ॥ दोह्यादिषु च तदर्थकासिद्धानि विशेषणानि वदेत् ॥ ८९ ॥ प्रासादस्तम्भतोरणगृहादियोग्यांश्च नो वदेद् वृक्षान् ॥ कारणजाते च वदेत्तान् जातिप्रभृतिगुणयुक्तान् ॥ ९० ॥ न फलेष्वौषधीषु च पक्वादिवचो वदेद्वचनकुशलः ॥ असमर्थप्ररुढादि प्रयोजने पुनर्वदेद्वचनम् ॥ ९१ ॥ सङ्खडीस्तेननदीः संखडिप्रणीतार्थसुबहुसमतीर्थाः ॥ भाषेत प्रयोजनतो न कार्या हन्तव्या सुखतीर्या ॥ ९२ ॥ पूर्णास्तु न कायतीर्यानद्यो नौभिस्तरणीयाः ॥ न वदेच्च प्राणिपेया वदेत्पुनः शुद्धवचनेन ॥९३॥ सावद्ये सुकृतादीन्न वदेत्सुकृते वदेच्च तद्वचनं ॥ अनवद्यमेव भाषेत सम्यग्ज्ञात्वा विधिभेदम् ॥ ९४ ॥ अभ्युच्चयं न भाषेत आज्ञप्तिमयतानां वा ॥ असाधुलोकं साधुरिति सदोषाशंसनं तथा ॥ ९५ ॥ मेघं नभो मनुष्यं वा देव इति न लपन्मुनिः ॥ उन्नतोऽन्तरिक्षमिति ऋद्धिमानिति वा वदेत् ॥ ९६ ॥ दोषान्गुणांश्च ज्ञात्वा युक्त्याऽऽगमेन च ॥ गुणा यथा न हीयन्ते वक्तव्यं साधुना तथा ॥ ९७ ॥ महर्षेर्धर्मपरायणस्य अध्यात्मयोगे परिनिष्ठितस्य ॥ प्रभाषमाणस्य हितं मितं च करोति भाषा चरणं विशुद्धम् ॥९८॥ चारित्रशोध्या क्षपयित्वा मोहं लब्ध्वा ततः केवलज्ञानलक्ष्मीं ॥ शैलेशीयोगेन सुसंवृतात्मा अनुत्तरं प्राप्नोति मोक्षसौख्यं॥ ९९ ॥ तस्माद् बुधो भाषारहस्यमेतच्चारित्रसंशुद्धिकृते समीक्ष्य ॥ यथा विलीयेते खलु रागद्वेषौ तथा प्रवर्तेत गुणेषु सम्यक् ॥१००॥ एतद्भा(वं भा)षारहस्यं रचितं भव्यानां तत्त्वबोधार्थम् ॥ शोधयन्तु प्रसादपरास्तद्गीतार्था विशेषविदः ॥ १०१ ॥ प्रमाण-नय-स्याद्वाद-उपदेश-वादरहस्यादिरहस्यपदाङ्कितप्रकरणसजातीयभाषारहस्यप्रकरणसंस्कृतानुवादः सम्पूर्णः ॥



For Private and Personal Use Only

॥ ओँ अर्हम् नमः ॥

पूर्वधरसमानकालवर्ति–श्रीहरिभद्रसूरिसन्दर्भितं महामहोपाध्यायश्रीयशोविजयजीगणिप्रणीतविवरणविभूषितं

# ॥ अथ श्रीयोगविंशिकाप्रकरणम् ॥

**मुक्खेण जोयणाओ, जोगो सव्वो वि धम्मवावारो ॥ परिसुद्धो विन्नेओ, ठाणाइगओ विसेसेणं ॥१॥**

ऐँ नमः ॥ अथ योगविंशिका व्याख्यायते—**मुक्खेण** त्ति । **मोक्षेण** महानन्देन, **योजनात्** **सर्वोऽपि** धर्मव्यापारः साधोरालयविहारभाषाविनयभिक्षाटनादिक्रियारूपः, **योगो विज्ञेयः**, योजनाद्योग इति व्युत्पत्त्यर्थानुगृहीतमोक्षकारणीभूतात्मव्यापारत्वरूपयोगलक्षणस्य सर्वत्र घटमानत्वात् । कीदृशो धर्मव्यापारो योगः ? इत्याह–**परिशुद्धः** प्रणिधानाद्याशयविशुद्धिमान्, अनीदृशस्य द्रव्यक्रियारूपत्वेन तुच्छत्वात् ॥ उक्तं च ( षोडशक ३ ) **आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः ॥ भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा ॥ १२ ॥** (वृत्तिः) एते प्रणिधानादयः, सर्वेऽपि कथञ्चित्क्रियारूपत्वेऽपि तदुपलक्ष्याः, आशयभेदाः, अयं च पञ्चप्रकारोऽप्याशयो भावः, अनेन विना चेष्टा कायवाङ्मनोव्यापाररूपा, द्रव्यक्रिया तुच्छा असारा अभिलषितफलासाधकत्वादित्येतदर्थः ॥ अथ के ते प्रणिधानाद्याशयाः ? उच्यते—प्रणिधानं प्रवृत्तिर्विघ्नजयः सिद्धिर्विनियोगश्चेति पञ्च, आह च ( षोडशक ३ ) ॥ **प्रणिधि–प्रवृत्ति–विघ्नजय–सिद्धि–**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विनियोगभेदतः प्रायः ॥ धर्मज्ञैराख्यातः, शुभाशयः पञ्चधाऽत्र विधौ ॥ ६ ॥ इति । तत्र "हीनगुण-द्वेषाभावपरोपकारवासनाविशिष्टोऽधिकृतधर्मस्थानस्य कर्तव्यतोपयोगः प्रणिधानम्," उक्तं च—प्रणिधानं तत्समये, स्थितिमत्तदधः कृपानुगं चैव ॥ निरवद्यवस्तुविषयं, परार्थनिष्पत्तिसारं च ॥ ७ ॥ तत्समये प्रतिपन्नधर्मस्थानमर्यादायां, स्थितिमत् अविचलितस्वभावम्, तदधः स्वप्रतिपन्नधर्मस्थानादधस्तन-गुणस्थानवर्त्तिषु जीवेषु कृपानुगं करुणापरम्, न तु गुणहीनत्वात्तेषु द्वेषान्वितम्, शेषं सुगमम् ॥ "अधिकृत-धर्मस्थानोद्देशेन तदुपायविषय इतिकर्तव्यताशुद्धः शीघ्रक्रियासमाप्तीच्छादिलक्षणौत्सुक्यविरहितः प्रयत्नातिशयः प्रवृत्तिः," आह च—"तत्रैव तु प्रवृत्तिः, शुभसारोपायसङ्गतात्यन्तम् ॥ अधिकृतयत्नातिशया-दौत्सुक्यविवर्जिता चैव ॥ ८ ॥" तत्रैव अधिकृतधर्मस्थान एव, शुभः-प्रकृष्टः सारो-नैपुण्यान्वितो य उपायस्तेन सङ्गता ॥ "विघ्नजयो नाम विघ्नस्य जयोऽस्मादिति व्युत्पत्त्या धर्मान्तरायनिवर्त्तकः परिणामः।" स च जेतव्यविघ्नत्रैविध्यात्त्रिविधः, तथा हि-यथा कस्यचित्कण्टकाकीर्णमार्गावतीर्णस्य कण्टकविघ्नो विशिष्टगमन-विघातहेतुर्भवति, तदपनयनं तु पथि प्रस्थितस्य निराकुलगमनसम्पादकं, तथा मोक्षमार्गप्रवृत्तस्य कण्टकस्थानीय-शीतोष्णादिपरीषहैरुपद्रुतस्य न निराकुलप्रवृत्तिः, तत्तितिक्षाभावनया तदपाकरणे त्वनाकुलप्रवृत्तिसिद्धिरिति कण्ट-कविघ्नजयसमः प्रथमो हीनो विघ्नजयः १ ॥ तथा तस्यैव ज्वरेण भृशमभिभूतस्य निराकुलगमनेच्छोरपि तत्क-र्तुमशक्नुवतः कण्टकविघ्नादधिको यथा ज्वरविघ्नस्तज्जयश्च विशिष्टगमनप्रवृत्तिहेतुस्तथेहापि ज्वरकल्पाः शारीरा एव



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रोगा विशिष्टधर्मस्थानाराधनप्रतिबन्धकत्वाद्विघ्नास्तदपाकरणं च 'हियाहारा मियाहारा' ॥ इत्यादिसूत्रोक्तरीत्या तत्कारणानासेवनेन, ' न मत्स्वरूपस्यैते परीषहा लेशतोऽपि बाधकाः किन्तु देहमात्रस्यैव ' इति भावनाविशेषेण वा सम्यग्धर्माराधनाय समर्थमिति ज्वरविघ्नजयसमो मध्यमो द्वितीयो विघ्नजयः २ ॥ यथा च तस्यैवाध्वनि जिगमिषोर्दिग्मोहविघ्नोपस्थितौ ' भूयो भूयः प्रेर्यमाणस्याप्यध्वनीनैर्न गमनोत्साहः स्यात्तद्विजये तु स्वयमेव सम्यग्ज्ञानात्परैश्चाभिधीयमानमार्गश्रद्धानान्मन्दोत्साहतात्यागेन विशिष्टगमनसम्भवस्तथेहापि मोक्षमार्गे दिग्मोहकल्पो मिथ्यात्वादिजनितो मनोविभ्रमो विघ्नस्तज्जयस्तु गुरुपारतन्त्र्येण मिथ्यात्वादिप्रतिपक्षभावनया मनोविभ्रमापनयनादनवच्छिन्नप्रयाणसम्पादक इत्ययं मोहविघ्नजयसम उत्तमस्तृतीयो विघ्नजयः ३ ॥ एते च त्रयोऽपि विघ्नजया आशयरूपाः समुदिताः प्रवृत्तिहेतवोऽन्यतरवैकल्येऽपि तदसिद्धेरित्यवधेयम् ॥ उक्तं च––विघ्नजयस्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः ॥ मार्ग इह कण्टकज्वर–मोहजयसमः प्रवृत्तिफलः ॥ ९ ॥ इति ॥ " अतिचाररहिताधिकगुणे गुर्वादौ विनयवैयावृत्त्यबहुमानाद्यन्विता हीनगुणे निर्गुणे वा दयादानव्यसनपतितदुःखापहारादिगुणप्रधाना मध्यमगुणे चोपकारफलवत्यधिकृतधर्मस्थानस्याहिंसादेः प्राप्तिः सिद्धिः ॥ " उक्तं च–सिद्धिस्तत्तद्धर्म–स्थानावाप्तिरिह तात्त्विकी ज्ञेया ॥ अधिके विनयादियुता, हीने च दयादिगुणसारा ॥ १० ॥ इति ॥ " स्वप्राप्तधर्मस्थानस्य यथोपायं परस्मिन्नपि संपादकत्वं विनियोगः ॥ " अयं चानेकजन्मान्तरसन्तानक्रमेण प्रकृष्टधर्मस्थानावाप्तेरवन्ध्यो हेतुः ॥ उक्तं च—सिद्धेश्चोत्तरकार्यं, विनियो-

प्रणिधानादीनामाशयानां स्वरूपम् ॥ ॥गा० १॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गोऽबन्ध्यमेतदेतस्मिन् ॥ सत्यन्वयसम्पत्त्या, सुन्दरमिति तत्परं यावत् ॥ ११ ॥ अबन्ध्यं न कदाचिन्निष्फलं एतत् धर्मस्थानमहिंसादि, एतस्मिन् विनियोगे सति, अन्वयसम्पत्त्या अविच्छेदभावेन, तत् विनियोगसाध्यं धर्मस्थानं, सुन्दरम् । इतिः भिन्नक्रमः समाप्त्यर्थश्च, यावत्परमित्येवं योगः, यावत् परं प्रकृष्टं धर्मस्थानं, समाप्यत इत्यर्थः । इदमत्र हृदयम्–धर्मस्तावद्रागादिमलविगमेन पुष्टिशुद्धिमच्चित्तमेव । पुष्टिश्च पुण्योपचयः, शुद्धिश्च घातिकर्मणां पापानां क्षयेण या काचिन्निर्मलता, तदुभयं च प्रणिधानादिलक्षणेन भावेनानुबन्धवद्भवति, तदनुबन्धाच्च शुद्धिप्रकर्षः सम्भवति, निरनुबन्धं च तदशुद्धिफलमेवेति न तद्धर्मलक्षणम्, ततो युक्तमुक्तं "प्रणिधानादिभावेन परिशुद्धः सर्वोपि धर्मव्यापारः सानुबन्धत्वाद् योगः" इति । यद्यप्येवं निश्चयतः परिशुद्धः सर्वोऽपि धर्मव्यापारो योगस्तथापि विशेषेण तान्त्रिकसङ्केतव्यवहारकृतेनासाधारण्येन स्थानादिगत एव धर्मव्यापारो योगः, स्थानाद्यन्यतम एव योगपदप्रवृत्तेः सम्मतत्वादिति भावः ॥ १ ॥

स्थानादिगतो धर्मव्यापारो विशेषेण योग इत्युक्तम्, तत्र के ते स्थानादयः?, कतिभेदं च तत्र योगत्वं ? इत्याह—

**ठाणुन्नत्थालंबण–रहिओ तंतम्मि पंचहा एसो ॥ दुगमित्थ कम्मजोगो, तहा तियं नाणजोगो उ ॥२॥**

ठाणुन्नत्थेत्यादि । स्थीयतेऽनेनेति स्थानं–आसनविशेषरूपं कायोत्सर्गपर्यङ्कबन्धपद्मासनादि सकलशास्त्रप्रसिद्धम्, ऊर्णः–शब्दः स च क्रियादावुच्चार्यमाणसूत्रवर्णलक्षणः, अर्थः–शब्दाभिधेयव्यवसायः, आलम्बनं–बाह्यप्रतिमादिविषयध्यानम्, एते चत्वारो भेदाः, रहितः इति रूपिद्रव्यालम्बनरहितो निर्विकल्पचिन्मात्रसमाधि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगतत्त्व-निष्कर्षः, स्थानोर्णयोः कर्मयोगत्वमर्थादीनां च ज्ञानयोगत्वं, तयोःस्वामिप्ररूपणश्च ॥ ॥गाथा २॥

रूपः, इत्येवं एषः योगः, पञ्चविधः तन्त्रे योगप्रधानशास्त्रे, प्रतिपादित इति शेषः ॥ उक्तं च षोडशक. १३ स्थानोर्णार्थालम्बन-तदन्ययोगपरिभावनं सम्यक् ॥ परतत्त्वयोजनमलं, योगाभ्यास इति समयविदः ॥ ४ ॥ इति । स्थानादिषु योगत्वं च " मोक्षकारणीभूतात्मव्यापारत्वं योगत्वम् " इति योगलक्षणयोगादनुपचरितमेव ॥ यत्तु "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्य ॥ पातं० यो. द. २-२९ ॥" इति योगाङ्गत्वेन योगरूपता स्थानादिषु हेतुफलभावेनोपचारादभिधीयत इति षोडशकवृत्तावुक्तं तत् "चित्तवृत्तिनिरोधो योगः ॥ पा. यो. १-२ ॥" इति योगलक्षणाभिप्रायेणेति ध्येयम् । अत्र स्थानादिषु द्वयं स्थानोर्णलक्षणं कर्मयोग एव, स्थानस्य साक्षाद्, ऊर्णस्याप्युच्चार्यमाणस्यैव ग्रहणादुच्चारणांशे क्रियारूपत्वात् । तथा त्रयं अर्थालम्बननिरालम्बनलक्षणं ज्ञानयोगः, तुः एवकारार्थ इति ज्ञानयोग एव, अर्थादीनां साक्षाद् ज्ञानरूपत्वात् ॥ २ ॥ एष कर्मयोगो ज्ञानयोगो वा कस्य भवतीति स्वामिचिन्तायामाह—

**देसे सव्वे य तहा, नियमेणेसो चरित्तिणो होइ ॥ इयरस्स बीयमित्तं, इत्तु चिय केइ इच्छंति ॥३॥**

**देसे सव्वे य** त्ति । सप्तम्याः पञ्चम्यर्थत्वाद्देशतस्तथा सर्वतश्च, **चारित्रिण** एव एषः प्रागुक्तः स्थानादिरूपो योगः, **नियमेन** इतरव्यवच्छेदलक्षणेन निश्चयेन भवति, क्रियारूपस्य ज्ञानरूपस्य वाऽस्य चारित्रमोहनीयक्षयोपशमनान्तरीयकत्वात्, अत एवाध्यात्मादियोगप्रवृत्तिरपि चारित्रप्राप्तिमारभ्यैव ग्रन्थकृता योगबिन्दौ प्ररूपिता, तथा हि—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशादिभेदतश्चित्र-मिदं चोक्तं महात्मभिः ॥ अत्र पूर्वोदितो योगो-ऽध्यात्मादिः सम्प्रवर्त्तते ॥३५७॥

इति, देशादिभेदतः देशसर्वविशेषाद्, इदं चारित्रं, अध्यात्मादिः अध्यात्मं १ भावना २ आध्यानं ३ समता ४ वृत्तिसंक्षयश्च ५ ॥ तत्राध्यात्मं "उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् १" ॥ भावना "अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः २" ॥ आध्यानं "प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पातादिविषयसूक्ष्मोपयोगयुतं चित्तम् ३" ॥ समता "अविद्याकल्पितेष्टानिष्टत्वसंज्ञापरिहारेण शुभाशुभानां विषयाणां तुल्यताभावनम् ४" ॥ वृत्तिसंक्षयश्च "मनोद्वारा विकल्परूपाणां शरीरद्वारा परिस्पन्दरूपाणामन्यसंयोगात्मकवृत्तीनामपुनर्भावेन निरोधः ५ ॥" अथैतेषामध्यात्मादीनां स्थानादिषु कुत्र कस्यान्तर्भावः ? इति चेद्, उच्यते—अध्यात्मस्य चित्रभेदस्य देवसेवाजपतत्त्वचिन्तनादिरूपस्य यथाक्रमं स्थाने ऊर्णेऽर्थे च ॥ भावनाया अपि भाव्यमानविषयत्वात्तत्रैव ॥ ध्यानस्यालम्बने ॥ समतावृत्तिसंक्षययोश्च तदन्ययोग इति भावनीयम् ॥ ततो देशतः सर्वतश्च चारित्रिण एव स्थानादियोगप्रवृत्तिः सम्भवतीति सिद्धम् ॥ ननु यदि देशतः सर्वतश्च चारित्रिण एव स्थानादियोगः तदा देशविरत्यादिगुणस्थानहीनस्य व्यवहारेण श्राद्धधर्मादौ प्रवर्तमानस्य स्थानादिक्रियायाः सर्वथा नैष्फल्यं स्यादित्याशङ्क्याह—इतरस्य देशसर्वचारित्रिव्यतिरिक्तस्य, स्थानादिकं, इत एव देशसर्वचारित्रं विना योगसम्भवाभावादेव, बीजमात्रं योगबीजमात्रं, केचिद् व्यवहारनयप्रधानाः, इच्छन्ति । "मोक्षकारणीभूतचारित्रतत्त्वसंवेदनान्तर्भूतत्वेन स्थानादिकं चारि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिण एव योगः, अपुनर्बन्धकसम्यग्दृशोस्तु तद्योगबीजम् " इति निश्चयनयाभिमतः पन्थाः ॥ व्यवहारनयस्तु योगबीजमप्युपचारेण योगमेवेच्छतीति व्यवहारनयेनापुनर्बन्धकादयः स्थानादियोगस्वामिनः ॥ निश्चयनयेन तु चारित्रिण एवेति विवेकः । तदिदमुक्तम्–" अपुनर्बन्धकस्यायं, व्यवहारेण तात्त्विकः ॥ अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु ॥ ३६९ ॥ " इति । अपुनर्बन्धकस्य उपलक्षणात्सम्यग्दृष्टेश्च, व्यवहारेण कारणे कार्यत्वोपचारेण, तात्त्विकः, कारणस्यापि कथञ्चित्कार्यत्वात् । निश्चयेन उपचारपरिहारेण, उत्तरस्य तु चारित्रिण एव ॥ सकृद्बन्धकादीनां तु स्थानादिकमशुद्धपरिणामत्वान्निश्चयतो व्यवहारतश्च न योगः किन्तु योगाभ्यास इत्यत्रधेयम्, उक्तं च–" सकृदावर्त्तनादीना–मतात्त्विक उदाहृतः ॥ प्रत्यपायफलप्राय–स्तथा वेषादिमात्रतः ॥ ३७० ॥ " सकृद्–एकवारमावर्तन्ते–उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः, आदिशब्दाद्द्विरावर्तनादिग्रहः, ' अतात्त्विकः ' व्यवहारतो निश्चयतश्चातत्त्वरूपः ॥ ३ ॥ तदेवं स्थानादियोगस्वामित्वं विवेचितम्, अथैतेष्वेव प्रतिभेदानाह—

**इक्किक्को य चउद्धा, इत्थं पुण तत्तओ मुणेयव्वो । इच्छापवित्तिथिरसि–द्धिभेयओ समयनीईए ॥४॥**

इक्किक्को य त्ति । अत्र स्थानादौ, पुनः कर्मज्ञानविभेदाभिधानापेक्षया भूयः, एकैकश्चतुर्द्धा तत्त्वतः सामान्येन दृष्टावपि परमार्थतः, समयनीत्या योगशास्त्रप्रतिपादितपरिपाट्या, इच्छाप्रवृत्तिस्थिरसिद्धिभेदतः इच्छाप्रवृत्तिस्थिरसिद्धिभेदानाश्रित्य, मुणेयव्वो त्ति ज्ञातव्यः ॥ ४ ॥ तानेव भेदान् विवरीषुराह—

निश्चयव्यवहारनयभेदेन योगाधिकारिप्ररूपणं ॥
इच्छादियोगभेदोपक्रमश्च ॥
गाथा ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तज्जुत्तकहापीईइ, संगया विपरिणामिणी इच्छा ॥ सव्वत्थुवसमसारं, तप्पालणमो पवत्ती उ ॥५॥
तह चेव एयबाहग-चिंतारहियं थिरत्तणं नेयं ॥ सव्वं परत्थसाहग-रूवं पुण होइ सिद्धि त्ति ॥६॥

तज्जुत्तकहा इत्यादि । तद्युक्तानां-स्थानादियोगयुक्तानां, कथायां प्रीत्या-अर्थबुभुत्सयार्थबोधेन वा जनितो यो हर्षस्तल्लक्षणया, सङ्गता-सहिता, विपरिणामिनी विधिकर्तृबहुमानादिगर्भं स्वोल्लासमात्राद्यत्किञ्चिदभ्यासादिरूपं विचित्रं परिणाममादधाना, इच्छा भवति, द्रव्यक्षेत्राद्यसामग्र्येणाङ्गसाकल्याभावेऽपि यथाविहितस्थानादियोगेच्छया यथाशक्ति क्रियमाणं स्थानादि इच्छारूपमित्यर्थः । प्रवृत्तिस्तु सर्वत्र सर्वावस्थायां, उपशमसारं उपशमप्रधानं यथा स्यात्तथा, तत्पालनं यथाविहितस्थानादियोगपालनम्, ओ त्ति प्राकृतत्वात् । वीर्यातिशयाद् यथाशास्त्रमङ्गसाकल्येन विधीयमानं स्थानादि प्रवृत्तिरूपमित्यर्थः ॥ ५ ॥ तह चेव त्ति । तथैव प्रवृत्तिवदेव सर्वत्रोपशमसारं स्थानादिपालनम्, एतस्य-पाल्यमानस्य स्थानादेर्बाधकचिन्तारहितं स्थिरत्वं ज्ञेयम् ॥ प्रवृत्तिस्थिरयोगयोरेतावान् विशेषः—यदुत प्रवृत्तिरूपं स्थानादियोगविधानं सातिचारत्वाद्बाधकचिन्तासहितं भवति । स्थिररूपं त्वभ्याससौष्ठवेन निर्बाधकमेव जायमानं तज्जातीयत्वेन बाधकचिन्ताप्रतिघाताच्छुद्धिविशेषेण तदनुत्थानाच्च तद्रहितमेव भवतीति ॥ सर्वं स्थानादि स्वस्मिन्नुपशमविशेषादिफलं जनयदेव, परार्थसाधकं-स्वसन्निहितानां स्थानादियोगशुद्ध्यभाववतामपि तत्सिद्धिविधानद्वारा परगतस्वसदृशफलसम्पादकं, पुनः सिद्धिर्भवति । अत एव सिद्धाऽहिंसानां समीपे हिंसाशीला अपि हिंसां कर्तुं नालम्, सिद्धसत्यानां च समीपेऽसत्यप्रिया अप्यसत्यमभिधातुं



For Private and Personal Use Only

इच्छादीनां हेतुभेदाः कार्यभेदा निरूपिताः ॥ गाथा ७–८ ॥

नालम् । एवं सर्वत्रापि ज्ञेयम् । इतिः इच्छादिभेदपरिसमाप्तिसूचकः । अत्रायं मत्कृतः संग्रहश्लोकः—इच्छा तद्वत्कथाप्रीतिः, पालनं शमसंयुतम् ॥ पालनं ( प्रवृत्तिः ), दोषभीहानिः स्थैर्यं, सिद्धिः परार्थता ॥ १ ॥ ( शब्दभेदेन ज्ञानसारे २७–४ ) इति ॥ ६ ॥ उक्ता इच्छादयो भेदाः, अथैतेषां हेतूनाह—

एए य चित्तरूवा, तहाखओवसमजोगओ हुंति ॥ तस्स उ सद्धापीयाइजोगओ भव्वसत्ताणं ॥ ७ ॥

एए य त्ति । एते च इच्छादयः, चित्ररूपाः परस्परं विजातीयाः स्वस्थाने चासङ्ख्यभेदभाजः, तस्य तु अधिकृतस्य स्थानादियोगस्यैव, श्रद्धा–इदमित्थमेवेति प्रतिपत्तिः, प्रीतिः–तत्करणादौ हर्षः, आदिना धृतिधारणादिपरिग्रहः, तद्योगतः, भव्यसत्त्वानां मोक्षगमनयोग्यानामपुनर्बन्धकादिजन्तूनां, तथाक्षयोपशमयोगतः तत्तत्कार्यजननानुकूलविचित्रक्षयोपशमसम्पत्त्या भवन्ति, इच्छायोगादिविशेषे आशयभेदाभिव्यङ्ग्यः क्षयोपशमभेदो हेतुरिति परमार्थः। अत एव यस्य यावन्मात्रः क्षयोपशमस्तस्य तावन्मात्रेच्छादिसम्पत्त्या मार्गे प्रवर्त्तमानस्य सूक्ष्मबोधाभावेऽपि मार्गानुसारिता न व्याहन्यत इति सम्प्रदायः॥७॥ इच्छादीनामेव हेतुभेदमभिधाय कार्यभेदमभिधत्ते–

अणुकंपा निव्वेओ, संवेगो होइ तह य पसमु त्ति ॥ एएसिं अणुभावा, इच्छाईणं जहासंखं ॥ ८ ॥

अणुकंप त्ति । अनुकम्पा द्रव्यतो भावतश्च यथाशक्ति दुःखितदुःखपरिहारेच्छा, निर्वेदः नैर्गुण्यपरिज्ञानेन भवचारकाद्विरक्तता, संवेगः मोक्षाभिलाषः, तथा प्रशमश्च क्रोधकण्डूविषयतृष्णोपशमः, इत्येते एतेषां इच्छादीनां योगानां यथासङ्ख्यं, अनु–पश्चाद् भावाः अनुभावाः कार्याणि भवन्ति । यद्यपि सम्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५ स्थानादि
४ इच्छादि
२०
४ कर्मादि
८०

क्त्वस्यैवैते कार्यभूतानि लिङ्गानि प्रवचने प्रसिद्धानि, तथापि योगानुभवसिद्धानां विशिष्टानामेतेषामिहेच्छायोगादिकार्यत्वमभिधीयमानं न विरुध्यत इति द्रष्टव्यम् । वस्तुतः केवलसम्यक्त्वलाभेऽपि व्यवहारेणेच्छादियोगप्रवृत्तेरेवानुकम्पादिभावसिद्धेः । अनुकम्पादिसामान्ये इच्छायोगादिसामान्यस्य तद्विशेषे च तद्विशेषस्य हेतुत्वमित्येव न्यायसिद्धम् । अत एव शमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्यलक्षणानां सम्यक्त्वगुणानां पश्चानुपूर्व्यैव लाभक्रमः । प्राधान्याच्चेत्थमुपन्यास इति **सद्धर्मविंशिकायां** प्रतिपादितम् ॥ ८ ॥ तदेवं हेतुभेदेनानुभावभेदेन चेच्छादिभेदविवेचनं कृतम्, तथा च स्थानादावेकैकस्मिन्निच्छादिभेदचतुष्टयसमावेशादेतद्विषया अशीतिर्भेदाः सम्पन्ना एतन्निवेदनपूर्वमिच्छादिभेदभिन्नानां स्थानादीनां सामान्येन योजनां शिक्षयन्नाह—

**एवं ठियम्मि तत्ते, नाएण उ जोयणा इमा पयडा ॥ चिइवंदणेण नेया, नवरं तत्तण्णुणा सम्मं ॥९॥**

एवं इत्यादि । एवं अमुना प्रकारेणेच्छादिप्रतिभेदैरशीतिभेदो योगः, सामान्यतस्तु स्थानादिः पञ्चभेद इति, तत्त्वे योगतत्त्वे, स्थिते व्यवस्थिते, ज्ञातेन तु दृष्टान्तेन तु, चैत्यवन्दनेन इयं प्रकटा क्रियाभ्यासपरजनप्रत्यक्षविषया, योजना प्रतिनियतविषयव्यवस्थापना, नवरं केवलं, तत्त्वज्ञेन सम्यगवैपरीत्येन ज्ञेया ॥९॥ तामेवाह—

**अरिहंतचेइयाणं, करेमि उस्सग्ग एवमाइयं ॥ सद्धाजुत्तस्स तहा, होइ जहत्थं पयन्नाणं ॥ १० ॥**
**एयं चऽत्थालंबण–जोगवओ पायमविवरीयं तु ॥ इयरेसिं ठाणाइसु, जत्तपराणं परं सेयं ॥ ११ ॥**

अरिहंत इत्यादि । अरिहंतचेइयाणं करेमि काउस्सग्गं एवमादि चैत्यवन्दनदण्डकविषयं, श्रद्धायुक्त-

इच्छादिभेदविशिष्टानां स्थानादीनां प्रतिभेदविवक्षयाऽशीतिभेदत्वस्य तद्योजनायाश्च प्ररूपणम् ॥
गाथा ९–१०–११ ॥



For Private and Personal Use Only

स्य क्रियास्तिक्यवतः, तथा तेन प्रकारेणोच्चार्यमाणस्वरसम्पन्मात्रादिशुद्धस्फुटवर्णानुपूर्वीलक्षणेन, 'यथार्थं' अभ्रान्तं, पदज्ञानं भवति, परिशुद्धपदोच्चारे दोषाभावे सति परिशुद्धपदज्ञानस्य श्रावणसामग्रीमात्राधीनत्वादिति भावः ॥१०॥ 'एयं च' त्ति। 'एतच्च' परिशुद्धं चैत्यवन्दनदण्डकपदपरिज्ञानम्, अर्थः—उपदेशपदप्रसिद्धपद–वाक्य–महावाक्यै-दम्पर्यार्थपरिशुद्धज्ञानम्, आलम्बनं च-प्रथमे दण्डकेऽधिकृततीर्थकृद्, द्वितीये सर्वे तीर्थकृतः, तृतीये प्रवचनम्, चतुर्थे सम्यग्दृष्टिः शासनाधिष्ठायक इत्यादि, तद्योगवतः—तत्प्रणिधानवतः, 'प्रायः' बाहुल्येन, 'अविपरीतं तु' अभीप्सितपरमफलसम्पादकमेव, अर्थालम्बनयोगयोर्ज्ञानयोगतयोपयोगरूपत्वात्, तत्सहितस्य चैत्यवन्दनस्य भावचैत्यवन्दनत्वसिद्धेः, भावचैत्यवन्दनस्य चामृतानुष्ठानरूपत्वेनावश्यं निर्वाणफलत्वादिति भावः। प्रायोग्रहणं सापाययोगवद्व्यावृत्त्यर्थम्। द्विविधो हि योगः—सापायो निरपायश्च, तत्र निरुपक्रममोक्षपथप्रतिकूलचित्तवृद्धिकारणं प्राक्कालार्जितं कर्म अपायस्तत्सहितो योगः सापायः, तद्रहितस्तु निरपाय इति। तथा च सापायार्थालम्बनयोगवतः कदाचित्फलविलम्बसम्भवेऽपि निरपायतद्वतोऽविलम्बेन फलोत्पत्तौ न व्यभिचार इति प्रायोग्रहणार्थः। इतरेषां अर्थालम्बनयोगाभाववताम्, एतच्चैत्यवन्दनसूत्रपदपरिज्ञानं, स्थानादिषु यत्नवतां गुरूपदेशानुसारेण विशुद्धस्थानवर्णोद्यमपरायणानामर्थालम्बनयोगयोश्च तीव्रस्पृहावतां, परं केवलं, श्रेयः, अर्थालम्बनयोगाभावे वाचनायां पृच्छनायां परावर्तनायां वा तत्पदपरिज्ञानस्यानुप्रेक्षाऽसंवलितत्वेन 'अनुपयोगो द्रव्यम्' इतिकृत्वा द्रव्यचैत्यवन्दनरूपत्वेऽपि स्थानोर्णयोगयत्नातिशयादर्थालम्बनस्पृहयालुतया च तद्धेत्वनुष्ठानरूपतया भावचैत्यवन्दनद्वारा पर-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्परया स्वफलसाधकत्वादिति भावः ॥११॥ स्थानादियत्नाभावे च तच्चैत्यवन्दनानुष्ठानमप्राधान्यरूपद्रव्यतामास्कन्दन्निष्फलं विपरीतफलं वा स्यादिति लेशतोऽपि स्थानादियोगाभाववन्तो नैतत्प्रदानयोग्या इत्युपदिशन्नाह—

**इहरा उ कायवासिय-पायं अहवा महामुसावाओ॥ ता अणुरूवाणं चिय,कायव्वो एयविन्नासो ॥१२**

**इहरा उत्ति।** इतरथा तु अर्थालम्बनयोगाभाववतां स्थानादियत्नाभावे तु तत् चैत्यवन्दनानुष्ठानं, कायवासितप्रायं समूर्च्छनजप्रवृत्तितुल्यकायचेष्टितप्रायं मानसोपयोगशून्यत्वात्, उपलक्षणाद्वाग्वासितप्रायमपि द्रष्टव्यं, तथा चाननुष्ठानरूपत्वान्निष्फलमेतदिति भावः । अथवा इति दोषान्तरे, तच्चैत्यवन्दनानुष्ठानं महामृषावादः, "स्थानमौनध्यानैरात्मानं व्युत्सृजामि" इति प्रतिज्ञया विहितस्य चैत्यवन्दनकायोत्सर्गादेः स्थानादिभङ्गे मृषावादस्य स्फुटत्वात्, स्वयं विधिविपर्ययप्रवृत्तौ परेषामेतदनुष्ठाने मिथ्यात्वबुद्धिजननद्वारा तस्य लौकिकमृषावादादतिगुरुत्वाच्च, तथा च विपरीतफलं तेषामेतदनुष्ठानं सम्पन्नम् । येऽपि स्थानादिशुद्धमप्यैहिककीर्त्यादीच्छयाऽऽमुष्मिकस्वर्लोकादिविभूतीच्छया वैतदनुष्ठानं कुर्वन्ति तेषामपि मोक्षार्थकप्रतिज्ञया विहितमेतत्तद्विपरीतार्थतया क्रियमाणं विषगरानुष्ठानान्तर्भूतत्वेन महामृषावादानुबन्धित्वाद्विपरीतफलमेवेति । विषाद्यनुष्ठानस्वरूपं चेत्थमुपदर्शितं पतञ्जल्याद्युक्तभेदान् स्वतन्त्रेण संवादयता ग्रन्थकृतैव योगबिन्दौ-" विषं गरोऽननुष्ठानं, तद्धेतुरमृतं परम् ॥ गुर्वादिपूजानुष्ठान-मपेक्षादिविधानतः ॥ १५५ ॥" विषं स्थावरजङ्गमभेदभिन्नम्, ततो विषमिव विषम्, एवं गर इव गरः, परं गरः कुद्रव्यसंयोगजो विषविशेषः, अननुष्ठानं अनुष्ठानाभासं, तथा तद्धेतुः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुष्ठानहेतुः, अमृतमिवामृतं अमरणहेतुत्वात्, अपेक्षा–इहपरलोकस्पृहा, आदिशब्दादनाभोगादेश्च यद् विधानं-विशेषस्तस्मात् ॥ " विषं लब्ध्याद्यपेक्षातः, इदं सचित्तमारणात् ॥ महतोऽल्पार्थनाज्ज्ञेयं, लघुत्वापादनात्तथा ॥१५६॥ " लब्ध्यादेः–लब्धिकीर्त्यादेः, अपेक्षातः–स्पृहातः, इदं अनुष्ठानं, विषं सचित्तमारणात् परिशुद्धान्तःकरणपरिणामविनाशनात्, तथा महतोऽनुष्ठानस्य, अल्पार्थनात् तुच्छलब्ध्यादिप्रार्थनेन, लघुत्वस्यापादनादिदं विषं ज्ञेयम् ॥ " दिव्यभोगाभिलाषेण, गरमाहुर्मनीषिणः ॥ एतद्विहितनीत्यैव, कालान्तरनिपातनात् ॥ १५७ ॥ " एतद् अनुष्ठानं ऐहिकभोगनिस्पृहस्य स्वर्गभोगस्पृहया गरमाहुः, विहितनीत्यैव विषोक्तनीत्यैव, केवलं कालान्तरे–भवान्तररूपे, निपातनात्–अनर्थसम्पादनात् । विषं सद्य एव विनाशहेतुः, गरश्च कालान्तरेणेत्येवमुपन्यासः ॥ " अनाभोगवतश्चैत–दननुष्ठानमुच्यते ॥ सम्प्रमुग्धं मनोऽस्येति, ततश्चैतद्यथोदितम् ॥ १५८ ॥ " अनाभोगवतः कुत्रापि फलादावप्रणिहितमनसः, एतद् अनुष्ठानं, अननुष्ठानं अनुष्ठानमेव न भवतीत्यर्थः । सम् इति समन्ततः प्रकर्षेण मुग्धं सन्निपातोपहतस्येवानध्यवसायापन्नं, मनोऽस्य, इतिः पादसमाप्तौ । यत एवं ततो यथोदितं तथैव ॥ " एतद्रागादिदं हेतुः, श्रेष्ठो योगविदो विदुः ॥ सदनुष्ठानभावस्य, शुभभावांशयोगतः ॥ १५९ ॥ " एतद्रागात् सदनुष्ठानबहुमानात्, इदं आदिधार्मिककालभावि देवपूजाद्यनुष्ठानं, सदनुष्ठानभावस्य तात्त्विकदेवपूजाद्याचारपरिणामस्य मुक्त्यद्वेषेण मनाग् मुक्त्यनुसारेण वा शुभभावलेशयोगात्, श्रेष्ठः अवन्ध्यो, हेतुरिति योगविदो विदुः जानते ॥ " जिनोदि-

विष–गर–अननु-ष्ठान–तद्धे-तु–अमृता-नुष्ठानलक्ष-णस्वरूपा-दिप्ररूपणं ॥ गाथा १२॥

For Private and Personal Use Only

तमिति त्वाहु-र्भावसारमदः पुनः ॥ संवेगगर्भमत्यन्त-ममृतं मुनिपुङ्गवाः ॥ १६० ॥" जिनोदितमित्येव, भावसारं श्रद्धाप्रधानं, अदः अनुष्ठानं, संवेगगर्भं मोक्षाभिलाषसहितं अत्यन्तं अतीव अमरणहेतुत्वादमृतसंज्ञमाहुर्मुनिपुङ्गवाः गौतमादिमहामुनयः ॥ एतेषु त्रयं योगाभासत्वादहितम्, द्वयं तु सद्योगत्वाद्धितमिति तत्त्वम् । यत एवं स्थानादियत्नाभाववतोऽनुष्ठाने महादोषः, तत् तस्मात्, अनुरूपाणामेव योग्यानामेव, एतद्विन्यासः चैत्यवन्दनसूत्रप्रदानरूपः कर्तव्यः ॥ १२ ॥ क एतद्विन्यासानुरूपा इत्याकाङ्क्षायामाह—

जे देसविरइजुत्ता, जम्हा इह वोसिरामि कायं ति ॥ सुचइ विरईए इमं, ता सम्मं चिंतियव्वमिणं ॥ १३ ॥

जे इत्यादि । ये देशविरतियुक्ताः पञ्चमगुणस्थानपरिणतिमन्तः ते इह अनुरूपा इति शेषः । कुतः ? इत्याह—यस्मात् इह चैत्यवन्दनसूत्रे, 'व्युत्सृजामि कायम्' इति श्रूयते, इदं च विरतौ सत्यां सम्भवति, तदभावे कायव्युत्सर्गासम्भवात्, तस्य गुप्तिरूपविरतिभेदत्वात्, ततः सम्यक् चिन्तितव्यमेतत् यदुत कायं व्युत्सृजामि इतिप्रतिज्ञान्यथानुपपत्त्या देशविरतिपरिणामयुक्ता एव चैत्यवन्दनानुष्ठानेऽधिकारिणः, तेषामेवागमपरतन्त्रतया विधियत्नसम्भवेनामृतानुष्ठानसिद्धेरिति । एतच्च मध्यमाधिकारिग्रहणं तुलादण्डन्यायेनाद्यन्तग्रहणार्थम्, तेन परमामृतानुष्ठानपराः सर्वविरतास्तत्त्वत एव तद्धेत्वनुष्ठानपराः । अपुनर्बन्धका अपि च व्यवहारादिहाधिकारिणो गृह्यन्ते, कुग्रहविरहसम्पादनेनापुनर्बन्धकानामपि चैत्यवन्दनानुष्ठानस्य फलसम्पादकतायाः पञ्चाशकादिप्रसिद्धत्वादित्यवधेयम् । ये त्वपुनर्बन्धकादिभावमप्यस्पृशन्तो विधिबहुमानादिरहिता गतानुगतिकतयैव चैत्यबन्दनाद्य-



For Private and Personal Use Only

नुष्ठानं कुर्वन्ति ते सर्वथाऽयोग्या एवेति व्यवस्थितम् ॥ १३ ॥ नन्वविधिनाऽपि चैत्यवन्दनाद्यनुष्ठाने तीर्थप्रवृत्तिरव्यवच्छिन्ना स्यात्, विधेरेवान्वेषणे तु द्वित्राणामेव विधिपराणां लाभात् क्रमेण तीर्थोच्छेदः, स्यादिति तदनुच्छेदायाविध्यनुष्ठानमप्यादरणीयमित्याशङ्कायामाह— [ एसो असमंजसविहाणा ॥ १४ ॥

अविध्यनुष्ठानस्यापि फलवत्त्वमिति पराशंकानिवारणं सोपपत्तिकम् ॥ गाथा १४–१५॥

**तित्थस्सुच्छेयाइ वि, नालंबण जं ससमएमेव ( नालंबणिज्जं जमेमेवेत्थ ) ॥ सुत्तकिरियाइ नासो,**

**तित्थस्स** इत्यादि । अत्र अविध्यनुष्ठाने, **तीर्थोच्छेदाद्यपि नालम्बनं**, तीर्थानुच्छेदायाविध्यनुष्ठानमपि कर्तव्यमिति नालम्बनीयम्। **यद्** यस्मात्, **एवमेव** अविध्यनुष्ठाने क्रियमाण एव, **असमञ्जसविधानात्** विहितान्यथाकरणादशुद्धपारम्पर्यप्रवृत्त्या **सूत्रक्रियाया विनाशः**, स एष तीर्थोच्छेदः। नहि तीर्थनाम्ना जनसमुदाय एव तीर्थम्, आज्ञारहितस्य तस्यास्थिसङ्घातरूपत्वप्रतिपादनात्, किन्तु 'सूत्रविहितयथोचितक्रियाविशिष्टसाधुसाध्वीश्रावकश्राविकासमुदायः,' तथा चाविधिकरणे सूत्रक्रियाविनाशात्परमार्थतस्तीर्थविनाश एवेति तीर्थोच्छेदालम्बनेनाविधिस्थापने लाभमिच्छतो मूलक्षतिरायातेत्यर्थः ॥१४॥ सूत्रक्रियाविनाशस्यैवाहितावहतां स्पष्टयन्नाह— [ ॥ १५ ॥

**सो एस वंकओ चिय, न य सयमयमारियाणमविसेसो॥ एयं पि भावियव्वं, इह तित्थुच्छेयभीरूहिं**

**सो एस त्ति** । स एषः सूत्रक्रियाविनाशः, **वक्र एव** तीर्थोच्छेदपर्यवसायितया दुरन्तदुःखफल एव । ननु शुद्धक्रियाया एव पक्षपाते क्रियमाणे शुद्धायास्तस्या अलाभादशुद्धायाश्चानङ्गीकारादानुश्रोतसिक्या वृत्त्याऽक्रियापरिणामस्य स्वत उपनिपातात्तीर्थोच्छेदः स्यादेव, यथाकथञ्चिदनुष्ठानावलम्बने च जैनक्रियाविशिष्टजनसमुदायरूपं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थं न व्यवच्छिद्यते, न च कर्तुरविधिक्रियया गुरोरुपदेशकस्य कश्चिद्दोषः, अक्रियाकर्तुरिवाविधिक्रियाकर्तुस्तस्य स्वपरिणामाधीनप्रवृत्तिकत्वात्, केवलं क्रियाप्रवर्तनेन गुरोस्तीर्थव्यवहाररक्षणाद्गुण एवेत्याशङ्कायामाह—न च स्वयंमृतमारितयोरविशेषः, किन्तु विशेष एव, स्वयंमृते स्वदुष्टाशयस्यानिमित्तत्वात्, मारिते च मार्यमाणकर्मविपाकसमुपनिपातेऽपि स्वदुष्टाशयस्य निमित्तत्वात्, तद्वदिह स्वयमक्रियाप्रवृत्तं जीवमपेक्ष्य गुरोर्न दूषणम्, तदीयाविधिप्ररूपणमवलम्ब्य श्रोतुरविधिप्रवृत्तौ च तस्योन्मार्गप्रवर्तनपरिणामादवश्यं महादूषणमेव, तथा च श्रुतकेवलिनो वचनम्—"जह सरणमुवगयाण, जीवाण सिरो निकिंतए जो उ ॥ एवं आयरिओ वि हु, उस्सुत्तं पण्णवेंतो य ॥५१८॥" उपदेशमाला [यथा शरणमुपगतानां जीवानां शिरो निकृन्तति यस्तु। एवमाचार्योपि उत्सूत्रं प्रज्ञापयंश्च] न केवलमविधिप्ररूपणे दोषः, किन्त्वविधिप्ररूपणाभोगेऽविधिनिषेधासम्भवात्तदाशंसनानुमोदनापत्तेः फलतस्तत्प्रवर्तकत्वाद्दोष एव, तस्मात् " स्वयमेतेऽविधिप्रवृत्ता नात्रास्माकं दोषो वयं हि क्रियामेवोपदिशामो न त्वविधिम्" एतावन्मात्रमपुष्टालम्बनमवलम्ब्य नोदासितव्यं परहितनिरतेन धर्माचार्येण, किन्तु सर्वोद्यमेनाविधिनिषेधेन विधावेव श्रोतारः प्रवर्तनीयाः, एवं हि ते मार्गे प्रवेशिताः, अन्यथा तून्मार्गप्रवेशनेन नाशिताः। एतदपि भावयितव्यमिह तीर्थोच्छेदभीरुभिः विधिव्यवस्थापनेनैव ह्येकस्यापि जीवस्य सम्यग् बोधिलाभे चतुर्दशरज्ज्वात्मकलोकेऽमारिपटहवादनात्तीर्थोन्नतिः, अविधिस्थापने च विपर्ययात्तीर्थोच्छेद एवेति। यस्तु श्रोता विधिशास्त्रश्रवणकालेऽपि न संवेगभागी तस्य धर्मश्रावणेऽपि महादोष एव, तथा चोक्तं ग्रन्थकृतैव १० षोडशके—

॥ सविवरणम् ॥ अविध्यनुष्ठानकर्तुः कारयितुश्च दोषावहत्वम् ॥ गाथा १६॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"यः श्रृण्वन् (शृण्वन्नपि) सिद्धान्तं, विषयपिपासातिरेकतः पापः ॥ प्राप्नोति न संवेगं, तदापि यः सोऽचिकित्स्य इति ॥ १४ ॥ नैवंविधस्य शस्तं, मण्डल्युपवेशनप्रदानमपि ॥ कुर्वन्नेतद्गुरुरपि, तदधिकदोषोऽवगन्तव्यः ॥ १६ ॥" मण्डल्युपवेशनं–सिद्धान्तदानेऽर्थमण्डल्युपवेशनम् । तदधिकदोषः अयोग्यश्रोतुरधिकदोषः, पापकर्तुरपेक्षया तत्कारयितुर्महादोषत्वात् । तस्माद्विधिश्रवणरसिकं श्रोतारमुद्दिश्य विधिप्ररूपणेनैव गुरुस्तीर्थव्यवस्थापको भवति, विधिप्रवृत्त्यैव च तीर्थमव्यवच्छिन्नं भवतीति सिद्धम् ॥ १५ ॥

ननु किमेतावद्गूढार्थगवेषणया ?, यद्बहुभिर्जनैः क्रियते तदेव कर्तव्यं 'महाजनो येन गतः स पन्थाः' इति वचनात्, जीतव्यवहारस्यैवेदानीं बाहुल्येन प्रवृत्तेस्तस्यैवाऽऽतीर्थकालभावित्वेन तीर्थव्यवस्थापकत्वादित्याशङ्कायामाह—

मुत्तूण लोगसन्नं, उड्ढूण य साहुसमयसब्भावं ॥ सम्मं पयट्टियव्वं, बुहेणमइनिउणबुद्धीए ॥१६॥

मुत्तूण त्ति । मुक्त्वा लोकसंज्ञां लोक एव प्रमाणं इत्येवंरूपां शास्त्रनिरपेक्षां मतिं, उड्ढूण य त्ति वोढ्वा च, साधुसमयसद्भावं समीचीनसिद्धान्तरहस्यं, सम्यग् विधिनीत्या, प्रवर्त्तितव्यं चैत्यवन्दनादौ, बुधेन पण्डितेन, अतिनिपुणबुद्ध्या अतिशयितसूक्ष्मभावानुधाविन्या मत्या । साधुसमयसद्भावश्चायम् (ज्ञानसार, २३ अ०)॥ "लोकमालम्ब्य कर्तव्यं, कृतं बहुभिरेव चेत् ॥ तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात्कदाचन ॥४॥ स्तोका आर्या अनार्येभ्यः, स्तोका जैनाश्च तेष्वपि ॥ सुश्रद्धास्तेष्वपि स्तोकाः स्तोकास्तेष्वपि सत्क्रियाः॥२॥श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे च न। स्तोका हि रत्नवणिजः, स्तोकाश्च स्वात्म-

शास्त्रनिरपेक्षलोकसंज्ञात्यागोपदेशगर्भसम्यक्सिद्धान्तानुसारिविधिप्रवृत्त्युपदेशश्च ॥ गाथा–१६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शोधकाः॥५॥ एकोऽपि शास्त्रनीत्या यो, वर्तते स महाजनः ॥ किमज्ञसार्थैः? शतम-प्यन्धानां नैव पश्यति॥४॥ यत्संविग्नजनाचीर्णं,श्रुतवाक्यैरबाधितम् ॥तज्जीतं व्यवहाराख्यं, पारम्पर्यविशुद्धिमत् ॥५॥ यदाचीर्णमसंविग्नैः, श्रुतार्थानवलम्बिभिः॥ न जीतं व्यवहारस्त-दन्धसन्ततिसम्भवम् ॥६॥ आकल्पव्यवहारार्थं, श्रुतं न व्यवहारकम्॥इति वक्तुर्महत्तन्त्रे, प्रायश्चित्तं प्रदर्शितम्॥७॥ तस्माच्छ्रु-तानुसारेण, विध्येकरसिकैर्जनैः॥ संविग्नजीतमालम्ब्य-मित्याज्ञा पारमेश्वरी॥८॥" ननु यद्येवं सर्वाद-रेण विधिपक्षपातः क्रियते तदा "अविहिकया वरमकयं,असूयवयणं भणंति सव्वन्नू। पायच्छित्तं जम्हा, अकए गुरुयं कए लहुअं॥१॥"[अविधिकृताद्वरमकृतं ? असूयावचनं भणन्ति सर्वज्ञाः । प्रायश्चित्तं यस्मादकृते गुरुकं कृते लघुकं]इत्यादि वचनानां का गतिः? इति चेत्, नैतानि वचनानि मूलत एवाविधिप्रवृत्तिविधायकानि, किन्तु विधिप्रवृत्तावप्यनाभोगादिनाऽविधिदोषश्छद्मस्थस्य भवतीति तद्भिया न क्रियात्यागो विधेयः, प्रथमाभ्यासे तथाविधज्ञानाभावादन्यदापि वा प्रज्ञापनीयस्याविधिदोषो निरनुबन्ध इति तस्य तादृशानुष्ठानमपि न दोषाय, विधि-बहुमानाद् गुर्वाज्ञायोगाच्च तस्य फलतो विधिरूपत्वादित्येतावन्मात्रप्रतिपादनपराणीति न कश्चिद्दोषः॥ अवोचाम चाध्यात्मसारप्रकरणे(२ अधि०)"अशुद्धापि हि शुद्धायाः,क्रिया हेतुः सदाशयात्॥ताम्रं रसानुवेधेन, स्वर्णत्वमुपगच्छति॥१६॥"यस्तु विध्यबहुमानादविधिक्रियामासेवते तत्कर्तुरपेक्षया विधिव्यवस्थापनरसिकस्त-दकर्ताऽपि भव्य एव,तदुक्तं योगदृष्टिसमुच्चये ग्रन्थकृतैव"तात्त्विकः पक्षपातश्च,भावशून्या च या क्रिया॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव॥२२२॥" इत्यादि। न चैवं तादृशषष्ठसप्तमगुणस्थानपरिणतिप्रयोज्यविधिव्यवहाराभावादस्मदादीनामिदानीन्तनमावश्यकाद्याचरणमकर्तव्यमेव प्रसक्तमिति शङ्कनीयम्, विकलानुष्ठानानामपि "जा जा हविज्ज जयणा, सा सा से णिज्जरा होइ।" (या या भवेद्यतना सा सा तस्य निर्जरा भवति) इत्यादिवचनप्रामाण्यात् यत्किञ्चिद्विध्यनुष्ठानस्येच्छायोगसम्पादकतदितरस्यापि बालाद्यनुग्रहसम्पादकत्वेनाकर्तव्यत्वासिद्धेः। इच्छायोगवद्भिर्विकलानुष्ठायिभिर्गीतार्थैः सिद्धान्तविधिप्ररूपणे तु निर्भरो विधेयस्तस्यैव तेषां सकलकल्याणसम्पादकत्वात्, उक्तं च गच्छाचारप्रकीर्णके "जइ वि ण सक्कं काउं, सम्मं जिणभासियं अणुट्ठाणं॥ तो सम्मं भासिज्जा, जह भणियं खीणरागेहिं॥३२॥ ओसन्नो वि विहारे, कम्मं सोहेइ सुलभबोही य॥ चरणकरणं विसुद्धं, उववूहंतो परूविंतो॥३४॥" [यद्यपि न शक्यं कर्तुं सम्यग्जिनभाषितमनुष्ठानं, तथापि सम्यग्भाषेत यथा भणितं क्षीणरागैः॥ अवसन्नोपि विहारे कर्म शोधयति सुलभबोधिश्च, चरणकरणं विशुद्धमुपबृंहयन्प्ररूपयन्] इति। ये तु गीतार्थाज्ञानिरपेक्षा विध्यभिमानिन इदानीन्तनव्यवहारमुत्सृजन्ति अन्यं च विशुद्धं व्यवहारं सम्पादयितुं न शक्नुवन्ति ते बीजमात्रमप्युच्छिन्दन्तो महादोषभाजो भवन्ति। विधिसम्पादकानां विधिव्यवस्थापकानां च दर्शनमपि प्रत्यूहव्यूहविनाशनमिति वयं वदामः॥१६॥ अथेमं प्रसक्तमर्थं संक्षिपन् प्रकृतं निगमयन्नाह--

कयमित्थ पसंगेणं, ठाणाइसु जत्तसंगयाणं तु॥ हियमेयं विन्नेयं, सदणुट्ठाणत्तणेण तहा॥१७॥

कयमित्थ त्ति। कृतं पर्याप्तं, अत्र प्रसङ्गेन प्ररूपणीयमध्ये स्मृतार्थविस्तारणेन, स्थानादिषु प्रदर्शित-

सयुक्तिकं शास्त्रानुसारिविधिप्रवृत्त्युपदेशसमर्थनम्॥ गाथा-१६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योगभेदेषु, यत्नसङ्गतानां तु प्रयत्नवतामेव, एतत् चैत्यवन्दनाद्यनुष्ठानं, हितं मोक्षसाधकं विज्ञेयम्, चैत्यवन्दनगोचरस्थानादियोगस्य मोक्षहेतुत्वे तस्यापि तत्प्रयोजकत्वादिति भावः। तथा इति प्रकारान्तरसमुच्चये। सदनुष्ठानत्वेन, योगपरिणामकृतपुण्यानुबन्धिपुण्यनिक्षेपाद्विशुद्धचित्तसंस्काररूपया प्रशान्तवाहितया सहितस्य चैत्यवन्दनादेः स्वातन्त्र्येणैव मोक्षहेतुत्वादिति भावः॥ प्रकारभेदोऽयं नयभेदकृत इति न कश्चिद्दोषः ॥ १७ ॥

सदनुष्ठानभेदानेव प्ररूपयंश्चरमतद्भेदे चरमयोगभेदमन्तर्भावयन्नाह—

**एयं च पीइभत्ता–गमाणुगं तह असंगयाजुत्तं॥ नेयं चउव्विहं खलु, एसो चरमो हवइ जोगो ॥१८॥**

एयं च त्ति। एतच्च सदनुष्ठानं, प्रीतिभक्त्यागमाननुगच्छति तत् प्रीतिभक्त्यागमानुगं–प्रीत्यनुष्ठानं १ भक्त्यनुष्ठानं २ वचनानुष्ठानं ३ चेति त्रिभेदं, तथाऽसङ्गतया युक्तं असङ्गानुष्ठानम् ४, इत्येवं चतुर्विधं ज्ञेयम्। एतेषां भेदानाभिदं स्वरूपम्—'यत्रानुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरुत्पद्यते शेषत्यागेन च यत्क्रियते तत्प्रीत्यनुष्ठानम्॥१॥' आह च (षोडशक १०) "यत्रादरोऽस्ति परमः, प्रीतिश्च हितोदया भवति कर्तुः॥ शेषत्यागेन करो–ति यच्च तत्प्रीत्यनुष्ठानम्॥ ३॥" 'एततुल्यमप्यालम्बनीयस्य पूज्यत्वविशेषबुद्ध्या विशुद्धतरव्यापारं भक्त्यनुष्ठानम्॥ २॥' आह च "गौरवविशेषयोगा–द्बुद्धिमतो यद्विशुद्धतरयोगम्। क्रिययेतरतुल्यमपि, ज्ञेयं तद्भक्त्यनुष्ठानम्॥४॥" प्रीतित्वभक्तित्वे संतोष्यपूज्यकृत्यकर्तव्यताज्ञानजनितहर्षगतौ जातिविशेषौ, आह च "अत्यन्तवल्लभा खलु, पत्नी तद्वद्धिता च जननीति॥ तुल्यमपि कृत्यमनयो–

प्रसङ्गसङ्गत्युपात्तार्थप्ररूपणोपसंहारः॥ स्थानादियोगभेदेषु प्रयत्नवतामेवानुष्ठानसाफल्यं प्रीत्याद्यनुष्ठानभेदप्ररूपणं च॥ गाथा १७–१८॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञातं स्यात्प्रीतिभक्तिगतम्॥५॥"तुल्यमपि कृत्यं भोजनाच्छादनादि,ज्ञातंउदाहरणम् ॥'शास्त्रार्थप्रतिसन्धानपूर्वा साधोः सर्वत्रोचितप्रवृत्तिर्वचनानुष्ठानम्॥३॥'आह च"वचनात्मिका प्रवृत्तिः, सर्वत्रौचित्ययोगतो या तु॥वचनानुष्ठानमिदं, चारित्रवतो नियोगेन॥६॥" 'व्यवहारकाले वचनप्रतिसन्धाननिरपेक्षं दृढतरसंस्काराच्चन्दनगन्धन्यायेनात्मसाद्भूतं जिनकल्पिकादीनां क्रियासेवनमसङ्गानुष्ठानम्॥४॥'आह च"यत्त्वभ्यासातिशयात्सात्मीभूतमिव चेष्ट्यते सद्भिः॥तदसङ्गानुष्ठानं,भवति त्वेतत्तदावेधात्॥७॥"तदावेधाद्वचनसंस्कारात्, यथाऽऽद्यं चक्रभ्रमणं दण्डव्यापारादुत्तरं च तज्जनितकेवलसंस्कारादेव,तथा भिक्षाटनादिविषयं वचनानुष्ठानं वचनव्यापाराद्, असङ्गानुष्ठानं च केवलतज्जनितसंस्कारादिति विशेषः, आह च "चक्रभ्रमणं दण्डा–त्तदभावे चैव यत्परं भवति॥वचनासङ्गानुष्ठा–नयोस्तु तज्ज्ञापकं ज्ञेयम्॥८॥" इति॥ खलु इति निश्चये। एतेष्वनुष्ठानभेदेषु एषः एतदः समीपतरवृत्तिवाचकत्वात्समीपाभिहिताऽसङ्गानुष्ठानात्मा चरमो योगोऽनालम्बनयोगो भवति, सङ्गत्यागस्यैवानालम्बनलक्षणत्वादिति भावः ॥ १८ ॥ आलम्बनविधयैवानालम्बनस्वरूपमुपदर्शयन्नाह—

**आलंबणं पि एयं, रूवमरूवी य इत्थ परमु त्ति ॥ तग्गुणपरिणइरूवो, सुहुमोऽणालंबणो नाम ॥१९॥**

'आलंबणं पि' त्ति। आलम्बनमपि एतत् प्राकरणिकबुद्धिसन्निहितं, अत्र योगविचारे, 'रूपि' समवसरणस्थजिनरूपतत्प्रतिमादिलक्षणम्, च पुनः, 'अरूपी परमः' सिद्धात्मा, इत्येवं द्विविधम्। तत्र तस्य–अरूपिपरमात्मलक्षणस्यालम्बनस्य ये गुणाः–केवलज्ञानादयस्तेषां परिणतिः–समापत्तिलक्षणा तया रूप्यत इति

प्रीत्यादि-सदनुष्ठानभेदलक्षणादि-निरूपणं, असङ्गानुष्ठाने चानालम्बनयोगनिवेशः ॥ गाथा १८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्गुणपरिणतिरूपः सूक्ष्मोऽतीन्द्रियविषयत्वात्, अनालम्बनो नाम योगः, अरूप्यालम्बनस्येषदालम्बनत्वेन "अलवणा यवागूः" इत्यत्रेवात्र नञ्पदप्रवृत्तेरविरोधात्। "सुहुमो आलंबणो नाम"त्ति क्वचित्पाठस्तत्रापि सूक्ष्मालम्बनो नामैष योगस्ततोऽनालम्बन एवेति भाव उन्नेयः, उक्तं चात्राधिकारे चतुर्दशषोडशके ग्रन्थकृतैव—"सालम्बनो निराल-म्बनश्च योगः परो द्विधा ज्ञेयः॥ जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः ॥१॥" सहालम्बनेन—चक्षुरादिज्ञानविषयेण प्रतिमादिना वर्तत इति सालम्बनः। आलम्बनात्—विषयभावापत्तिरूपान्निष्क्रान्तो निरालम्बनः, यो हि च्छद्मस्थेन ध्यायते न च स्वरूपेण दृश्यते तद्विषयो निरालम्बन इति यावत्। जिनरूपस्य—समवसरणस्थस्य ध्यानं खलु आद्यः सालम्बनो योगः। तस्यैव—जिनस्य तत्त्वं केवलजीवप्रदेशसङ्घातरूपं केवलज्ञानादिस्वभावं तस्मिन् गच्छतीति तत्तत्त्वगः, 'तुः' एवार्थे, 'अपरः' अनालम्बनः, अत्रारूपितत्त्वस्य स्फुटविषयत्वाभावादनालम्बनत्वमुक्तम्। अधिकृतग्रन्थगाथायां च विषयतामात्रेण तस्यालम्बनत्वमनूद्यापि तद्विषययोगस्येषदालम्बनत्वादनालम्बनत्वमेव प्रासाधीति फलतो न कश्चिद्विशेष इति स्मर्तव्यम्। अयं चानालम्बनयोगः (योगदृष्टि.)"शास्त्रसन्दर्शितोपाय-स्तदतिक्रान्तगोचरः॥ शक्त्युद्रेकाद्विशेषेण, सामर्थ्याख्योयमुत्तमः॥३॥" इतिश्लोकोक्तस्वरूपक्षपकश्रेणीद्वितीयापूर्वकरणभाविक्षायोपशमिकक्षान्त्यादिधर्मसन्न्यासरूपसामर्थ्ययोगतो निस्सङ्गानवरतप्रवृत्ता या परतत्त्वदर्शनेच्छा तल्लक्षणो मन्तव्यः, आह च (षोडशक.१५) "सामर्थ्ययोगतो या, तत्र दिदृक्षेत्यसङ्गशक्त्याढया॥ साऽनालम्बनयोगः, प्रोक्तस्तददर्श-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(स्तद्दर्श)[य०भ०टी०]नं यावत्॥८॥" 'तत्र'परतत्त्वे द्रष्टुमिच्छा दिदृक्षा,'इति' एवंस्वरूपाया असङ्गशक्त्या निरभिष्वङ्गाविच्छिन्नप्रवृत्त्या, आढ्या–पूर्णा, 'सा' परमात्मदर्शनेच्छा, अनालम्बनयोगः, परतत्वस्यादर्शनं अनुपलम्भं यावत्, परमात्मस्वरूपदर्शने तु केवलज्ञानेनानालम्बनयोगो न भवति, तस्य तदालम्बनत्वात्।'अलब्धपरतत्त्वस्तल्लाभाय ध्यानरूपेण प्रवृत्तो ह्यनालम्बनयोगः,' स च क्षपकेण धनुर्धरेण क्षपकश्रेण्याख्यधनुर्दण्डे लक्ष्यपरतत्त्वाभिमुखं तद्वेधाविसंवादितया व्यापारितो यो बाणस्तत्स्थानीयः, यावत्तस्य न मोचनं तावदनालम्बनयोगव्यापारः, यदा तु ध्यानान्तरिकाख्यं तन्मोचनं तदाऽविसंवादितत्पतनमात्रादेव लक्ष्यवेध इतीषुपातकल्पः सालम्बनः केवलज्ञानप्रकाश एव भवति, न त्वनालम्बनयोगव्यापारः, फलस्य सिद्धत्वादिति निर्गलितार्थः ॥ आह च (षोडशक.१५) "तत्राप्रतिष्ठितोऽयं, यतः प्रवृत्तश्च तत्त्वतस्तत्र ॥ सर्वोत्तमानुजः खलु, तेनानालम्बनो गीतः ॥ ९ ॥ द्रागस्मात्तद्दर्शन–मिषुपातज्ञातमात्रतो ज्ञेयम् ॥ एतच्च केवलं तत्, ज्ञानं यत्तत्परं ज्योतिः ॥ १० ॥ " तत्र परतत्त्वे, अप्रतिष्ठितः अलब्धप्रतिष्ठः, सर्वोत्तमस्य योगस्य–अयोगाख्यस्य, अनुजः–पृष्ठभावी ॥ तद्दर्शनं परतत्त्वदर्शनं,एतच्च परतत्त्वदर्शनं,केवलं सम्पूर्णं, तत् प्रसिद्धं यत् तत् केवलज्ञानं, परं प्रकृष्टं, ज्योतिः ॥ स्यादत्र कस्यचिदाशङ्का–इषुपातज्ञातात्परतत्त्वदर्शने सति केवलज्ञानोत्तरमनालम्बनयोगप्रवृत्तिर्मा भूत्,सालम्बनयोगप्रवृत्तिस्तु विशिष्टतरा काचित्स्यादेव,केवलज्ञानस्य लब्धत्वेऽपि मोक्षस्याद्यापि योजनीयत्वात्,मैवम्,केवलिनः स्वात्मनि मोक्षस्य योजनीयत्वेऽपि ज्ञानाकाङ्क्षाया अविषयतया ध्यानानालम्बनत्वात्क्षपक-

अनालम्बनयोगस्यैव योगदृष्टि–षोडशकादिसंवादेन विशिष्टस्वरूपवर्णनम्॥ गाथा १९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेणिकालसम्भविविशिष्टतरयोगप्रयत्नाभावादावर्जीकरणोत्तरयोगनिरोधप्रयत्नाभावाच्चार्वाक्तनकेवलिव्यापारस्य ध्यानरूपत्वाभावादुक्तान्यतरयोगपरिणतेरेव ध्यानलक्षणत्वात्। आह च महाभाष्यकारः—"सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाण ॥ झाणं करणाण मयं, ण उ चित्तणिरोहमित्तागं ॥३०७१॥" (सुदृढप्रयत्नव्यापारणं निरोधो वा विद्यमानानाम्। ध्यानं करणानां मतं न तु चित्तनिरोधमात्रम्) इति। स्यादेतद्, यदि क्षपकश्रेणिद्वितीयापूर्वकरणभावी सामर्थ्ययोग एवानालम्बनयोगो ग्रन्थकृताऽभिहितस्तदा तदप्राप्तिमतामप्रमत्तगुणस्थानानामुपरतसकलविकल्पकल्लोलमालानां चिन्मात्रप्रतिबन्धोपलब्धरत्नत्रयसाम्राज्यानां जिनकल्पिकादीनामपि निरालम्बनध्यानमसङ्गताभिधानं स्यादिति, मैवम्, यद्यपि तत्त्वतः परतत्त्वलक्ष्यवेधाभिमुखस्तदविसंवादी सामर्थ्ययोग एव निरालम्बनस्तथापि परतत्त्वलक्ष्यवेधप्रगुणतापरिणतिमात्रादर्वाक्तनं परमात्मगुणध्यानमपि मुख्यनिरालम्बनप्रापकत्वादेकध्येयाकारपरिणतिशक्तियोगाच्च निरालम्बनमेव। अत एवावस्थात्रयभावने रूपातीतसिद्धगुणप्रणिधानवेलायामप्रमत्तानां शुक्लध्यानांशो निरालम्बनोऽनुभवसिद्ध एव। संसार्यात्मनोऽपि च व्यवहारनयसिद्धमौपाधिकं रूपमाच्छाद्यशुद्धनिश्चयनयपरिकल्पितसहजात्मगुणविभावने निरालम्बनध्यानं दुरपह्नवमेव, परमात्मतुल्यतयाऽऽत्मज्ञानस्यैव निरालम्बनध्यानांशत्वात् तस्यैव च मोहनाशकत्वात्। आह च—"जो जाणइ अरिहंते, दव्वत्तगुणत्तपज्जयत्तेहिं। सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं ॥१॥" (यो जानात्यर्हतो द्रव्यत्वगुणत्वपर्यायत्वैः। स जानात्यात्मानं मोहः खलु याति तस्य लयम्) इति। तस्माद्रूपिद्रव्यविषयं ध्यानं



इषुपातदृष्टान्तेनानालम्बनयोगनिरूपणं तत्र पराशंकापरिहारश्च॥ गाथा १९॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सालम्बनं, अरूपिविषयं च निरालम्बनमिति स्थितम् ॥ १६ ॥ अथ निरालम्बनध्यानस्यैव फलपरम्परामाह—

**एयम्मि मोहसागर-तरणं सेढी य केवलं चेव ॥ तत्तो अजोगजोगो, कमेण परमं च निव्वाणं ॥२०॥**

'एयम्मि'त्ति। 'एतस्मिन्' निरालम्बनध्याने लब्धे, मोहसागरस्य-दुरन्तरागादिभावसन्तानसमुद्रस्य तरणं भवति। ततश्च 'श्रेणिः'क्षपकश्रेणिर्निर्व्यूढा भवति, सा ह्यध्यात्मादियोगप्रकर्षगर्भिताशयविशेषरूपा। एष एव सम्प्रज्ञातः समाधिस्तीर्थान्तरीयैर्गीयते, एतदपि सम्यग्-यथावत् प्रकर्षेण-सवितर्कनिश्चयात्मकत्वेनात्मपर्यायाणामर्थानां च द्वीपादीनामिह ज्ञायमानत्वादर्थतो नानुपपन्नम्। ततश्च 'केवलमेव' केवलज्ञानमेव भवति। अयं चासम्प्रज्ञातः समाधिरिति परैर्गीयते, तत्रापि अर्थतो नानुपपत्तिः, केवलज्ञानेऽशेषवृत्त्यादिनिरोधाल्लब्धात्मस्वभावस्य मानसविज्ञानवैकल्यादसम्प्रज्ञातत्वसिद्धेः। अयं चासम्प्रज्ञातः समाधिर्द्विधा—सयोगिकेवलिभावी अयोगिकेवलिभावी च, आद्यो मनोवृत्तीनां विकल्पज्ञानरूपाणामत्यन्तोच्छेदात्सम्पद्यते। अन्त्यश्च परिस्पन्दरूपाणाम्, अयं च केवलज्ञानस्य फलभूतः। एतदेवाह, ततश्च केवलज्ञानलाभादनन्तरं च, अयोगयोगः वृत्तिबीजदाहायोगाख्यः समाधिर्भवति, अयं च धर्ममेघः इति पातञ्जलैर्गीयते, अमृतात्मा इत्यन्यैः, भवशत्रुः इत्यपरैः, शिवोदयः इत्यन्यैः, सत्त्वानन्दः इत्येकैः, परश्च इत्यपरैः। क्रमेण उपदर्शितपारम्पर्येण, ततोऽयोगयोगात्, परमं सर्वोत्कृष्टफलं, निर्वाणं भवति॥२०॥

॥ इति महोपाध्याय श्रीकल्याणविजयगणिशिष्यमुख्यपण्डितश्रीजीतविजयगणिसतीर्थ्यपण्डितश्रीनयविजयगणिचरणकमलचञ्चरीकपण्डित-श्रीपद्मविजयगणिसहोदरोपाध्यायश्रीजसविजयगणिसमर्थितायां विंशिकाप्रकरणव्याख्यायां योगविंशिकाविवरणं सम्पूर्णम् ॥

पारम्पर्येण निर्वाण-प्राप्तिपर्यन्तं निरालम्बन-ध्यानफलं ॥ गाथा २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ न्यायविशारद-न्यायाचार्य-महोपाध्यायश्रीयशोविजयगणिप्रणीतं स्वोपज्ञतत्त्वविवेकाख्यविवरणविभूषितं ॥

## ॥ श्रीकूपदृष्टान्तविशदीकरणप्रकरणम् ॥

ऐन्द्रश्रीर्यत्पदाब्जे विलुठति सततं राजहंसीव यस्य, ध्यानं मुक्तेर्निदानं प्रभवति च यतः सर्वविद्याविनोदः ॥ श्रीमन्तं वर्धमानं त्रिभुवनभवनाभोगसौभाग्यलीला-विस्फूर्जत्केवलश्रीपरिचयरसिकं तं जिनेन्द्रं भजामः॥१॥ सिद्धान्तसुधास्वादी, परिचितचिन्तामणिर्नयोल्लासी ॥ तत्त्वविवेकं कुरुते न्यायाचार्यो यशोविजयः॥ २ ॥ तत्रेयमिष्टदेवतानमस्कारपूर्वकं प्रतिज्ञागर्भा प्रथमगाथामाह—

नमिऊण महावीरं, तियसिंदणमंसियं महाभागं ॥ विसईकरेमि सम्मं, दव्वत्थए कूवदिट्ठंतं ॥१॥

व्याख्या—नत्वा महावीरं त्रिदशेन्द्रैर्नमस्कृतं महाभागं महानुभावं, महती आभा केवलज्ञानशोभा तां गच्छति यः स तथा तमिति वा । विशदीकरोमि निश्चितप्रामाण्यकज्ञानविषयतया प्रदर्शयामि । सम्यक् असम्भावनाविपरीतभावनानिरासेन, द्रव्यस्तवे स्वपरोपकारजनकत्वान्निर्दोषतया साध्ये इति शेषः । कूपदृष्टान्तं अवटदृष्टान्तं, धूमवत्त्वाद्वह्निमत्तया साध्ये पर्वते महानसदृष्टान्त इतिवद् अयं प्रयोगः ॥ अत्र च भगवतश्चत्वारो मूलातिशयाः प्रतिपादिताः। तथा हि महावीरमित्यनेन "विदारयति यत्कर्म, तपसा च विराजते ॥ तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥ १ ॥" इति निरुक्तात्सकलापायमूलभूतकर्मविदारणक्षमतपोवीर्यवि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राजमानत्वाभिधानादपायापगमातिशयः १ ॥ त्रिदशेन्द्रनमस्कृतमित्यनेन पूजातिशयः २ ॥ महाभागमित्यनेन ज्ञानातिशयः प्रतिपादितः ३ ॥ वचनातिशयश्च सामर्थ्यगम्य इति ४ ॥ प्रतिज्ञातमेवाह—

**सपरोवयारजणगं, जणाण जह कूवखणणमाइट्ठं॥ अकसिणपवत्तगाणं, तह दव्वत्थओ वि विण्णेयो॥२**

व्याख्या—यथा जनानां कूपखननं निर्मलजलोत्पादनद्वारा,स्वपरोपकारजनकमादिष्टं एवं अकृत्स्नप्रवर्तकानां कृत्स्नसंयमेऽप्रवृत्तिमतां गृहिणां, द्रव्यस्तवोऽपि स्नानपूजादिकः करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं, विज्ञेयः॥ दृष्टान्ते उपकारो द्रव्यात्मा, दार्ष्टान्तिके च भावात्मेतिभावः॥२॥ नन्वियं योजनाऽभयदेवसूरिणैव(चतुर्थ)पञ्चाशकवृत्तौ दूषिताऽन्यथायोजना च कृता, तथा हि॥ "न्हाणाइवि जयणाए, आरंभवओ गुणाय णियमेण॥ सुहभावहेउओ खलु, विण्णेयं कूवणाएणं ॥१०॥" स्नानाद्यपि देहशौचप्रभृतिकमपि, आस्तां पूजार्चादि (तद्वर्जनं पूजा वा) आदिशब्दाद्विलेपनादिग्रहः, गुणायेति योगः, यतनया रक्षयितुं शक्यजीवरक्षणरूपया। तत्किं साधोरपीत्याशंक्याह, आरम्भवतः स्वजनधनगेहादिनिमित्तं कृष्यादिकर्मभिः पृथिव्यादिजीवोपमर्दनयुक्तस्य गृहिण इत्यर्थः। न पुनः साधोः, तस्य सर्वसावद्ययोगविरतत्वाद्भावस्तवारूढत्वाच्च, भावस्तवारूढस्य हि स्नानादिपूर्वकद्रव्यस्तवोऽनादेय एव, भावस्तवार्थमेव तस्याश्रयणीयत्वात्तस्य च स्वत एव सिद्धत्वात्। एनं चार्थं प्रकरणान्तरे स्वयमेव वक्ष्यतीति॥ गुणाय पुण्यबन्धलक्षणोपकाराय, नियमेनावश्यम्भावेन, अथ कथं स्वरूपेण सदोषमप्यारम्भिणो गुणायेत्याह, सुभभावहेउओत्ति लुप्तभावप्रत्ययत्वेन निर्देशस्य शुभभावहेतुत्वात्प्रशस्तभावनिबन्धन-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वाज्जिनपूजार्थस्नानादेः, अनुभवन्ति च केचित्स्नानपूर्वकं जिनार्चनं विदधानाः शुभभावमिति। खल्लुर्वाक्यालङ्कारे, विज्ञेयं ज्ञातव्यम् । अथ गुणकरत्वमस्य शुभभावहेतुत्वात्कथमिव ज्ञेयमित्याह–कूपज्ञातेनावटोदाहरणेन, इह चैवं साधनप्रयोगः'गुणकरमधिकारिणि(णः)किञ्चित्सदोषमपि स्नानादि,विशिष्टशुभभावहेतुत्वाद्, विशिष्टशुभभावहेतुभूतं यत्तद्गुणकरं दृष्टं यथा कूपखननं, विशिष्टशुभभावहेतुश्च यतनया स्नानादि ततो गुणकरमिति'॥ कूपखननपक्षे शुभभावः तृष्णादिव्युदासेनानन्दाद्यवाप्तिरिति॥ इदमुक्तं भवति यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोषदुष्टमपि जलोत्पत्तावनन्तरोक्तदोषानपोह्य स्वोपकाराय परोपकाराय च किल भवतीत्येवं स्नानादिकमप्यारम्भदोषमपोह्य शुभाध्यवसायोत्पादनेन विशिष्टाशुभकर्मनिर्जरणपुण्यबन्धकारणं भवतीति ॥ इह केचिन्मन्यन्ते पूजार्थस्नानादिकरणकालेपि निर्मलजलकल्पशुभाध्यवसायस्य विद्यमानत्वेन कर्दमलेपादिकल्पपापाभावाद्विषममिदमुदाहरणं, तदा( तत् )किलेदमित्थं योजनीयं यथा कूपखननं स्वपरोपकाराय भवत्येवं स्नानपूजादिकं करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं स्यादिति॥ नचैतदागमानुपाति, यतो धर्मार्थप्रवृत्तावप्यारम्भजनितस्याल्पस्य पापस्येष्टत्वात्, कथमन्यथा भगवत्यामुक्तं "तहारूवं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे भंते ? किं" कज्जइ ?, गोयमा ! अप्पे पावे कम्मे बहुययरिया से निज्जरा कज्जइ" ॥ तथा ग्लानप्रतिचरणानन्तरं पञ्चकल्याणकप्रायश्चित्तप्रतिपत्तिरपि कथं स्यात् ?॥ इत्यलं प्रसङ्गेनेतिगाथार्थ इति" ॥ तदेतन्निह्नुवतां कूपदृष्टान्तविशदीकरणं काकपक्षविशदीकरणवदुपहासपात्रतामभिव्यनक्ति स्वसम्मताभियुक्तवचनविरुद्धत्वादि-





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्याशङ्कायां नाभियुक्तवचनविरोधो(विरोधोऽविरोधो)न्मुखानामवभासते तस्य भिन्नतात्पर्यकत्वादित्याशयवानाह—
इसिं दुट्ठत्ते जं, एयस्स नवंगवित्तिकारेणं ॥ संजोयणं कयं तं, विहिविरहे भत्तिमहिगिच्च ॥ ३ ॥

व्याख्या–इषद्दुष्टत्वे अल्पपापबहुनिर्जराकारणत्वे, यत्, एतस्य कूपदृष्टान्तस्य, नवाङ्गीवृत्तिकारेण श्रीअभयदेवसूरिणा पञ्चाशकाष्टकवृत्त्यादौ, तद्विधिविरहे यतनादिवैकल्ये, भक्तिमात्रमधिकृत्य, विधि-भक्त्यादिसाकल्ये तु स्वल्पमपि पापं वक्तुमशक्यमेवेतिभावः ॥३॥ कथमयमाशयः सूरेर्ज्ञात इति चेत् ?, तत्राह—
इहरा कहंचि वयणं, कायवहे कहं णु होज्ज पूयाए ॥ न य तारिसो तवस्सी,जंपइ पुव्वावरविरुद्धं ॥४॥

व्याख्या–इतरथा सूरेरुक्ताशयाभावे, पूजायां कायवधे कथञ्चिद्वचनं कथं नु भवेत् न कथञ्चिदित्यर्थः, न च तादृशस्तपस्वी पूर्वापरविरुद्धं वचनं, जल्पति ॥ तस्मादीषद्दोषदुष्टं जिनपूजादिकं विधिविरहभक्तिकालीनमेव ग्राह्यमित्याशय एव युक्तः ॥ अयं भावः–पूजापञ्चाशके जिनार्चने कायवधेन प्रतिक्रुष्टेन दुष्टत्वात्कथं परिशुद्धत्वमित्याशङ्कायां "भण्णइ जिणपूजाए, कायवहो जइवि होइ उ कहिं चि ॥ तहवि तई परिसुद्धा, गिहीणं कूवाहरणजोगा ॥४२॥" इति श्रीहरिभद्रसूरिभिस्समाहितं, तत्र च 'यतनाविशेषेण प्रवर्तमानस्य सर्वथापि न भवतीति दर्शनार्थं कथञ्चिद्ग्रहणमित्यभयदेवसूरिभिर्व्याख्यातं, तेन विधिविरह एव कायवधः पर्यवस्यति॥ "प्रमादयोगेन प्राणव्यपरोपणं हिंसेति" तत्त्वार्थोक्तहिंसाल[क्षणं]मपि जाघटीति। इत एव श्रीहरिभद्रसूरिभिर्जिनवरेन्द्रपूजाफलं

१. [ ] एतच्चिह्नान्तरितः पाठः पठनाभिरतानामर्थसङ्गतये संयोजितः स्याच्चेत्कस्यापि पार्श्वेपूर्णाविमौ ग्रन्थौ तदानिवेद्यं॥



For Private and Personal Use Only

समग्रविधिभक्तिभाजो यथाख्यातचारित्रपर्यवसानं पारम्पर्येण अल्पायुष्कतया पूजाया अविधानेपि पूजाप्रणिधानस्य सनिदर्शनं फलवत्त्वं च प्रतिपादितं। तथा हि। "उत्तमगुणबहुमाणो,पयमुत्तमसत्तमज्झयारंमि॥ उत्तमधम्मपसिद्धी,पूयाए जिणवरिंदाणं ॥४८॥" उत्तमगुणेषु प्रधानगुणेषु जिनेषु वीतरागत्वादिषु वा जिनगुणेषु, बहुमानः पक्षपात उत्तमगुणबहुमानः। स जिनपूजया भवतीति सम्बन्धः। पूजकस्येति गम्यं। तथा पदमवस्थानं, उत्तमसत्त्वमध्यकारे प्रधानप्राणिनां प्रधानाशयविशेषाणां वा जिनगणधरनाकिनरनायकादीनां मध्ये। तथोत्तमधर्मप्रसिद्धिः प्रधानधर्मस्य पूजाकाले प्रकृष्टपुण्यकर्मबन्धरूपस्याशुभकर्मक्षयरूपस्य कालान्तरक्रमेण यथाख्यातचारित्ररूपस्य निष्पत्तिर्भवति। अथवोत्तमधर्मप्रसिद्धिर्जिनशासनप्रकाशः। पूजयाऽभ्यर्चनेन, जिनाश्छद्मस्थवीतरागास्तेषां वराः प्रधानाः केवलिनस्तेषामिन्द्रास्तीर्थकरनामकर्मोदयवर्तित्वान्नानाविधातिशयसमेतत्वाच्च तीर्थकरा अतस्तेषां जिनवरेन्द्राणाम् ॥ इति गाथार्थः ॥ पूजा तावन्महाफलैव, अथ पूजाप्रणिधानमपि महाफलमिति दृष्टान्तेन दर्शयन्नाह ॥ "सुव्व(च्च)इ दुग्गइनारी, जगगुरुणो सिंदुवारकुसुमेहिं ॥ पूजापणिहाणेणं, उववन्ना तियसलोगंमि ॥४९॥" श्रूयत आकर्ण्यते जिनेन्द्रप्रवचने, किंतदित्याह–दुर्गतिनारी दारिद्र्योपहतयोषा। जगद्गुरोस्त्रिभुवननाथस्य, सिन्दुवारकुसुमैर्निर्गुण्डीपुष्पैः करणभूतैः। या, पूजाऽर्चनं तत्र यत्प्रणिधानं 'पूजां करोमीत्येवविधमैकाग्र्यं' तत्पूजाप्रणिधानम्। इह च कुसुमशब्दसापेक्षत्वेपि पूजाशब्दस्य प्रणिधानशब्देन सह समासो 'देवदत्तस्य गुरुकुलम्' इत्यादाविव न दोषायेति। तेन पूजाप्रणिधानेन करणभूतेन ॥ पूजां विनैव भावमात्रेणैवेति हृदयम् ॥ उपपन्नो-





For Private and Personal Use Only

त्पन्ना, त्रिदशलोके स्वर्गे॥ इत्यक्षरार्थः। कथानकं पुनरेवं पूज्याः प्रतिपादयन्ति॥ श्रीमन्महावीरवर्धमान-स्वामीक्ष्वाकुकुलनन्दनः प्रसिद्धसिद्धार्थपार्थिवपुत्रः पुत्रीयितनिखिलभुवनजनो जनितजनमनश्चमत्कारगुणग्रामो ग्रामाकरनगरपुरपौरपृथुं पृथिवीं विहरन्नन्यदा कदाचित्काकन्दीनामिकायां पुरि समाजगाम, तत्र चामरवरविसर-विरचितसमवसरणमध्यवर्तिनि भगवति धर्मदेशनां विदधति तदा नानाविधयानवाहनसमारूढप्रौढपत्तिपरिगते सिन्धुरस्कन्धमधिष्ठिते छत्रच्छन्नभस्तले मागधोद्गीतगुणगणे भेरीभाङ्कारभरिताम्बरतले नरपतौ तथा द्विजवरवैश्या-दिके पुरजने तथा गन्धधूपपुष्पपटलप्रभृतिपूजापदार्थव्यग्रकरकिङ्करीनिकरपरिगते विविधवसनाभरणरमणीयतरशरीरे नगरनारीनिकरे भगवतो वन्दनार्थं प्रव्रजति सति एकया वृद्धदरिद्रयोषिता जलेन्धनाद्यर्थं बहिर्निर्गतया कश्चिन्नरः पृष्टः 'क्वाऽयं लोक एकमुखस्त्वरितं याति?' तेनोक्तं 'जगदेकबान्धवस्य देहिनां जन्मजरामरणरोगशोकदुर्गत्या-दिदुःखच्छिदुरस्य श्रीमन्महावीरस्य वन्दनपूजनाद्यर्थं, ततस्तच्छ्रवणात्तस्या भगवति भक्तिरभवत् अचिन्तयच्च, अहमपि भगवतः पूजार्थं यत्नं करोमि केवलमहमतिदुर्गता पुण्यरहिता विहितपुजाङ्गवर्जितेति ततोऽरण्यदृष्टानि मुधालभ्यानि सिन्दुवारकुसुमानि स्वयमेव गृहीत्वा भक्तिभरनिर्भराङ्गी 'अहो धन्या पुण्या कृतार्था कृ]तलक्षणाऽहं सुलब्धं मम जन्म, जीवितफलं चाहमवाप' इति भावनया पुलककण्टकितकाया प्रमोदजलप्लवप्लावितकपोला भग-वन्तं प्रति प्रयान्ती समवसरणकाननयोरन्तराल एव वृद्धतया क्षीणायुष्कतया च झगिति पञ्चत्वमुपगता। ततोऽ-सावविहितपूजापि पूजाप्रणिधानोल्लसितमानसतया देवत्वमवाप्तवती। ततस्तस्याः कडेवरमवनिपीठलोठितमवलो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्याऽनुकम्पापरीतान्तःकरणो लोको मूर्छितेयमिति मन्यमानोऽम्भसा सिषेच । ततस्तामपरिस्पन्दामवलोक्य लोको भगवन्तं पप्रच्छ, भगवन्! असौ वृद्धा किंमृतोत जीवतीति ?, भगवांस्तु व्याजहार यथा मृताऽसौ देवत्वं चावाप्ता, ततः पर्याप्तिभावमुपागत्य प्रयुक्तावधिः पूर्वभवानुभूतमवगम्य वन्दनार्थमागतः, स चायं मत्पुरोवर्ती देव इति ॥ ततो भगवदभिहितमिदमनुश्रुत्य समस्तः स समवसरणधरणीगतो जनः परमं विस्मयमगमत् ॥ यथा । अहो पूजाप्रणिधानमात्रेणापि कथममरतामवाप्तासाविति ततो भगवान्गम्भीरां धर्मकथामकथयत् यथा स्तोकोपि शुभाध्यवसायो विशिष्टगुणपात्रविषयो महाफलो भवति । यतः ॥ " इक्कंपि उदगबिन्दू, पक्खित्तं जह महासमुद्दंमि ॥ जायं अक्खयमेवं, पूयावि जिणेसु विन्नेया ॥ ४७ ॥ उत्तमगुणबहुमाणो, पयमुत्तमसत्तमज्झयारंभि ॥ उत्तमधम्मपसिद्धी, पूयाए जिणवरिंदाणं ॥४८॥ ति ॥ " ततो भगवांस्तत्सम्बन्धिनं भाविभवव्यतिकरमकथयत् । यथा ॥ अयं दुर्गतनारी जीवो देवसुखान्यनुभूय ततश्च्युतः सन्कनकपुरे नगरे कनकध्वजो नाम नृपो भविष्यति । स च कदाचित्प्राज्यं राज्यसुखमनुभवन् 'मण्डूकं सर्पेण, सर्पं कुररेण, कुररमजगरेण, तमपि महाहिना' ग्रस्यमानमवलोक्य भावयिष्यति । यथा "एते मण्डूकादयः परस्परं ग्रसमाना महाहेर्मुखमवशाद्विशन्ति, एवमेतेपि जना बलवन्तो दुर्बलान्यथाबलं बाधयन्तो यमराजमुखं विशन्ति" इति भावयंश्च प्रत्येकबुद्धो भविष्यति, ततो राज्यसम्पदमवधूय श्रमणत्वमुपगम्य देवत्वमवाप्स्यति, एवं भवपरम्परयाऽयोध्याया नगर्याः शक्रावतारनाम्नि चैत्ये केवलश्रियमवाप्य सेत्स्यति इति गाथार्थः॥" यतनां चात्र स्नानपूजादिगतामित्थमादिशन्ति, "भूमीपेहणजल–च्छाणणाइ जयणा उ होइ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्हाणाओ ॥ एत्तो विसुद्धभावो, अणुहवसिद्धोच्चिय बुहाणं॥१९॥तथा॥एसो चेव इहं विही, विसेसओ सव्वमेव जत्तेणं॥ जह रेहति तह सम्मं, कायव्वमणण्णचेट्ठेणं॥११॥ वत्थेण बंधिऊणं, णासं अहवा जहा समाहीए॥ वज्जेयव्वं तु तदा, देहम्मिवि कंडुयणमाइ॥ २०॥" इत्यादि॥ नन्वेवं विध्यंशेऽशुद्धो भक्त्यंशे च शुद्धो योगः प्राप्तः, तथाच कथं न तत एकविधकर्मबन्धः, नच मिश्रं कर्म शास्त्रे प्रोक्तं येन मिश्रात्ततो मिश्रं कर्म बध्येतेत्याशङ्कायामाह—

सुद्धासुद्धो जोगो, एसो ववहारदंसणाभिमओ॥णिच्छयणओ उ णिच्छई, जोगज्झवसाणमिस्सत्तं॥८॥

व्याख्या—एष दुर्गतिनारीसदृशानां जीवानां विधिवैधुर्येऽपि भक्तिकालीनो जिनपूजायोगः अशुद्धदानादिवच्छुद्धाशुद्ध आंशिकशुद्ध्यशुद्धिपीन(प्राप्त)व्यवहारदर्शनस्य व्यवहारनयस्य अभिमतः॥ ततश्च वाग्व्यवहारमात्रसिद्धेर्नान्यत्फलं, निश्चयनयस्तु योगाध्यवसायस्थानानां मिश्रत्वं नेच्छति अशुभरूपाणां शुभरूपाणां च शास्त्रे प्रतिपादनात् तृतीयराशेरकथनादिति स्पष्टं महाभाष्ये। ननु समूहालम्बनोपयोगरूपस्याध्यवसायस्य सम्भवात्कथं तदप्रतिपादनमिति वाच्यम्, समूहालम्बनज्ञानस्य विशेषणीयत्वात् विध्यौपयिकस्य विशिष्टोपयोगस्यैवमधिकृतत्वादिति युक्तमुत्पश्यामः॥ तथा चाविध्यंशे उत्कटत्वेऽशुद्ध एव भक्त्यंशे पुनरुत्कटत्वे शुद्ध एव योग इत्येतन्मते एकस्माद्योगादेकदैक एव बन्धः बन्धकालस्य प्रदीर्घत्वात्परिणामपरावृत्त्या च मिश्रत्वं भावनीयम्। एकधारारूढे तु भक्तिभावेऽविधिदोषोपि निरनुबन्धतया द्रव्यरूपतामश्नुवंस्तत्र मग्न इवावतिष्ठते, एकधारारूढेऽविधिभावेप्यविधिभक्तिपर्यवसायिनि विधिपक्षादूषकतामप्यसहमाने भक्तिभावस्तथा अविधियुतस्य विषयेप्यर्चनादेर्भा-

For Private and Personal Use Only

वस्तवाहेतुत्वेन न द्रव्यस्तवत्वमिति प्रतिपादनादिति विवेचकाः ॥ ननु किमित्येवमविधियुतभक्तिकर्मणा व्यवहारतो निश्चयतो वा बन्धपदार्थकालापेक्षया मिश्रत्वमुच्यते, यावता द्रव्यहिंसयैव जलपुष्पादिजीवोपमर्दरूपया मिश्रत्वमुच्यतां उत्तरकालिकचैत्यवन्दनादिभावस्तवेन तद्दोषापनयनात्कूपदृष्टान्तोपपत्तेरित्याशङ्कायामाह—

**जइ विहिजुयपूयाए, दुट्ठत्तं दव्वमित्तहिंसाए ॥ तो आहारविहार-प्पमुहं साहूण किमदुट्ठं ॥ ६ ॥**

व्याख्या—यदि विधियुतपूजायां विधियुतभक्तिकर्मणि, द्रव्यमात्रहिंसया, दुष्टत्वं स्यात्, तोत्ति तर्हि, साधूनामाहारविहारप्रमुखं किमदुष्टमुच्यते ?, तदपि दुष्टमेव वक्तुमुचितं तत्रापि द्रव्यहिंसादोषस्यावर्जनीयत्वात् । यतनया तत्र न दोष इति चेत्, अत्रापि किं न तथा, जिनपूजादौ द्रव्यहिंसाया असदारम्भप्रवृत्तिनिवृत्तिफलत्वेनाहिंसारूपत्वात् ॥ तदुक्तं ॥ "**असदारंभपवत्ता, जं च गिही तेण तेसि विण्णेया ॥ तण्णिव्वित्तिफलच्चिय, एसा परिभावणीयमिणं** ॥४३॥" व्याख्या-असदारम्भप्रवृत्ताः प्राण्युपमर्दनहेतुत्वेनाशोभनकृष्यादिव्यापारप्रसक्ताः, यद्यस्माद्धेतोः, चशब्दः समुच्चये । गृहिणो गृहस्थाः; तेन हेतुना, तेषां गृहिणां, विज्ञेया ज्ञातव्या, तन्निवृत्तिफलैव देहगेहादिनिमित्तजीवोपमर्दनरूपाशुभनिवृत्तिप्रयोजनैव, भवति हि जिनपूजाजनितभावविशुद्धिप्रकर्षेण चारित्रमोहनीयक्षयोपशमसद्भावात्कालेनासदारम्भेभ्यो निवृत्तिः । तथा जिनपूजाप्रवृत्तिकाले वाऽसदारम्भाणामसम्भवात् शुभभावसम्भवाच्च तन्निवृत्तिफलाऽसौ भवतीत्युच्यते ॥ एषा जिनपूजा, परिभावनीयं पर्यालोचनीयं, इदं जिनपूजाया असदारम्भनिवर्तनफलत्वं भवद्भिरपि, येनावबुध्य तथैव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिपद्यते ॥ इति गाथार्थः ॥" इति पञ्चाशकवृत्तौ ॥ यतनातो नच हिंसा, यस्मादेषैव तन्निवृत्तिफला तदधिकनिवृत्तिभावाद्विहितमतोऽदुष्टमेतदिति, अत एवाऽऽपेक्षिकाल्पायुष्कताधिकारे " नन्वेवं प्राणातिपातमृषावादाऽप्रासुकदानं च कर्तव्यापन्नमिति चेत्, आपद्यतां नाम भूमिकाविशेषापेक्षया-को दोषः; अत एव यतिधर्माऽशक्तानां द्रव्यस्तवद्वारेण प्राणातिपातादौ प्रवृत्तिः प्रवचने प्रोक्तेति भगवतीवृत्तावुक्तं, अत्र यतिधर्माशक्तत्वं असदारम्भप्रवृत्तत्वं अधिकारिविशेषणं द्रष्टव्यं," आज्ञायोगादाहारविहारादिकं साधूनां न दुष्टमिति चेत्, अत्रापि परिमितसंसारफलकत्वार्थवादेनानुकम्पादाविवाज्ञायोगः किं न कल्प्यते?॥ उक्तं हि संसारप्रतनुताकारणत्वं द्रव्यस्तवस्य तत्र दानादिचतुष्कतुल्यफलकत्वोपवर्णनमप्यत्रोपष्टम्भकमेव, कूपज्ञातान्यथानुपपत्त्या पूजादिकाले द्रव्यहिंसाजनितं पापमवर्जनीयमेव, अत्र लिखनीयमग्रे लिखितं विलोक्यम् ॥ अथ द्रव्यस्तवे यावानारम्भस्तावत्पापमित्यत्र स्थूलानुपपत्तिमाह—

**जावइओ आरंभो, तावइयं दूसणंति गणणाए ॥ अप्पत्तं कह जुज्जइ, अप्पंपि विसं च मारेइ ॥७॥**

व्याख्या—द्रव्यस्तवे यावानारम्भस्तावद्दूषणमिति गणनायां क्रियमाणायां ऋजुसूत्रनयेन प्रतिजीवं भिन्नभिन्नहिंसाश्रयणादसङ्ख्यजीववि[ राधनासत्त्वादल्पत्वमारम्भस्य कथं युज्यते?, न कथञ्चिदित्यर्थः, अस्तु वा-कथञ्चिदल्पत्वं तथाप्यल्पो दोषः किं न नाशयति? अपितु नाशयत्येव, अत्र ज्ञातमाह, अल्पमपि विषं च मारयति]॥

॥ इति न्यायविशारदप्रणीतं त्रुटितावस्थमेव तत्त्वविवेकाख्यविवरणविभूषितं कूपदृष्टान्तविशदीकरणप्रकरणं सम्पूर्णम् ॥

१. कूपदृष्टान्तोऽयं प्राचीनपद्यैर्विभाव्यते ॥ कश्चित्पुमानरण्यानीं, वरेण्यसरणिच्युतः । अटाट्यमान उत्तप्तो, मध्याह्नेऽतितृषातुरः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ निजप्रज्ञासंस्मारितातीतश्रुतकेवलि-न्यायविशारद-न्यायाचार्य-महोपाध्यायश्रीयशोविजयगणिप्रणीतः ॥

## ॥ निशाभक्ते स्वरूपतो दूषितत्वविचारः ॥

ऐन्द्रश्रेणिनतं नत्वा, वीरं तत्त्वार्थदेशिनम् ॥ स्वरूपेणैव दुष्टत्वं, निशाभक्ते विभाव्यते ॥ १ ॥

अथ स्वरूपेणैव दुष्टत्वमित्यस्य कोऽर्थः ?, उच्यते, यथा हिंसामृषावादादिकं आगमनिषिद्धत्वात्स्वरूपेणैव दोषः, नतु तस्य दोषत्वे नियमतो दोषान्तरानुषङ्गित्वं प्रयोजकं तथा निशाभोजनमप्यागमनिषिद्धत्वात्स्वरूपेणैव दोषो नतु तस्य दोषत्वे दोषान्तरानुषङ्गः प्रयोजक इति ॥ एतेन यदुच्यते "रात्रौ सर्वत्र भक्ष्ये कुन्थुपनकोरणिकादिरवश्यं जीवोत्पत्तिरिति तद्धिंसानुषङ्गादेव वर्जनीयं विभावरीभक्तमिति" तदपास्तं द्रष्टव्यं, आगन्तुक-तदुद्भवव्यतिरेकेण भक्ष्ये रात्रिसम्बन्धमात्रेण जीवोत्पत्तेः सुधर्मस्वामिनमारभ्याद्य यावदप्रसिद्धत्वात् । अन्यथा कस्यचिदपेक्षया किञ्चिद्भक्ष्यमिति सर्वत्रापि जीवोत्पत्तौ वस्त्रादेरपि रात्रावग्रहणप्रसङ्गः । नच नियतभक्ष्यापेक्षयैव जीवा

---

चखान विवरं सोऽथ, निम्नावन्यामुदन्यकः ॥ वव्रधेऽस्य तृडल्पर्थं, तथा पङ्कश्च वर्ष्मणि ॥ २ ॥ तदुत्थं शीतलं स्वच्छं, पायं पायं पयः पुमान् ॥ चिच्छेद स दुरुच्छेदां, तृषामेष क्षणादपि ॥ ३ ॥ अविहस्तः स्वहस्तेन, सेवं सेवं तदम्भसा ॥ भीष्मग्रीष्मार्कसम्भूतं, देहाद्दाहमजीहरत् ॥ ४ ॥ प्रक्षाल्य तज्जलेनाङ्गं, क्षालयामास मंक्ष्वसौ ॥ प्राचीनं च नवीनं च, मलं निर्मलबुद्धिकृत् ॥ ५ ॥ अत्र चोपनयो भव्य-जीवो भ्राम्यन्भवाटवीम् ॥ तृष्णातापमलैः क्लान्तो, लोभतृद्पापलक्षणैः ॥ ६ ॥ विवेकभूमिमासाद्य, सोऽथ द्रव्यस्तवं दधत् ॥ विषयेषु तृषां तीक्ष्णां, क्षिणोत्यक्षुण्णहर्षभाक् ॥ ७ ॥ तं द्रष्टुमागतान्दृष्ट्वा, मुनीन्श्रुत्वाथ देशनाम् ॥ कषायशिखिसन्तापं, निर्वापयति शुद्धधीः ॥ ८ ॥ दानादिकं च सद्धर्मं, कुर्वन्पापमयं मलम् ॥ क्षालयत्यखिलं क्षिप्रं, युक्तोऽतः श्रावकस्य सः ॥ ९ ॥ इति प्राचीनतमपुरुषप्रणीतः कूपदृष्टान्तोपनयः सम्पूर्णः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्पत्तिं यान्तीत्याहोपुरुषिकामात्रमेतत्। किञ्च रात्रौ तदुद्भवागन्तुकजीवानां दुर्दर्शत्वेनैषणाद्यशुद्धिसम्भवेन च हिंसादोषमुद्भाव्य तत आगमनिषिद्धत्वादेव विभावरीभक्तस्यानासेवनीयत्वमुक्तं तत्त्वार्थवृत्ताविति किमन्यादृशपरिकल्पनया प्रौढिवादपराणां श्राद्धदिनकृत्ययोगशास्त्रवृत्त्यादिग्रन्थानां सम्प्रदायशुद्धतात्पर्यमजानतो देवानां प्रियस्य। तथा च तत्त्वार्थ (अध्याय ७ सूत्र २) वृत्तिः। " कः पुनर्दोषो रात्रिभोजने ? इति चेत्, एवं मन्यते उद्गमादिदोषरहितस्य वासरपरिगृहीतस्याभ्यवहारेणान्धसो नक्तं न किल दोष इति॥ एतदयुक्तं, कालातिक्रान्तस्य प्रतिषिद्धत्वात् गृहीतस्यानीतालोचितक्षणविश्रान्तिसमनन्तरमेव च भुजेरभ्यनुज्ञानात् निशाहिण्डने चैर्यापथविशुद्धेरसम्भवात् दायकगमनागमन–सस्नेहपाणिभाजनाद्यदर्शनादालोकितपानभोजनासम्भवात्, ज्योत्स्नामणिप्रदीपप्रकाशसाध्यमालोकनमिति चेत्, तदप्यसद्, अग्निसमारम्भनिषेधाद्रत्नपरिग्रहाभावाज्ज्योत्स्नायाः कादाचित्कत्वादागमे तन्निषिद्धत्वाद्धिंसावदनासेवनीयमेव विभावरीभक्तमिति॥" अत्र हि विभावरीभक्तस्यानासेवनीयत्वे आगमनिषिद्धत्वमेव हेतुरित्यत्र निर्भर इति॥ भ्रान्तः शङ्कते हिंसावदेवेत्यस्य हिंसायुक्तमेवेत्यर्थ इति ?, तत्तुच्छम्। उदाहरणपरस्यैतद्वचनस्य हेतुपरत्वे प्रमाणाभावात्। एकहेतोरेव चरितार्थत्वे हेत्वन्तरस्यानाकांक्षितत्वादप्रयोजकत्वेन हेतुहेतुपरत्वस्याप्ययोगात्। तथा सति हिंसावदित्यनन्तरमितीत्यस्याध्याहारप्रसङ्गाच्च॥ अथाऽनासेवनीयत्वं बलवदनिष्टाननुबन्धित्वे सति कृतिसाध्यत्वाभावः, आगमनिषिद्धत्वमित्यत्र चागमाभिधानं प्रमाणदार्ढ्याय, हेतुस्तु निषिद्धत्वमेव, तच्च स एवेति हेतुसाध्ययोरभेदप्रसङ्गान्नेदमनुमानं घटां प्राञ्चति? इति चेत्,

For Private and Personal Use Only

न, निषेधविधेर्लक्षणया पापजनकत्वमेवार्थ इति पापजनकत्वेन हेतुना उक्तसाध्यसाधनेऽस्य दोषलेशस्याप्यभावादिति युक्तमुत्पश्यामः॥ अथ पापजनकत्वमेव हिंसायुक्तत्वेनेति स एव हेतुरत्र शोभन इति चेत्, न, हिंसावदेवेत्यत्रैवकारस्य स्पष्टत्वार्थकत्वेन हिंसाया इव विभावरीभक्तस्य स्वातंत्र्येणैव पापजनकत्वस्य सिद्धान्तप्रसिद्धत्वात्। नहि हिंसा हिसान्तरमन्तर्भाव्य पापं जनयति तद्वदेव विभावरीभक्तं हिंसामन्तर्भाव्येति, न किञ्चिदेतत् ॥ यत्तु श्राद्धदिनकृत्यसूत्रवृत्त्योरुक्तं "तज्जोणियाण जीवाणं, तहा संपाइमाण य॥ निसिभत्ते वधो दिट्ठो, सव्वदंसीहि सव्वहा ॥ २२७ ॥" तस्मिन्संसक्तान्नसक्त्वादौ भक्ते निगोदोरणिकादीनां योनिरुत्पत्तिर्येषां ते तद्योनिका जीवास्तेषां तथा सम्पातिमानामागन्तुककुन्थुपिपीलिकादीनां चशब्दात् आत्मनश्च कीटिकादेर्मेधादिघातात्, निशिभक्ते वधो विनाशो, दृष्टः सर्वदर्शिभिः सर्वथेति ॥ यदुक्तं निशीथभाष्ये, "जइवि हु फासुअदव्वं कुंथुपणगा-इत्यादि।" अत्र सर्वथेति प्रौढिवाद एव, कालातिक्रमादिप्रयुक्तसंसक्तान्नसम्भवानामागन्तुकसम्पातिमसत्त्वानां च व्यापादनेन दोषसम्भव इत्यत्र तु निर्भर इति सूक्ष्मधिया निभालनीयम्॥ यत्तु, तस्मिन्नित्यनन्तरं 'अकारप्रश्लेषेणा-संसक्तान्नपानेपि रात्रियोगाज्जीवोत्पत्तिः' इति केनचिदभिधीयते तदभिनिवेशविजृम्भितं,अकारप्रश्लेषरहितस्यैव पाठस्य ताडपत्रादिपुस्तके दर्शनात्तत्सहितपाठस्य प्रदर्शयिष्यमाणभाष्यचूर्ण्याद्यागमविरुद्धत्वात्॥ एतेन योगशास्त्र-ग्रन्थवृत्तिलेशोपि (प्रकाश ३. श्लोक ५२–५३.) व्याख्यातः॥ अयं हि सः, "अपि च निशाभोजने क्रियमाणे अवश्यं पाकः सम्भवी तत्र च षड्जीवनिकायवधोऽवश्यम्भावी भाजनधावनादौ च जलगतजन्तुविनाशः, जलो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्झनेन च भूमिगतकुन्थुपिपीलिकादिजन्तुघातश्च भवति ॥ तत्प्राणिरक्षणकांक्षयापि न निशाभोजनं कर्तव्यं, यदाहुः ॥ "जीवाण कुंथुमाईण घायणं–भाणधोयणाइसु ॥ एमाइ रयणिभोयण–दोसे को साहिउं तरइ ॥१॥" इति ॥५२॥ ननु यत्रान्नस्य न पाको नवा भाजनधावनादिसम्भवस्तत्सिद्धं मोदकादि खर्जूरद्राक्षादि च भक्षयतः क इव दोष इति चेत् ?, (इत्याह) ॥ नाऽप्रेक्ष्यसूक्ष्मजन्तूनि, निश्यद्यात्प्रासुकान्यपि ॥ अप्युद्यत्केवलज्ञानै–र्नादृतं यन्निशाशनम् ॥५३॥ प्रासुकान्यपि अचेतनान्यपि, उपलक्षणत्वात्तदानीमपक्वान्यपि मोदकफलादीन्यपि, न निश्यद्यात्। कुतः ?, अप्रेक्ष्यसूक्ष्मजन्तूनि अप्रेक्ष्याः प्रेक्षितुमशक्याः सूक्ष्माः कुन्थुपनकादयो जन्तवो यत्र तानि, विशेषणद्वारेण हेतुवचनं, अप्रेक्ष्यसूक्ष्मजन्तुत्वादित्यर्थः। यद्यस्माद्, उत्पन्नकेवलज्ञानैः केवलज्ञानबलेनाधिगतसूक्ष्मेतरजन्तुसंघा(पा)तैः, निर्जन्तुकस्याहारस्याभावात्, नाऽऽदृतं निशाभोजनं ॥ यदुक्तं निशीथभाष्ये ॥जइवि०॥५३॥" अत्र हि पाकारम्भसम्भवी भाजनधावनादिसम्भवी प्रासुकेष्वपि तदुद्भवाऽऽगन्तुकजीवानां दुर्दर्शत्वसम्भवी जीवोपमर्ददोष उक्तः॥ निर्जन्तुकस्याहारस्याभावादिति तु प्रौढिवादमात्रं नतु रात्रिभक्ष्यसंसर्गजीवान्तरोपमर्दप्रतिपादनपरं 'संसग्गजीवसंघात'-मित्यग्रेपि सम्बध्यमानजीवसमूहमित्येव व्याख्यानात्। अन्यथा नित्यसंसक्तौ उत्पद्यमानजीवसमूहमित्येतद्(व)व्याकरिष्यत्, अत एव निशीथचूर्णौ चतुर्विधेपि रात्रिभोजने विचित्रसम्भवस्तत्र विचित्रप्रायश्चित्तप्रकारश्चोपदर्शितः प्रत्यक्षज्ञानिभिः प्रासुकद्रव्ये प्राणिविरहितत्वदर्शनेपि तदन्यैश्च रत्नाद्युद्योतेन तथादर्शनेपि षष्ठो मूलगुणो विराध्यते इत्येव हेतोरनाचीर्णत्वमुक्तं, तथाचैकादशोद्देशकसूत्रचूर्णिः। "जइविय० गाहा॥[जइवि हु फासुगदव्वं, कुंथुपणगा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वि तहवि दुप्पस्सा ॥ पच्चक्खनाणिणो वि हु राइभत्तं परिहरंति ॥ ३३९९ ॥ ] यद्यपि स्वत ओदनादि प्रासुकं द्रव्यं तथाप्यागन्तुकाः कुन्थ्वादयः पनकादयश्च तदुत्था अविशुद्धकाले दुर्दर्शा(र्दृश्या)भवन्ति ॥ किञ्च येपि प्रत्यक्षज्ञानिनस्ते विशुद्धं भक्तान्नपानं पश्यन्ति तथापि रात्रौ न भुञ्जते मूलगुणभङ्गत्वात् । जोण्हामणीदीवुद्दित्तालंबणप्रतिषेधार्थमिदमाह ॥ जतिविय० गाहा ॥ [ जइ वि हु पिवीलिगाइ, दीसंति पईवमाइ[जोइ]उज्जोए ॥ तहवि खलु अणाइन्नं, मूलवयविराहणा जेण ॥ ३४०० ॥ ] तीर्थकरगणधराचार्यैरनाचीर्णत्वात्, जम्हा छट्ठो मूलगुणो विराहिज्जइत्ति तम्हा रातो न भोत्तव्वं, अहवा रातीभोयणे पाणातिवायादियाण मूलगुणाणं जेणं विराहणा भवति अतो रातीए न भोत्तव्वं॥" तथा...

॥इति न्यायविशारद-न्यायाचार्य-महोपाध्यायश्रीयशोविजयगणिप्रणीतः त्रुटितावस्थ एव निशाभक्ते स्वरूपतो दूषितत्वविचारः॥

इति श्रीतपागच्छालङ्कारश्रीहीरविजयसूरीश्वरशिष्यमहोपाध्यायश्रीकल्याणविजयगणिशिष्यपं. श्रीलाभविजयगणिशिष्यपं. श्रीजीतविजयगणिसतीर्थ्यपं. श्रीनयविजयगणिचरणकमलचञ्चरीकपं. श्रीपद्मविजयगणिसहोदरन्यायविशारद-न्यायाचार्य-महोपाध्यायश्रीयशोविजयगणिप्रणीतं १ सविवरणं भाषारहस्यप्रकरणम् २ योगविंशिका व्याख्या ३ तत्त्वविवेकविवरणोपेतं कूपदृष्टान्तविशदीकरणप्रकरणं ४ स्वरूपतो निशाभक्ते दूषितत्वविचारश्चेति ग्रन्थरत्नचतुष्कम् ॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only